॥ श्रीरस्तु ॥

॥ श्रीसीतारामाभ्यां नमः ॥

॥ श्रीरामभक्तिकल्पलता ॥

रामपटलाद्यनेकप्राचीनग्रन्थेभ्यस्समुद्धृतैः
श्रीरामरामायणमहिमप्रतिपादकैः लघुप्रकरणैस्सङ्कलितः

॥ अयं ग्रन्थः ॥

मध्यार्जुनक्षेत्रवासिना वलङ्गिमान् ग्रामाभिजनेन
पण्डित "कविमणि" ना
त्रि. के. सुब्रह्मण्यशास्त्रिणा,
संपाद्य संशोध्य

कुम्भघोणनगरपरिष्कारायमाणे
"श्रीविद्यामुद्रायन्त्रालये"
संमुद्र्य प्रकाशितो विजयते ।
प्रमोदसंवत्सरे कुम्भमासि ।

(अस्य पुनर्मुद्रणाद्यधिकारः प्रकाशयित्रा स्वायत्तीकृतः)

१९३१

GIRI TRADING AGENCY
NEAR MATUNGA ... C.R.)

॥ एतद्ग्रन्थस्थ विषयसूचिका ॥

	विषयः	पृष्ठसङ्ख्या
१.	रामपूजाकल्पः	१
२.	सुन्दरकाण्डसप्तसर्गीपारायणविधिः	८
३.	श्रीरामपट्टाभिषेकप्रयोगः, तत्सङ्कल्पश्च	११
४.	रामलक्ष्मणप्रतिमादानविधिः	१९
५.	रामायणपारायणावसरेषु निवेदनक्रमः	२४
६.	कामनावद्भिः पठनीयरामायणषट्काः	२७
७.	रामायणषट्कपारायणेन नवग्रहदशाश्रुक्तिदोष-परिहरः	३३
८.	रामचन्द्रमूर्तिप्रतिष्ठाविधिः	४९
९.	श्रीरामायणमाहात्म्यम्	५५
	तत्र द्वितीयोऽध्यायः	६१
	तत्र तृतीयोऽध्यायः	७३
	तत्र पुनर्वसुपारायणविधिः	७५
	तत्र नवरात्रपारायणविधिः	७८
	तत्र ऐच्छिकपारायणविधिः	७९
	तत्र पुनर्वसुत्रयापेक्षपारायणविधिः	८०
	तत्र नारदकृतपुनर्वसुपारायणषट्कः	८२

रामायणनवाहपारायणविधिः	९१
श्रीरामदशावरणपूजाप्रकारः	९८
रामतापिन्युपनिषद्धृतरामस्तोत्रम्	१०६
हनुमत्कृतरामस्तोत्रम्	११०
रामभुजङ्गस्तोत्रम्	१११
अगस्त्यसंहितोक्तरामपट्टाभिषेकविधिः	११३
श्रीरामाष्टोत्तरशतनामस्तोत्रम्	१२६
श्रीरामाष्टोत्तरशतनामावळिः	१२९
सीताष्टोत्तरशतनामस्तोत्रम्	१३२
सीताष्टोत्तरशतनामावळिः	१३४
हनुमदष्टोत्तरशतनामस्तोत्रम्	१३७
हनुमदष्टोत्तरशतनामावळिः	१४०
एतद्ग्रन्थस्थविषयविवरणम्	१४३

FOREWORD.

Brahmasri V. K. Subrahmanya Sastriar has laid all Bhaktas of Sri Rama under a deep debt of obligation by the timely publication of **श्रीरामभक्तिकल्पलता** a manual of regulations for the worship of Sri Rama and for the Parayanam (recitation) of the sacred epic Sri Ramayana. I personally know that the learned Pandit has spent a great deal of time and labour in collating the various items of information contained in the book from unpublished manuscripts buried in private libraries and not available to the public. Himself a devout Rama Bhakta, it is in the fitness of things that he should be the person to undertake the publication of this important and useful booklet.

Brahmasri Subrahmanya Sastriar is a versatile Sanskrit scholar and a poet of no mean order as his **उत्तरचंपूः , श्वश्रूविजय & खरवध** (a drama) and various miscellaneous stotras testify. He has requested me to write a short Foreword to the book. In complying with his request I shall take the opportunity of pointing out a few salient features of the book.

I. The Ramayana is not merely an epic poem but a sacred book treating of the Lilas of the Supreme Lord, as the oft-quoted Sanskrit couplet runs;

"वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ॥"

The following sloka from Harivamsa quoted in the Vishnu Sahasranama Bhashya may also be mentioned in this connection.

"वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते ॥"

It is therefore a cardinal article of faith that the Parayana of Sri Ramayana leads to both **अभ्युदय** and **निश्रेयस** (secular bliss and Mukti). It is recorded in Kalhana's **Rajatarangini** that king Damodara of Kashmir who was cursed by certain sages for refusing to give them food when asked was advised to expiate this sin by hearing the recitation of the entire Ramayana in a single day.

अशेषमेकेनैवाह्ना श्रुता रामायणं तव ।
शापस्य शान्तिर्भवितेत्यूचिरे ते प्रसादिताः ॥

Many persons can bear personal testimony to the beneficial results of Ramayana Parayana conducted according to the prescribed rules made available to the general public in the present treatise.

II. Attention is specially invited to the Puja Kalpa which is found in the very beginning of the present publication. The **अङ्गपूजा** and **गुण-पूजा** given therein contain an admirable description of the physical, intellectual and spiritual characteristics of the Divine Man Sri Ramachandra.

III. The previous history of the Sage Valmiki given in The chapters of Ramayana Mahatmya is sure to dispel the erroneous notion uncritically entertained by many that the Sage was a Non-Brahmin raised later on to the status of a Brahmin.

Limits of space forbid the further discussion of many other interesting details contained in the book which I earnestly recommend to all Bhaktas of Sri Ramachandra.

Tiruturaipundi,
11th June 1924.

R. Krishnaswami Sastri.

॥ भूमिका ॥

इदं खलु भगवतो भास्करस्य प्रदीपेन प्रकाशनं यद्रसिकङ्कुलास्वादितसरसकवितासुधारसस्य पण्डितमण्डलीपरिशीलिताविशिष्टशास्त्रपाण्डित्यस्य श्रीमतः सुब्रह्मण्याख्यसूरिमणेः कविताया वैदुष्यस्य वा प्रकाशनं नाम ॥

अयं खलु महाशयश्चिरेण कालेन न केवलं दुस्तराणि शास्त्राणि नापि परं कुसुमसुकुमारां साहित्यसरणिम्, अपि तर्हि आमुष्मिकफलसाधनानि इतिहासपुराणादीनि तत्राऽपि विशिष्य कविप्रथमपद्धतिं श्रीमतीं वाल्मीकीयां सुभाषितनीवीमविरतं परिशीलयन्नेव सफलयति जन्मेति नूनमस्य विवर्तएवायम्, यदिदानीमयं महाभागः श्रीरामभक्तिकल्पलतां नाम प्रबन्धमखिलोपकाराय प्रकटयति ॥

अत्र हि सन्ति रामपूजाविधिप्रभृतीनि षोडश प्रकरणानि । एकैकमपि प्रकरणं उमासंहिता स्कन्दोपपुराण रामपटलादिभ्यः प्राचीनेभ्यो ग्रन्थेभ्यः समुद्धृतमिति न खल्वेतेषां विषयाणामत्यावश्यकतायामपेक्षणीयो वाग्विस्तरः ॥

इदमत्र विशेषान्तरम्— यदुत तत्तत्फलकामपठनीयघट्टाः सूर्यादितत्तद्देशाशुक्तिदोषपरिहारार्थपठनीयघट्टाश्च निखिलानामप्यत्यावश्यका अत्र योजिता इति ॥

एतेषाञ्चावश्यकानां विषयाणां बहुभ्यस्समुद्धृत्य प्रबन्धेभ्य एकत्र संयोजनं नाम नियतमेकं पुरुषायुषमपेक्षेतेति ईदृशे महत्यस्मिन् कर्मणि प्रवृत्तानां श्रीसुब्रह्मण्यशास्त्रिवर्याणामखिलैरप्यास्तिकैरनेकधा हस्तावलम्बनदानेन समुत्साहस्संवर्धनीय इति प्रार्थयमान एवाहं तथैव कुर्युरिति विश्वसन्नास्मि ॥

सहृदयसमुदायदासः,
रा. च. वि. कृष्णमाचार्यः,
कुम्भघोणस्थ
राजकीयाङ्गलमहाकलाशाला
संस्कृताध्यापकः

श्रीकुम्भघोणम्
रक्ताक्ष वृषभ
कृष्णचतुर्थी

॥ कालज्ञविज्ञापना ॥

अयि भोः ! अज्ञानध्वान्ततरणयः आस्तिकमणयः !!

विदितमेवेदं हि तत्रभवतां भवतां यद्दिनेदिने प्रवर्धमानेऽस्मिन् कलौ ज्ञानकर्मयोगादीनि मुक्तिसाधनानि दुस्साधानीति निस्सारितानि निचारमार्गनिपुणैरिति, भक्तिरेकैव कैवल्यसाधनत्वेन साध्यत इति च । तादृशभक्तिगम्यदेवताविचारे, सतीष्वपि बहीषु विप्रतिपत्तिषु, सागरोत्पादनगङ्गाप्रवर्तनाद्यतिदुष्करकर्मालङ्कर्मीण सगर भगीरथादिपुरुषधौरेयजन्मदानाविख्याततरे श्रीमतीक्ष्वाकुवंशे कृतावतारो भगवान् राम एव भक्त्याऽनन्यया समाराधितो भुक्तिमुक्ती प्रयच्छतीति सर्वमतस्थैरप्यकामेनाप्यङ्गीकृतोऽयंविषयः । यो मत्या परपुरुषगामिनीमप्यहल्यां पावयित्वा भर्त्रा सह तपसे सङ्गमय्य पतितपावनपादरजस्कतामात्मनः प्रकटयामास । यस्य च सकृदेव पादस्पर्शलाभसमधिगतमहोन्नताद्दृष्टं दार्वपि किमपि पादुकाख्यं इक्ष्वाकु सगर भगीरथ ककुत्स्थ रघुप्रभृतिभिरध्यासितं दिव्यसिंहासनमधिष्ठाय परिपालिताखण्डभूमण्डलं शंसति नः पादस्य भगवतस्संपत्प्रदानमहिमा तावदवाङ्मनसगोचर इति । यस्मै च रुच्यानि फलान्यर्पयित्वा 'चक्षुषा तव सौम्येन पूताऽस्मि रघुनन्दन' इत्यभिधानत आगामिसञ्चितप्रारब्धाख्यपापत्रयादात्मानं पुनाना स्वपरिचर्याराधितानां पितामहभवनस्थानां मतङ्गशिष्याणां सन्निधिमवगाहमाना शबर्यापि काचन 'भक्तिपूर्वकं भगवते यत्किञ्चिदप्यर्पितमनघं फलं प्रददाती'ति

बोधयति लोकान् । येन च 'मयात्वं समनुज्ञातो गच्छलोकाननुत्तमा' निति पुनरावृत्तिरहितं निजं परं पदमपि गृद्ध्राय कर्माद्यनधिकृतायापि कस्मैचन प्रदत्तमाकर्ण्य को नाम न विश्वसितु भगवत्कैङ्कर्यफलमियादिति वक्तुं न पार्यत इति । असह्यया वेदनया भर्तारमुद्बोधितवत्या अपि, क्रोधेन महता कस्ते वक्षसि विक्षतं चकारेति पृष्टाया अपि, भगवतः क्रोधमुद्वीक्ष्य काकोऽयमवश्यं म्रियेतेति मन्वानायाः, महापराधिन्यपि परया करुणया तमागस्कारिणमनाचक्षाणायाः, सीतायाः भावमालोच्य विमुक्तास्त्रोऽपि तस्मै निजास्त्रस्य तदनुसरणमात्रमाज्ञाप्य अन्ततस्तमेव ररक्षेति कथया अस्मात्पित्रोस्सीतारामयोः कृपा केन खल्वीदृशी तादृशीति वर्णयितुं शक्यताम् । अददाच्च यस्सीमातिगावर्थकामावाश्रिताय कपयेऽपि सुग्रीवाय । प्राख्यापयच्च ब्राह्मणानामनतिक्रमणीयतां मलपङ्कधरमपि भिक्षुकं त्रिजटमालिङ्ग्यानुनयन् । आख्यच्च धर्मस्यार्थकामाभ्यां महत्तरतां स्वसिद्धान्तभूतां कौसल्यागृहे लक्ष्मणमुपशमयन् । अबोधयच्च प्रभूणामपि स्त्रीभिस्सभर्तृकाभिः कुङ्कुमचन्दनाङ्गरागपुष्पवस्त्रादीनां मङ्गळद्रव्याणां प्रीतिदानं न प्रत्याख्येयमिति अनसूयासः हास्यामभ्यनुजानानस्सीतायाः । उपादिक्षच्च वधूभ्यः महत्यामप्यापदि परपुरुषस्पर्शः परिहर्तव्य इति सीतया । अदर्शयच्च 'सराशिस्सुमहांस्तत्र दर्शनीयोह्यदृश्यते'ति, 'अददाद्धनदो यथे'ति च वर्णयितुरादिकवेरपि विस्मयं जनयन् महान्तं मणिकनकराशिमनर्थिभ्योऽप्याहृय वितरन्नतिलोकमौदार्यम् । प्राचीकशच्च

धर्माविरोधेनैवार्थकामौ सेवितव्याविति सुग्रीवंप्रति कोपव्याजेन । अतिष्ठिपच्च महान्तमदृष्टनिधिं लोकानां लोकेष्वदृष्टश्रुतचरं शिलाभिस्सागरे सेतुं निबध्य तस्य च स्वयाचैव 'एतत्पवित्रं परमं महापातकनाशन'मिति महिमानं प्रख्यापयन् । अदर्शयच्च परममाश्रितसौलभ्यं भृत्यमपि कपिमपि हनुमन्तमाश्लिष्यन् । तस्यैवंविधस्य भगवतो रामचन्द्रस्य धैर्यवीर्यौदार्यकारुण्यादिप्रकाशकानि भगवता वाल्मीकिना प्रदर्शितानि बहूनि स्थलान्यसङ्ख्येयानि श्रीरामायणे परिदृश्यन्ते । कोऽहं वराकस्तानि ज्ञातुमपि नाम । भगवांस्तु वाल्मीकिस्तत्रतत्र परवश इव, उन्मत्त इव, ग्रहगृहीत इव, वेतनेन वशीकृत इव, स्वं पापं परिहरन्निव, कृतनिर्बन्ध इव च रघुनायकगुणगुम्भान् जम्भारिगुरुणाऽप्यशक्यवर्णनान् वर्णयन् पठतां श्रोतॄणां च मानसमानन्दमेदुरं कलयति, आन्दोळयति शिरः, हर्षयति लोमानि, शमयति पापानि, सङ्गमयति मङ्गळानीति पारे वाचां वाल्मीकेरपि महिमा । मशका इव सुधाब्धौ श्रीमति रामायणे वयं कियद्वाऽऽस्वादयितुं शक्नुमः । कुत्र वा स्थले नीरसतां पश्यामः । कथं वा तृप्तिर्जातेत्यन्यतोऽपगच्छामः । अयोध्याकाण्डारम्भे, मन्थरामनुनयन्त्याः कैकेय्या वचनप्रस्तावे, शूर्पणखाऽकंपनयोरुक्तौ, हनुमत्सीतासंवादे, दशरथविलापे, अभिषेकार्थमागच्छति राम इति पौरजनकुतुकवर्णने, अन्येष्वप्यनन्तेषु घट्टेषु उद्घुष्यमाणाः श्रीरामगुणाः स्मृता अपि पुळकयन्ति शरीरम्, आनन्दबाष्पमेदुरे आतन्वन्ति दृशौ, गद्गदय-

न्ति कण्ठं, विस्मृतान्यक्रियमेव कुर्वन्ति मानसम्, एवंविधानां विषयाणामनुध्यानानन्तरमपि को नाम रामादन्यां देवतामीहतामुपासितुं भुक्त्यै वा मुक्त्यै वा । तस्यैवंविधस्य सुलभेनैवोपायेन धर्मादिपुरुषार्थचतुष्टयदानशौण्डस्य चण्डकिरणकुलमण्डनस्य रामस्य प्रसादाधिगमाय सत्स्वपि बहुषु मार्गेषु श्रीरामायणपूजनपठनश्रवणाख्यानि कर्माणि सन्निहितानि साधनानीति सर्वविदितस्यास्य विषयस्य न मम प्रामाण्यलेखनप्रयासस्समीचीन इति विरम्यते । तस्य चैवंविधस्य श्रवणपठनाभ्यां मुक्तिमुक्तिप्रदस्य श्रीरामगुणरत्नपारावारस्य ओजःप्रसादमाधुर्यद्राक्षापाकादिभाण्डागारस्य व्यङ्ग्यार्थभङ्ग्येकनिलयस्य श्रीमतो रामायणस्य पारायणं कथं वा कार्यं, पाठो वाऽस्य कतिविधः, इत्यादि जिज्ञासापरिप्लुतमानसेन मया बहून्वत्सरान् बहूंश्च देशानटित्वा महता प्रयासेन स्वनिकटस्थितग्रन्थप्रदर्शनमपि हन्त षोडशमहादानाधिकं मन्यमान्येभ्यः केभ्यश्चन महाशयेभ्यः केचन रामरामायणमहिमप्रदर्शका ग्रन्थास्संपादिताः। ते च मुद्रणेन प्रकाशिताश्चेत् अवश्यं रसिका भक्ताश्च रघुनाथे मोमुद्येरन्निति मत्प्रियसुहृद्भूताभिनवभट्टबाणकृष्णमाचार्यप्रभृतिभिः बहुभिः पण्डितैः प्रचोदितेन इदानीं तिरुत्तुरैप्पूण्डिस्थानस्थित पत्रप्रतिकृतिकरणस्थानाध्यक्षत्वमास्थितैः (*Sub Registrar*) भक्ताग्रेसरैरसिकमणिभिः स्वयमभिज्ञैश्च श्रीमद्भिः कृष्णस्वामिशास्त्रिभिः प्रोत्साहितेन च मया ते ग्रन्थाः संमुद्रय प्रकाशिताः ॥

अत्र च प्राथमिके रामपूजाकल्पे अङ्गपूजा गुणपूजा राजोपचारपूजा प्रार्थनाश्लोकाश्च परां कोटिमर्हन्ति संमानस्य। रामायणपारायणकाले अस्मिन् घट्टे ईदृशं नैवेद्यमावश्यकमितीदं रामप्रसादं झटित्यादत्त इव । रामायणमाहात्म्ये नित्यमुमुक्षु-पाठविधौ पुनर्वसुपारायणंमहिमा च भृशमावर्जयन्तिमनः। राम-लक्ष्मणप्रतिमादानविधिनाऽत्र दृष्टेन अहमपि वेद्मि कतिचन पुत्रवतामग्रेसरा अभूवन्निति। नवाहरामायणपारायणं परमफलं परमसुलभञ्च दृश्यते। मूर्तिप्रतिष्ठाविधिरवश्यमपेक्षणीयो बुद्धि-मद्भिः स्वपूज्यप्रतिमायां भगवत्सान्निध्याभिलाषुकैः । एवम-न्येष्वपि ग्रन्थेषु विद्यमानास्तत्तत्सारांशाः स्वयमेव अभिज्ञैर्ज्ञा-येरिति निवृत्तोऽस्मि विस्तरात्। पूर्वोक्ता विशेषांशाः पुनः आनन्दनिर्भरहृदयतया स्वयमेव वदनादुद्गलिता इति ध्येयम्। अत्र मुद्रितानि श्रीराम सीता हनूमदष्टोत्तरशतनामस्तोत्राणि न कुत्रापि केनापि दृष्टचराणि स्युरिति वचने धीरोऽस्मीति गदितुं न जिह्रेमि। एतादृशस्यास्य मुद्रणस्य सश्रद्धं शोध्यपत्र-शोधनादिना बहूपकृतवतां श्रीमतां शारदाविलासमुद्रणालय-कार्यनिर्वाहकानां नारायणशास्त्रिमहाशयानां बहून् धन्यवा-दान् कार्तज्ञ्यसूचकान् वाचयाम इति शिवम् ॥ * ॥

मध्यार्जुनम्
रक्ताक्षवत्सरे
ज्येष्ठकृष्णाष्टमी

श्रीरामभक्तचरणरेणुं
शिरसि विवक्षुः,
वि. के. सुब्रह्मण्यशास्त्री.

॥ श्रीः ॥

॥ श्रीरामोजयति ॥

॥ अथ श्रीरामपूजाविधिः ॥

॥ रामपटलोक्तः ॥

आदौ सङ्कल्प्य, देशकालौ संकीर्त्य, सीतालक्ष्मण-भरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्रप्रीत्यर्थं ब्रह्मनारदवाल्मीकिभिः परमेष्ठिपरापरपरमगुरुभिः सन्दर्शितेन मार्गेण अस्मद्गोत्रगुरुभिः श्रवणकीर्तनादिषु नवविधासु भक्तिषु पूजनाभिधस्य भजनविशेषस्य यथावदनुष्ठानेनाराधितस्य, श्रींषडक्षरीमूल-मन्त्र मालामन्त्र पूर्णध्यानाङ्गध्यानादिगोचरीभूतस्य श्रीकामनया भजनपराणामखिलविधसंपदर्पणार्थं अपाङ्गस्यन्दमान-करुणया जानक्यासह भासमानस्य, मोक्षार्थं भजतां (सकलपुण्यपापलोकप्रत्याहारार्थं करधृतबाणकोदण्डस्य।) (अथवा) दिव्यज्ञानप्रदचिन्मुद्राङ्कितपाणिकमलस्य नवाङ्गदेवतासहितस्य एकादशोपाङ्गदेवतासहितस्य च भगवतः श्रीरामचन्द्रस्य संभवता द्रव्येण संभवन्त्त्या श्रद्धया यथाशक्ति षोडशोपचार-पूजां करिष्ये इति सङ्कल्प्य, कलशपूजां कृत्वा, आधारपूजां कुर्यात् ॥

तथाहि—(मध्ये) भूमौ शेषाय नमः, इन्द्राय नमः, यमाय नमः, वरुणाय नमः, सोमाय नमः, अग्नये नमः, निर्ऋतये नमः, वायवे नमः, ईशानाय नमः इति पुष्पैरक्षतैश्च संपूज्य पीठं स्थापयेत् । तन्मद्धये श्रीरामं च ध्यायेत् । दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात् । वीरासने समासीनं (चिन्मुद्रापरिशोभितम्) बाणकोदण्डमाण्डितम् । अङ्गोपाङ्गैश्शोभमानं रामचन्द्रमहं भजे ॥ रघुनाथ महेष्वास रघुवीर नृपोत्तम । मोदशास्यान्तकास्माकं रक्षां देहि श्रियं यशः ॥ इत्यावाह्य । "वामे भूमिसुता" इत्यादिश्लोकोक्तरीत्या अङ्गदेवताः आवाहयेत् ॥

तथाहि— वामे सीतामावाहयामि । पुरःप्रदेशे हनूमन्तमावाहयामि । पश्चिमे लक्ष्मणमावाहयामि । उत्तरस्यां दिशि शत्रुघ्नमावाहयामि । दक्षिणस्यां दिशि भरतमावाहयामि । वायुदिशि सुग्रीवमावाहयामि । ऐशानदिशि विभीषणमावाहयामि । आग्नेय्यां युवराजमङ्गदमावाहयामि । नैर्ऋत्यां जांबवन्तमावाहयामि ॥

अथ उपाङ्गदेवतावाहनं तत्तन्मन्त्रैः । रामस्य पादमूले दक्षिणभागे गणपतिमावाहयामि । उत्तरभागे वीणया भगवद्गुणगानपरां सरस्वतीमावाहयामि । साक्षात्पुरतो दुर्गामावाहयामि । दक्षिणभागे आकाशे सूर्यमावाहयामि । उत्तरभागे चन्द्रमावाहयामि । पश्चिमे शङ्खचक्राद्यायुधविशिष्टं कौस्तुभग्रीवं नारायणमावाहयामि । पश्चिमदक्षिणे चन्द्रकोटि-

समग्रभं तादृशं वासुदेवमावाहयामि । पश्चिमोत्तरे यज्ञवराह-मावाहयामि । दक्षिणभागे नारसिंहमावाहयामि । उत्तरभागे वायुदेवमावाहयामि । पुनश्च पादमूले बद्धाञ्जलिपुटं हनुमन्तमा-वाहयामि । अङ्गोपाङ्गसमायुक्त चतुर्वर्गफलप्रद । भूत्वा सन्नि-हितः पूजां गृहाण रघुनन्दन ॥ इति संप्रार्थ्य मधुपर्कं निवेद्य । प्रत्युपचारं मूलमन्त्रोच्चारणपुरस्सरं साङ्गाय सपरिवाराय सीतालक्ष्मणादिसहिताय श्रीरामाय नमः इति कीर्तयेत् ॥

रत्नसिंहासनारूढ सर्वभूपालवन्दित । आसनं ते मया दत्तं प्रीतिं जनयतु प्रभो ॥ आसनम् ॥ पादाङ्गुष्ठसमुद्भूत गङ्गापावितविष्टप । पाद्यार्थमुदकं राम ददामि परिगृह्यताम् ॥ पाद्यम् ॥ बालखिल्यादिभिर्विप्रैस्सिसन्ध्यं प्रयतात्मभिः । अर्घ्यै-राराधित विभो ममार्घ्यं राम गृह्यताम् ॥ अर्घ्यम् ॥ आचान्तां-भोधिना राम मुनिना परिसेवित । मया दत्तेन तोयेन कुर्वाचमन मीश्वर ॥ आचमनीयम् ॥ कामधेनुसमुद्भूत क्षीरेणेन्द्रेण राघव । अभिषिक्ताखिलार्थाप्त्यै स्नाहि मद्दत्तदुग्धतः ॥ क्षीराभिषेकम् ॥ हनूमता मधुवनोद्भूतेन मधुना प्रभो । प्रीत्याऽभिषेचिततनो मधुना स्नाहि मेऽद्य भोः ॥ मध्वभिषेकम् ॥ त्रैलोक्यतापहरण-नामकीर्तन राघव । मधूत्थतापशान्त्यर्थं स्नाहि क्षीरेण वै पुनः ॥ मध्वभिषेकान्ते पुनः क्षीराभिषेकम् ॥ नदीनदसमु-द्रादि तोयैर्मन्त्राभिसंस्कृतैः । पट्टाभिषिक्त राजेन्द्र स्नाहि शुद्धजलेन मे ॥ स्नानम् ॥ (अत्र यथासंभवं पुरुषसूक्तश्री-सूक्तादिजपः कर्तव्यः ॥

हित्वा पीतांबरं चीरकृष्णाजिनधराच्युत । परिधत्स्वाद्य मे वस्त्रं स्वर्णसूत्रविनिर्मितम् ॥ वस्त्रम् ॥ राजर्षिवंशतिलक रामचन्द्र नमोऽस्तु ते । यज्ञोपवीतं विधिना निर्मितं धत्स्व मे प्रभो ॥ उपवीतम् ॥ किरीटादीनि राजेन्द्र हंसकान्तानि राघव । विभूषणानि धृत्वाऽद्य शोभस्व सह सीतया ॥ आभरणानि ॥ सन्ध्यासमानरुचिना नीलाभ्रसमविग्रह । लिम्पामितेऽङ्गकं राम चन्दनेन मुदा हृदि ॥ गन्धान्धारयामि ॥ अक्षतान् कुङ्कुमोन्मिश्रा नक्षय्यफलदायक । अर्पये तव पादाब्जे शालितण्डुलसंभवान् ॥ अक्षतान् ॥ चंपकाशोकपुन्नागैर्जलजैस्तुळसीदळैः । पूजयामि रघूत्तंस पूज्यंत्वां सनकादिभिः॥ पुष्पाणि समर्पयामि ॥

अथाङ्गपूजा—अहल्योद्धारकाय नमः श्रीरामपादरजः पूजयामि ॥ शरणागतरक्षकाय नमः पादकान्तिं पूजयामि ॥ गङ्गानदीप्रवर्तनपराय नमः पादनखान् पूजयामि ॥ सीतासंवाहितपदाय नमः पादतलं पूजयामि ॥ विनतकल्पद्रुमाय नमः गुल्फौ पू— ॥ दुन्दुभिकायविक्षेपकाय नमः पादाङ्गुष्ठं पू— ॥ दण्डकारण्यगमनजंघालाय नमः जंघे पू— ॥ जानुन्यस्तकरांबुजाय नमः जानुनी पू— ॥ वीरासनाध्यासिने नमः ऊरू पू— ॥ पीतांबरालङ्कृताय नमः कटिं पू— ॥ आकाशमद्धयगाय नमः मद्धयं पू— ॥ अरिनिग्रहपराय नमः कटिलंबितमसिं पू— ॥ अब्धिमेखलापतये नमः मध्यलंबितमेखलादाम पू— ॥ उदरास्थितब्रह्माण्डाय नमः उदरं पू— ॥ जगत्त्रय-

गुरवे नमः वलितयं पू— ॥ सीतानुलेपितकाश्मीरचन्दनाय नमः वक्षः पू— ॥ अभयप्रदानशौण्डाय नमः दक्षिणबाहु-दण्डं पू— ॥ वितरणजितकल्पद्रुमाय नमः दक्षिणकरतलं पू— ॥ आशरनिरसनपराय नमः दक्षिणकरास्थितशरं पू—॥ ज्ञानविज्ञानभासकाय नमः चिन्मुद्रां पू— ॥ मुनिसंघार्पित-दिव्यपदाय नमः वामभुजदण्डं पू— ॥ दशाननकालरूपिणे नमः वामहस्तास्थितकोदण्डं पू— ॥ शतमखदत्तशतपुष्कर-स्रजे नमः अंसौ पू— ॥ कृत्तदशाननकिरीटकूटाय नमः अंसलंबिनिषङ्गद्वयं पू— ॥ सीताबाहुलतालिङ्गिताय नमः कण्ठं पू— ॥ स्मितभाषिणे नमः स्मितं पू— ॥ नित्यप्रस-न्नाय नमः मुखप्रसादं पू— ॥ सत्यवाचे नमः वाचं पू— ॥ कपालिपूजिताय नमः कपोलौ पू— ॥ चक्षुश्श्रवःप्रभु-पूजिताय नमः श्रवसी पू— ॥ अनासादितपापगन्धाय नमः घ्राणं पू— ॥ पुण्डरीकाक्षाय नमः अक्षिणी पू— ॥ अपा-ङ्गस्यन्दिकरुणाय नमः अरुणापाङ्गद्वयं पू— ॥ विनाकृतरुषे नमः अनाथरक्षककटाक्षं पू— ॥ कस्तूरीतिलकाङ्किताय नमः फालं पू— ॥ राजाधिराजवेषाय नमः किरीटं पू— ॥ मुनि-मण्डलपूजिताय नमः जटामण्डलं पू— ॥ मोहितमुनिजनाय नमः पुंसां मोहनं रूपं पू— ॥ जानकीव्यजनवीजिताय नमः विद्युद्विद्योतितकालाभ्रसदृशकान्ति पू— ॥ हनूमदर्पितचूडा-मणये नमः करुणारसोद्वेल्लितकटाक्षधारां पू— ॥ सुमन्त्रानु-ग्रहपराय नमः तेजोमयरूपं पू— ॥ कंपितांभोधये नमः

आहार्यकोपं पू—॥ तिरस्कृतलङ्केश्वराय नमः धैर्यं पू— ॥ दूराद्वन्दितजनकाय नमः विनयं पू— ॥ संमानितत्रिजटाय नमः अतिमानुषसौलभ्यं पू— ॥ गन्धर्वराजप्रतिमाय नमः लोकोत्तरसौन्दर्यं पू— ॥ असहायहतखरदूषणादि चतुर्दशसहस्रराक्षसाय नमः पराक्रमं पू— ॥ आलङ्गिताञ्जनेयाय नमः भक्तवात्सल्यं पू— ॥ लब्धराज्यपरित्यक्त्रे नमः धर्मं पू— ॥ दर्भशायिने नमः लोकानुवर्तनं पू— ॥ सर्वेश्वराय नमः सर्वाण्यङ्गानि सर्वांश्च गुणान् पूजयामि ॥

अत यथाऽवकाशं सहस्रनामार्चनं अष्टोत्तरशतनामार्चनं चतुर्विंशतिनामार्चनं द्वादशनामार्चनं च कुर्यात् ॥ अथ अङ्गदेवतार्चनं उपाङ्गदेवतार्चनं च कुर्यात् ॥

अथ धूपादिनीराजनान्तं वैदिकैर्मन्त्रैः कुर्यात् । कल्पवृक्षसमुद्भूतैः पुरुहूतादिभिस्सुमैः । पुष्पाञ्जलिं ददाम्यद्य पूजिताशरद्विषे ॥ मन्त्रपुष्पम् ॥ मन्दाकिनीसमुद्भूतकाञ्चनाब्जस्रजा विभो । संमानिताय शक्रेण स्वर्णपुष्पं ददामिते ॥ स्वर्णपुष्पम् ॥ चराचरं व्याप्नुवन्तमपि त्वां रघुनन्दन । प्रदक्षिणं करोम्यद्य मदग्रे मूर्तिसंयुतम् ॥ प्रदक्षिणानि ॥ साङ्गोपाङ्गाय साराय जगतां सनकादिभिः । वन्दिताय वरेण्याय राघवाय नमो नमः ॥ नमस्कारान् ॥ एकातपत्रच्छायायां शासिताशेषभूमिक । मम च्छत्रमिदं रत्नजालकं राम गृह्यताम् ॥ छत्रम् ॥ रक्षोराजानुजाभ्यां ते कृतं चामरसेवया । वीजयेऽहं कराभ्यां ते चामरद्वयमादरात् ॥ चामरयुग्मम् ॥ रामायणं

साधु गीतं सुताभ्यां श्रुतवानसि । मयाऽपि गीयमानं ते स्तोत्रं चित्ताय रोचताम् ॥ गीतम् ॥ वीणावेणुमृदङ्गादि-वाद्यै स्त्वां प्रीणयाम्यहम् । मददंभाहङ्कृतीनां नाशको भव राघव ॥ वाद्यम् ॥ आरुह्य सीतया सार्द्धं दत्तामान्दोळिकां मया । विभाहि भूषितो राम मत्कृते पूजनोत्सवे ॥ आन्दोळि-काम् ॥ मया कल्पितपल्याणं महान्तं मम घोटकम् । मदंसे चरणं न्यस्य मुदाऽऽरोह रघूत्तम ॥ अश्वारोहणम् ॥ गजेन महताऽऽयान्त माकांक्षन्ति स्म नागराः । द्रष्टुं त्वां मद्भजे भाहि दृष्ट्वा नन्देयमप्यहम् ॥ गजारोहणं समर्पयामि ॥ इति समस्तराजोपचार देवोपचार पूजां समर्पयामि ॥

रामा रात्रिञ्चरारराते क्षीरमद्धाज्यकल्पितम् । पूजान्ते ऽघ्र्यं मया दत्तं स्वीकृत्य वरदोभव ॥ पूजान्ते पुनरर्घ्यम् ॥ मनसा वचसा कायेनागसां शतमन्वहम् । धियाऽधिया च रच-ये क्षमस्व सहजक्षम ॥ अपराधक्षमापणम् ॥

त्वमक्षरोऽसि भगवन् व्यक्ताव्यक्तस्वरूपधृत् ।
यथा त्वं रावणं हत्वा यज्ञविघ्नकरं खलम् ॥
लोकान् रक्षितवान् राम तथा मन्मानसाश्रयम् ।
रजस्तमश्च निर्हृत्य त्वत्पूजालस्यकारकम् ॥
सत्वमुद्रेकय विभो त्वत्पूजादरासिद्धये ॥
विभूतिं वर्धय गृहे पुत्रपौत्राभिवृद्धिकृत् ।
कल्याणं कुरु मे नित्यं कैवल्यं दिश चान्ततः ॥

विधितोऽविधितो वाऽपि या पूजा क्रियते मया ।
तां त्वं सन्तुष्टहृदयो यथावद्विहितामिव ॥
स्वीकृत्य परमेशान मात्रा मे सह सीतया ।
लक्ष्मणादिभिरप्यत्र प्रसादं कुरु मे सदा ॥

इति पूजान्ते साञ्जलिबन्धं प्रार्थ्य पुनः प्रणमेत् । अथोपायनदानं कुर्यात् ॥

इदं पूजाविधानं पुनर्वसुनक्षत्रादिने आवश्यकम् । अन्यदात्वैच्छिकम् ॥

॥ इति श्रीरामपटलगगतम् ॥
॥ श्रीरामपूजाविधानं संपूर्णम् ॥

॥ श्रीः ॥

॥ अथ श्रीमत्सुन्दरकाण्डसप्तसर्गी ॥

॥ पारायणारंभ सङ्कल्पप्रकारः ॥

–नक्षत्रे–राशौ–लग्ने जातस्य–गोत्रस्य–सूत्रस्य मम सहकुटुंबस्य हनुमत्परिसेवितश्रीसीतारामचन्द्रयोः प्रसादेन चिन्तितसकलमनोरथावाप्त्यर्थं आगतागामिष्यत्सकलविघारिष्टनिवृत्त्यर्थं इह जन्मनि अतीतेषु बहुषु जन्मसु च मया बुद्धिपूर्वकमबुद्धिपूर्वकं च सकृदसकृद्वा विरचितानां अभ्यस्तानां वा अकृतप्रायश्चित्तत्वेन दुःखरूपफलप्रदानायोद्यतानां पुत्रप्रतिबन्ध

संपत्प्रतिबन्ध विद्याप्रतिबन्ध सौभाग्यप्रतिबन्ध ज्ञानप्रतिबन्धादिक्लेशावहानां पापानां सद्योविनाशद्वारा मम तत्तत्सिध्यर्थं सिद्धानां च स्थैर्यसिध्या सुखावाप्त्यर्थं प्रारप्स्यमानफलानां च मूलतो निवृत्त्यर्थं श्रीरामदास्यैकरुचेर्धर्मात्मनः श्रीहनुमतश्चरित्रवर्णनमहनीयस्य, चिन्तितसकलाभीष्टदाननिरतस्य, सनकादिभिर्ब्रह्मसभायां जोघुष्यमाणस्य, सुखेन मायातरणोपायं पृष्टैः नारदादिभिस्सुमन्तुप्रभृतिभ्यः उपदिश्यमानहनूमत्समुद्रतरणसर्गस्य, भूम्यन्तरिक्षचरभूतवेताळादिपीडानिवृत्तये भूमिगतपुरन्ध्रीभ्यः प्रोच्यमानलङ्काविजयघट्टश्रवणस्य, प्रारब्धवशान्मतिजाड्यमुपगतेभ्यः तन्निरसनाय प्रस्तूयमानहनुमच्चिन्ताप्रकारघट्टस्य, कामादिपरवशत्वेन पारदारिकतां आपन्नैः पश्चात् पश्चात्तापाभिभूतैः पुरन्दरप्रभृतिभिर्गुरुप्रभृतिभ्यः ज्ञायमानहनुमत्कृतरावणान्तःपुरविचयनघट्टपठनस्य, चिराद्वारिद्याभितप्तानां दर्दुरदमप्रभृतीनां कमलाकटाक्षसिध्यर्थं कठप्रभृतिभिरुपादिश्यमानहनुमत्कृतसीतादर्शनसर्गपठनस्य, दुःस्वप्नदुःखोपशान्तये दमशमादिनिरतैरपि परिपठ्यमानत्रिजटास्वप्नदर्शनसर्गस्य, बहुविधविलासविलसितरजस्तमोविलयनपुरस्सरं शुद्धसत्वसमुद्रेकसिध्यर्थं सुतलनिवासिभिः परिपठ्यमानसीतारावणसंवादस्य, विश्लिष्टबन्धुजनसंश्लेषकामुकैः कात्यायनप्रभृतिभिः सततमनुसन्धीयमानजानकीहनुमत्संवादघट्टस्य, अतर्कितागतमहाविपदुत्तरणार्थं अमरगणैरनुदिनं पठ्यमानरामाङ्गुळीयकप्रदानघट्टस्य, कामतोऽकामतश्च अनुसवनमाचर्यमाणानां

विहितातिक्रमाविहिताचरणानां मूलतो विनाशपुरस्सरं भगवत्कारुण्यप्राप्तिमभिलषद्भिः प्रातःपरिपठनीयकाकानुग्रहकथासर्गस्य, अनश्वरानुगतपरमानन्दप्राप्तिकामैः पठनश्रवणपूजादिभिराराध्यमानचूडामणिप्रदानघट्टस्य शत्रुविजयार्थिभिश्चश्वदभिधीयमानराक्षसवधवृत्तान्तस्य, दशविधधर्माभिवृद्धिप्रद दशाननाञ्जनेयसंवादसर्गपठनश्रवणस्य, स्थिरतरगृहारामाद्यभिवृद्धिकामैः श्रोतव्यलङ्कादहनघट्टस्य, ब्रह्मलोकप्राप्तिप्रत्यूहाय क्षुत्पिपासादिशारीरव्यथापनोदनार्थं मुनिवरानुगीयमानमधुवनभञ्जनप्रकरणस्य, सकलविधैहिकामुष्मिकफलप्रदानपररामहनुमत्संवादस्य, धर्माभिलाषिभिः पठनीयसमुद्रतीरस्थवानरोद्देश्यकहनुमत्प्रोक्तस्ववृत्तान्तकस्य, अर्थेप्सुभिर्ध्यानपुरस्सरं पठनीयाशोकवनिकाभञ्जनघट्टस्य, भूतवेताळादिपीडानिवृत्तये पठनीय सीतारक्षकराक्षसीवृन्दवर्णनस्य, मुमुक्षुभिरनुसन्धेयसीतावर्णनसर्गकस्य, सर्वावस्थासु शुभास्वशुभास्वपि पठनश्रवणपूजनाभिवन्दनादिकर्तृभ्यः चतुर्विधपुरुषार्थप्रदानशौण्डस्य, श्रीमद्वाल्मीकिमुखारविन्दात् सरस्वत्या स्वयमेव निर्गत्य निर्मितपदपदार्थगुम्भक श्रीमद्रामायणाख्यमहनीय वेदसारभूतस्य, श्रीमत्सुन्दरकाण्डस्य पठनश्रवणाभ्यां मम सकलविघमनोरथप्रतिबन्धनिवृत्तिद्वारा अभीप्सितार्थसिध्यर्थं ब्रह्मणा नारदायोपदिष्टेषु श्रीरामायणकाम्यपाठोक्तरीत्या सुवर्ण [रजत–ताम्र] परिकल्पितसीतालक्ष्मणहनुमत्समेत श्रीरामचन्द्रप्रतिमासान्निधौ सप्तसर्गपारायणं करिष्ये । तदङ्गं मम सकलविघबाह्याभ्यन्तर-

तापनिवृत्त्यर्थं त्वक्चर्ममांसास्थिगतसकलविधरोगपरिहारद्वारा क्षिप्रारोग्यसिध्यर्थं वेदोक्तायुस्सिध्यर्थं अपमृत्युनिवारणार्थं श्रीरामायणे नित्यकृतसान्निध्यस्य श्रीरामचन्द्रस्य रामायणकोशोपरि यथाशक्ति षोडशोपचारपूजां करिष्ये । इति सङ्कल्प्य पूजान्ते पठेत् । पठनान्ते पुनः यथाशक्ति पूजयेत् ॥ एवं अष्टषष्ट्या दिनैः पारायणं समाप्य श्रीरामपट्टाभिषेकसर्गं पठित्वा महोत्सवं कुर्यात् । ततः प्रतिमादानं कृत्वा अष्टषष्टिं ब्राह्मणान् तदर्धं तदर्धं वा भोजयेत् । पाठक्रमप्राप्तेषु हनुमत्कृतसीतादर्शन रामाङ्गुळीयकप्रदान हनुमत्कृतचूडामणिप्रदानघट्टेषु शर्करामिश्रितप्तक्षीरानिवेदनं कुर्यात् ॥ श्रीरामपट्टाभिषेकसङ्कल्पश्च वक्ष्यत इति । ॐ शुभम् ॥

॥ इति सुन्दरकाण्ड सप्तसर्गीपारायण प्रकारः ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीरामपट्टाभिषेकप्रयोगः सङ्कल्पश्च ॥

देशकालौ सङ्कीर्त्य— नक्षत्रे— राशौ— लग्ने— गोत्रे— सूत्रे जातस्य— शर्मणः मम जन्मलग्नवशात् सव्यचक्रीत्या उडुदशाव्यवहारेण वर्तमानवर्तिष्यमाण दशान्तर्दशाभिः क्रूरग्रहपापग्रहप्रयुक्ताभिः प्रयुक्तानां बाह्याभ्यन्तरतापप्रदानां त्वक्चर्ममांसास्थिगतरोगाणां अतर्कितापदां आत्मात्मीयादिपीडाचिन्तनाख्यानामाधीनां च प्रारब्धफलेन कर्मणा कल्पितानामपि

निवृत्तिद्वारा मम शिघ्रारोग्य मनःप्रसाद कुटुम्बवृद्धि परमस्वास्थ्यादिसिध्यर्थं ब्रह्मणा नारदायोपदिष्टां रीतिमनुसृत्य दाल्भ्येन युधिष्ठिरायोक्तप्रकारेण श्रीमद्रामायणकाम्यपाठकक्ष्यायां अतीते पुनर्वसुदिने समारब्धस्यअद्य पुनर्वसुदिने समापयिष्यमाणस्य (नित्यपाठे आदितः श्रीनारदोपदिष्टसर्गमारभ्य मया यथाक्रमं पठितस्य अद्यास्मिन् शुभदिने समापयिष्यमाणस्य) श्रीमता हनुहता नित्यमेव पठन श्रवणाभ्यामाराध्यमानस्य ब्रह्मलोकप्रसिद्ध शतकोटिग्रन्थविस्तरस्य सनकादिभिर्ब्रह्मर्षिसभायां जोघुष्यमाणस्य श्रीमद्रामतापन्यादि श्रुत्युपबृंहणरूपस्य आश्रितजनकल्पतरोः भूमिष्ठमन्दप्रज्ञजनानुजिघृक्षया ब्रह्मणो निदेशेन श्रीमद्वाल्मीकिवदनादाविर्भूय वाग्देव्या स्यवमेव गुम्भितपदपदार्थजातस्य धर्मार्थकाममोक्षाख्य चतुर्विधपुरुषार्थप्रदानशौण्डस्य विशेषतोधर्मसंस्थापनार्थमवतीर्णस्य रामात्मनः परब्रह्मणः चरित्रवर्णनेन महनीयस्य सकृदपि पठनश्रवणाभ्यां पुत्रपौत्राभिवृद्धिप्रदेन|श्रीमद्बालकाण्डेन, सत्यशौचादिधर्माभिवृद्धिप्रदेन श्रीमदयोध्याकाण्डेन, विश्लिष्टबन्धुमित्रादिसंश्लेषकारिणा श्रीमदरण्यकाण्डेन, बाह्याभ्यन्तरप्रीतिपुरस्कृतसत्सौहृद-द्वारा चित्तशुद्धिजनकेन श्रीमत्किष्किन्धाकाण्डेन, चिन्तितसकलमनोरथार्पणप्रकाण्डेन श्रीमत्सुन्दरकाण्डेन, भगवच्छरणागतिप्रवृत्तिकारिणा सकलविधबाह्याभ्यन्तरशत्रुविजयकारिणा च|श्रीमद्युद्धकाण्डेन, एवं षड्भिः काण्डैस्संपूर्णस्य सान्तानिकलोके नित्यमभिगीयमानस्य श्रीमद्रामायणाख्यप्रबन्धरत्नस्य मया

(ब्राह्मणमुखेन) पठितस्य मामुद्दिश्य सर्वाभीष्टप्रदानोन्मुखता-सिध्यर्थं तादृशश्रीरामायणप्रतिपाद्यस्य रामाख्यस्य परस्य ब्रह्मणः चरणकमलयोः अचञ्चलानवरतबाह्याभ्यन्तरभक्तियोग-सिध्यर्थं अद्य करिष्यमाण श्रीरामपट्टाभिषेकोत्सवपूर्वाङ्गतया (श्रीरामायणकोशोपरि) श्रीरामप्रतिमायां करणत्रयावधानपुर-स्सरं पूजाविधानाय मया. परिकल्पितस्य विनष्टश्रीपुनःप्रा-प्तिहेतुभूतचित्ररङ्गवल्लीसमलङ्कृतस्य विधिविधानातिक्रमस-ञ्जातकोपपरिवारदेवताप्रसादककदलीस्तम्भसंवृतस्य त्वगास्थि-रोमरुधिरादिगतसकलविधरोगाभिशमनफलकक्रमुकफलपूगप -रिबृंहितस्य चिन्तितसकलविधैहिकामुष्मिकफलप्राप्तिहेतुभू-त नारिकेळफलपरिकर्मितस्य भूम्यन्तरिक्षचरभूतवेताळादिपी-डानिवारक विचित्रतरवितानपरिशोभितस्य मनुष्यतिर्यंगाद्या-धिपत्यप्राप्तिहेतुभूतमध्यगतमणिवेदिकामहितस्य श्रीपट्टाभिषे-कमण्टपस्य मध्ये मणिमयदिव्यसिंहासने स्थापितस्य (तायाः श्रीरामप्रतिमायाः) श्रीरामायणग्रन्थस्य पूजया मम सर्वाभीष्ट-सिध्यर्थं

(१) सन्यस्तविषयैरपि वनवासिभिर्मुनिगणैः पुनर्गर्भवास-प्राप्तिभीतैः तद्दुःखप्रहाणार्थं कीर्त्यमानकल्याणतरकौसल्यागर्भ-वासवैभवस्य,

(२) महता तपसा प्राप्तस्वर्गसुखानुभवैरपि पुनःपतनज-ननमरणक्लेशजातमनुचिन्त्य विषण्णैः कर्मदेवैः तदुच्छित्तये ध्यानकर्मीक्रियमाणजायमानावस्थकस्य,

(३) सुन्दोपसुन्दादिचरित्रानुचिन्तया सौभ्रात्रभङ्गभीतैः पाण्डवप्रमुखैस्तन्निवृत्त्यर्थं सन्ततामिपूज्यमानलक्ष्मणसहभोजनसहशयनादिपरावसरस्य,

(४) शिष्यगतवैमनस्यादिदोषनिवारणार्थं तेभ्यो गुरुभिरुपदिश्यमानविश्वामित्रानुगमनावसरस्य,

(५) भूतवेताळब्रह्मराक्षसादिग्रहगणभूयिष्ठवनसञ्चारवेळायां विदितवेदितव्यमुनिजनानुसन्धीयमान ताटकावधसमुपजातवीरश्रीसमालिङ्गितविग्रहस्य,

(६) ब्रह्मसभायां सकललोकगुरोः प्रसादं चिरं प्रतिपालयद्भि र्जिज्ञासुभि र्मुनीन्द्रैः तादृशमनोरथपूरणार्थं अनुचिन्त्यमान विश्वामित्राध्वररक्षणावसरस्य,

(७) अतीतेषु बहुषु जन्मसु कृतानां अवश्यमेवानुभवितव्यानां महतामेनसां विनाशपुरस्सरं ब्रह्मज्ञानाधिगमकाङ्क्षया महर्षिगणैर्मानितमुनिवधूशापविमोचनावसरस्य,

(८) नित्यश्रीनित्यमङ्गळकामैः पुरन्दरप्रभृतिभिः पुरतोऽनुक्षणभाव्यमानसीतापाणिग्रहपरस्वरूपस्य,

(९) अजस्रं वियति विमानचारिभिर्गन्धर्वविद्याधरादिभिर्मध्येपथि राक्षसदानवबलाभिभवचकितैर्मनसा वचसा शिरसा च सतताभिवन्द्यमानभार्गवभङ्गस्फुरद्दिव्यतेजस्संपूर्णमूर्तिकस्य,

(१०) चिरकालतपसापि तपसा अनासादितभगवत्साक्षात्कारैः तादृशमनोरथसिद्धये तपोलोकनिवासिभिः स्मर्यमाण-

सुमन्त्रानुग्रहपरसीतासेवितावसरस्य,

(११) स्वदोषवशात् भगवन्मायया विमोहिताधिया कुधूम्रमुनिना तन्निरसनार्थं चिन्तिततमसातीरगतपौरविमोहनावसरस्य,

(१२) श्रवणमननध्यानसमाधिपूजनवन्दनादिसाधनहीनैरपि गुरूपदेशवशतः पश्चात्तापतापितैः पन्नगेन्द्रैः परिणूयमानगुहालिङ्गनावसरस्य,

(१३) परमेष्ठिपदस्थिरताभिलाषिभिः परमर्षीभिः परिचिन्त्यमानचित्रकूटप्रतिष्ठितविग्रहस्य,

(१४) यत्किञ्चिदपि दत्त्वा ज्ञानकर्मभक्तिविहीनैरपि मुनिगणविदिततत्त्वैः कैश्चन दनुजैः नमस्यमानानसूयाङ्गरागाङ्कितसीतासाहित्यद्योतमानतरविग्रहस्य,

(१५) शापान्महीङ्गतैः पुनरपि स्वर्गमारुरुक्षुभिर्देवैस्सततार्च्यमानविराधवधजनितवीरलक्ष्मीविराजमानविग्रहस्य,

(१६) यथावदनुष्ठितसन्न्यासाश्रमैः प्राप्तब्रह्मपदैरपि परमपदलिप्सया परिचिन्तित शरभङ्गानुग्रहपरविग्रहस्य,

(१७) कदाचिदपि स्वावासे भगवत आविर्भावमभिलषद्भिः कर्मठैराराध्यमानकुम्भसम्भवसम्भाव्यमानमूर्तिकस्य,

(१८) चिरकालसञ्चिततपःपरितुष्टपरमपुरुषप्रसादाधिगतपरमपदैरपि गरुडविष्वक्सेनादिभिः तत्तादृशसाधनहीनानामपि स्वाराधकानां मुक्तिहेतोस्सततताभिराध्यमानजटायुर्मोक्षप्रदानावसरस्य,

(१९) कलिकलुषमानसतया यथावदाराधनापटुभिरपि भगवत्पदाभिलाषिभिः कपिलाश्वत्थामादिभि राराध्यमानशर्मानुग्रहकरमूर्तेः,

(२०) अप्रतिहतभगवद्दास्याभिरुचिभिरपि तदलाभात् खिद्यमानैरमरैरभिपूज्यमान हनुमत्प्रथमसेवार्पणावसरस्य,

(२१) सकललोकाभयार्पणपरभगवदमृतहस्तस्पर्शाभिलाषिहृदयैः भरतप्रमुखैर्भागवताशिरोमणिभिः भाव्यमानसुग्रीवसख्यकरमूर्तिकस्य,

(२२) परमापराधिनाऽपि परमपदाभिलाषिणा पाताळतलनिवासिना बलिना बलिकर्मीक्रियमाणवालिनिग्रहपरविग्रहस्य,

(२३) वेदशास्त्रविहिताध्वना भगवदाराधनाशक्तैर्विगलितेन्द्रियशक्तिभिर्विपिनगतैर्वृद्धैर्नरेन्द्रैर्भगवत्प्रसादाय भाव्यमानलङ्कानिवृत्तहनुमत्समर्पितकरुणाकटाक्षकविग्रहस्य,

(२४) खाण्डववनदहनपारिजातापहरणादि कालकृतयुद्धरूपपरमापराधपश्चात्तप्तपुरन्दरपुरस्क्रियमाणकाकानुग्रहावसरस्य,

(२५) प्रपदनपरैरप्यप्राप्तभगवत्प्रसादैः पाञ्चरात्रिकैः पूज्यमानविभीषणाभयार्पणावसरस्य,

(२६) संसारासारबुद्ध्या वनमुपगतैर्वानप्रस्थवृत्तिभिः क्षत्रियैः तन्निवृत्तिहेतुत्वेन महीयमानसेतुबन्धनावसरस्य,

(२७) संग्रामविजयैषिभिस्सुरासुरैस्सततामिपूज्यमान दशाननविजयसमयसञ्जातवीरश्रीसमालिङ्गितमूर्तिकस्य,

(२८) तत्त्वजिज्ञासुभिरपि तारार्थावगमविधुरैः तपोमात्रशरणै र्योगिभिराराध्यमानब्रह्मादिस्तुतिविषयीभूतविग्रहस्य,-

(२९) सकललोकस्वेच्छासञ्चाराभिलाषिभिस्सुतलादिनिवासिभिः सुतरामर्च्यमानपुष्पकस्थितमूर्तिकस्य,

(३०) अचञ्चलमहाप्रतिष्ठाकामैः रागद्वेषादिदोषग्रहाणपुरस्सरं पुरुहूतप्रमुखैः पुरश्चरणपात्रीक्रियमाण पट्टाभिषेकमहोत्सवसमयसमुल्लसच्चिन्मुद्राङ्कितविग्रहस्य,

एवं सकलेष्वपि लोकेषु सकलेष्वपि कालेषु सर्वास्वप्यवस्थासु हिताभिलाषिभिरहितापनोदनकामैश्च पूजिततत्तदवसरस्य तत्तद्विग्रहाराधकेभ्यस्तत्तत्कामप्रदाननिरतस्य, भगवतः श्रीरघुनन्दनस्य दिव्यतरचित्रचरित्राभिवर्णनपरस्य श्रीरामायणाख्यस्य वेदस्य मया यथाशक्ति कृतैः पठनश्रवणपूजनवन्दनस्तवनादिभिः मम पूर्वोक्त तत्तन्मूर्त्याराधकप्राप्य तत्तन्मनोरथसिध्यर्थं श्रीरामायणस्थ श्रीरामचन्द्रपट्टाभिषेकसर्गपठन प्रवचनपुरस्सरं श्रीरामचन्द्रपट्टाभिषेकमहोत्सवं करिष्ये । तदङ्गं [श्रीरामप्रतिमायां मया प्रतिष्ठापितायां] श्रीरामायणे कृतसान्निध्यस्य श्रीरामचन्द्रस्य यथाशक्ति यथासम्भवं च षोडशोपचारपूजां करिष्ये——

इति सङ्कल्प्य– यथाशक्ति सम्भवन्त्या सामग्र्या पुरुषसूक्तविधानेन कल्पोक्तविधानेन वा श्रीरामायणकोशे (श्रीरामप्रतिमायां च) पूजां विधाय शिरस्यञ्जलिमाधायेत्यादि वसवो-

वासवं यथेत्यन्तं पठित्वा पुनः पायसापूपादिभक्ष्यभोज्यादि-निवेदनं कृत्वा पूजयेत् । ततस्सर्गशेषं पठित्वा पुनरपि पूजयित्वा नीराजनमवश्यं कुर्यात् । तथा च रामरहस्ये— 'पठनान्ते तु रामस्य श्रीरामायणपुस्तके । पूजानिवेदनं कुर्यात् नीराजनमवश्यकम् ॥ नीराजने कृते रामो मन्त्रूनः क्षमते बहून् । पठने नियमभ्रंशं वर्णमात्रान्यथाकृतिम् ॥ मुखोच्छिष्टादि संस्पर्शं चित्तेन्द्रियमलादि च' इति ॥

अथ पुनर्वसुपारायणविषये प्रतिमायां विष्णोर्नामसहस्रेण श्रीराममभ्यर्च्य प्रतिमाया भगवन्तमुद्वासयेत् । ततस्सङ्कल्पपुरस्सरं प्रतिमादानम् । तस्यायं मन्त्रः—

'साङ्गोपाङ्ग रघूत्तंस राम रात्रिञ्चरान्तक । त्वन्मूर्तिंप्रतिमां दास्ये कल्पोक्तं देहि मे फलम्' ॥ ततो द्रव्याणां पृथक् पृथक् प्रदानम् । सत्यावश्यकत्वे द्रव्यदानानन्तरं नवग्रहद्रव्याणामपि तत्तद्ग्रहप्रसादाभिकाङ्क्षापुरस्सरं दानं कुर्यात् ॥

अथ ब्राह्मणभोजनमुक्तं रामरहस्ये— 'सर्गाणां विंशतिं नित्यं पठित्वाऽथ पुनर्वसौ । षड्वाभिषेकं रामस्य कुर्याद्वाद्यादिभिस्सह ॥ ब्राह्मणान् भोजयेन्मृष्टै रन्नैर्मध्वाज्यसंयुतैः । ब्राह्मणानां सप्तशतं तदर्धं वा तदर्द्धकम् ॥ भोजयेन्नकदाचित्तु न्यूनं स्यात् सप्तविंशतेः' ॥ अशक्तस्तु द्विजान् यावच्छक्ति सप्तावरान् वरान् । भोजयित्वा षड्साढ्ये नान्नेन सहदक्षिणम् ॥ नित्यपारायणे काण्डमारभेतोत्तरं ततः । अथ तस्मिन् पठ्यमा-

ने कतिचित्सर्गशेषके ॥ बालकाण्डं समारभ्य श्रीरामजनिसर्गकम् । समाप्तिं चोत्तराख्यस्य काण्डस्यैकादिने पठेत् ॥

पुनर्वसुपारायणविषये तत्रैव– 'ततस्सायं यथापूर्वं सर्गांस्तु पठितान् अग्रे । प्रवाच्यभाक्तितो दद्याद्वस्त्रालङ्करणादिकम् ॥ वक्त्रे पठित्रे कनकदीनारांश्च समर्पयेत् । प्रवर्तकेभ्यः श्रोतृभ्यस्साक्षिभ्योऽपि यथारुचि ॥ दत्वा वस्त्रादिकं रामभक्तानां विदुषामपि । कुर्यात् संमाननं भक्त्या मत्वा रामाकृतीनमून् ॥ एवं कृतेतु सर्वार्थसिद्धिस्स्याद्राघवप्रभोः । अनुग्रहेण सर्वेषां भूयान्नित्यं च मङ्गळम् ॥

इति श्रीरामरहस्योक्तः श्रीरामपट्टाभिषेकविधिः
संपूर्णः ॥

॥ श्रीः ॥

॥ अथ वाराहोक्तः ॥

॥ रामलक्ष्मणप्रतिमादानविधिः ॥

पवित्रपाणिः प्राणानायम्य देशकालौ सङ्कीर्त्य— नक्षत्रे– राशौ— लग्ने जातस्य— शर्मणः मम— नक्षत्रे— राशौ— लग्ने जातायाः— नाम्न्याः अस्या मम धर्मपत्न्याश्च जन्मलग्नचन्द्रलग्नांशलग्नवशात् आदित्यादिनवग्रहाणां मध्ये ये ये दुःस्थानाधिपत्य दुष्टग्रहयोगादिप्रयुक्तपापत्वदुष्टाः ये च निसर्गतः

पापाः तेषां शुभफलप्रदातृत्वसिध्यर्थं आवयोर्जन्मलग्नवशात् सव्यचक्रीत्या उडुदशाव्यवहारेण वर्तमान वर्तिष्यमाणदशान्तर्दशान्तरसूक्ष्मादीनां पापग्रहकृतानामपि शुभफलप्राप्त्यर्थं मम अथवा अस्या मम धर्मपत्न्याः (अत्र स्वजन्मपात्रिकावशेन स्थितं पुत्रप्रतिबन्धदोषमुदाहरेत्,) ग्रहप्रीत्या आयुष्मत् सुगुण-पुत्रप्राप्त्यर्थं मया इह जन्मनि अतीतेषु च बहुषु जन्मसु बुद्धिपूर्वकमबुद्धिपूर्वकं च सकृदसकृच्च विहितानां पापानां मध्ये इदानीमेतज्जन्मनि प्रारब्धफलानां निर्वीर्यतासिध्यर्थं प्रारप्स्यमानफलानां मूलतो विनाशार्थं च सहशयनसहभोजनादिभिः नित्यानुगतेन घोरतरकाननगमनावस्थायां कळत्रादिसकलभोगपरिहाणपुरस्सरं सकलविधपरिचर्यापरेण निखिलराक्षसवधमहायज्ञे मुख्यतममेघनादवधकृतार्त्विज्येन दुःखकाले समाश्वासनपरेण सुखकाले परमानन्दमग्नेन बहिश्चरप्राणतया अभ्युपगतेन लक्ष्मणेनानुगतस्य, नित्यानपायिवक्षःस्थलस्थितलक्ष्मीकस्य, सुग्रीवविभीषणाभ्यां वितीर्णदुर्लभतरराज्यकस्य, कुधूम्रमुनये समुपदिष्टमायातरणोपायस्य, त्रिजटमुनये दत्तबहुतरगोधनस्य, सप्तसु जन्मसु पुत्रमुखदर्शनसुखार्थं कृतदुष्करतरतपोभ्यामपि अप्राप्तमनोरथाभ्यां अष्टमे जन्मनि नारदोपदेशात् निकटस्थसमन्दहसितकौसल्यासमासेवितदशरथाङ्कस्थित्यवसरक स्वमूर्तिमाराधयद्भ्यां सुमतिसुशर्मनामधेयाभ्यां विप्रदम्पतिभ्यां वितीर्णविविधागमपारगपुत्रद्वयस्य, निषादायापि कालत्रयकृतवन्दनाय गुहाय सख्यकरणपुरस्सरं विश्राणितसंपूर्णमहासम्पदः,

श्रीरामतापिन्यादिश्रुत्युपबृंहणरूप श्रीरामायणाख्यवेदप्रतिपाद्यस्य पूर्वजन्मकृतबहुतरतपस्सञ्जातदास्याख्यभक्तिकाय हनुमते गाढालिङ्गनदानेन प्रकटीकृतभक्तवात्सल्यस्य, सकृत्स्मरणनमनकीर्तनादिभिस्सर्वार्थप्रदाननिरतस्य, दीनदयापरमानसस्य, आश्रितजनकल्पतरोः, श्रीरामचन्द्रस्य प्रसादेन आवयोः निखिलविधचिन्तिताचिन्तितविपत्प्रतीकारद्वारा सकलविधैहिकामुष्मिकसुखप्राप्त्यर्थं तच्चरणनलिनयोः अचञ्चलानवरतबहुळतरभक्तिसिध्यर्थं हेमाद्रयनूदितवाराहपुराणप्रदर्शितप्रकारेण सम्भवता द्रव्येण सम्भवन्त्या दक्षिणया सम्भवद्भिरमीभिः ऋत्विग्भिश्च आवयोरायुष्मत्सुगुणपुत्रसम्भवद्वारा आचन्द्रार्कमस्मद्वंशाभिवृध्यर्थं श्रीरामलक्ष्मणप्रतिमादानाख्यं कर्मकरिष्ये । इति संकल्पः । अथ पलमात्रसुवर्णेन निर्मितं प्रतिमाद्वयमपि पञ्चगव्ये मज्जयेत् ॥

अथ तण्डुलोपरि गङ्गादिजलपूरितं कुम्भं निधाय वरुणमावाह्य संपूज्य— इदानीं दानार्थं तदङ्गभूतपूजार्थं च मया प्रतिष्ठाप्यमानरामलक्ष्मणप्रतिमयोरेतत्कुम्भस्थजलस्याभिषेकयोग्यतासिध्यर्थं प्रतिमयोर्भूधातुसम्बन्धवशात् कारुशिल्पसम्बन्धवशाच्च सञ्जाताशुद्धिनिवृत्तिद्वारा पूजायोग्यतासिध्यर्थं एभिश्चतुर्दिक्षु स्थितैः ब्राह्मणैः शुद्धिजपकर्म करिष्ये इति सङ्कल्प्य, शुद्धिजपार्थं ऋत्विजो वृत्वा शुद्धिजपकर्म कुरुद्वमिति ब्राह्मणान् प्रार्थयेत् । ब्राह्मणाश्च दधिक्राव्णः, हिरण्यवर्णाः, पवमानस्सुवर्जनः, हिरण्यशृङ्गं, वरुणसूक्तं, विष्णुसूक्तं, पञ्च-

शान्तीश्च जपेयुः । जपान्ते वरुणमुद्वास्य तत्तीर्थोदकेन समां-शक्षीरमिश्रेण प्रतिमाद्वयमभिषिञ्चेत् । तत्काले रुद्राध्यायः, चमकं, पुरुषसूक्तं, श्रीसूक्तं, भूसूक्तं च, जप्तव्यानि ॥ ततः प्रस्थमात्रधान्योपरि तावन्मिततण्डुलान् प्रसार्य तदुपरि अष्टा-दशपलनिर्मितं ("Palam" means 6 Tolas) कांस्यामत्रं तण्डु-लेन वा पुत्रप्रतिबन्धकग्रहधान्येन वा पूरयित्वा तत्पात्रं पीत-पट्टवस्त्रेणाच्छाद्य तत्र नवावरणरामयन्त्रं विलिख्य तत्र प्रति-माद्वयं निधाय प्राणप्रतिष्ठां कृत्वा गुडान्नं निवेद्य पुरुषसूक्तवि-धानेन कल्पोक्तविधानेन वा षोडशोपचारपूजां कुर्यात् । वि-ष्णोर्नामसहस्रेण पद्मैस्तुळसीदळैर्वा सर्वैर्वा अन्यैर्वा कुसुमैः श्वेतैः यथालाभं अर्चयेत् ॥

तत्र पूजान्ते प्रार्थना—

राम राम महाबाहो कौसल्यानन्दवर्धन । पूजामिमां गृहीत्वा मे यथेष्टफलदो भव ॥ सौमित्रे लोकसौमित्रे सर्वपाप-हराव्यय । छिन्धि मे सकलं पापं पुत्रं देहि सुवर्चसम् ॥ इति ॥

ततः उद्वासनं कृत्वा दानं कुर्यात् ॥

यजमानः पूर्वाभिमुखः उत्तराभिमुखं पत्नीपुत्रादिकुटु-म्बिनं वेदवेदाङ्गपारगं श्रीरामभक्तं चन्दनपुष्पमालिकावस्त्रादि-भिरभ्यर्च्य पत्न्या अन्वारब्धः वामेन पाणिना कांस्यपात्रं द-क्षिणेन पत्नीदत्ततीर्थसहितदक्षिणाताम्बूलं च धृत्वा 'अमत्रं सर्वपापघ्नं पुत्रप्रदमपुत्रिणाम् । यथोक्तकांस्यसम्भूतं ददे शान्ति प्रयच्छमे' इति दद्यात् ॥ इति कांस्यपात्रदानम् ॥

अथ रामप्रतिमादानम् ॥

अयोध्याधिपते वीर श्रीराम करुणानिधे । पूर्वजन्मसमुद्भूतं इह जन्मनि चोद्भवम् ॥ पापं मे विलयं यातु त्वत्प्रसादाज्जगद्गुरो । राम त्वामहमभ्यर्च्य सर्वपापापनुत्तये ॥ दास्यामि विप्रवर्याय सर्वश्रेयोभिवृद्धये । अनया पूजया स्वामिन् प्रसन्नो भव मे सदा ॥ पुत्रं देहि यशो देहि श्रियं देहि जनार्दन । अनेन दानवर्येण वंशवृद्धिकरो भव ॥ सर्वपापहरो यस्मादतश्शान्तिं प्रयच्छ मे ॥ इति पूर्वोक्तप्रकारेण रामप्रतिमां दद्यात् ॥

अथ लक्ष्मणप्रतिमादानम् ॥

रामानुज जगद्बन्धो गृहीत्वेदं तवार्चनम् । प्रसन्नो भव मे पापं हर पुत्रं प्रयच्छमे ॥ दत्वा त्वन्मूर्तिं ममलां कोदण्डशरमण्डिताम् । दयापरावलोकाश्च विमुक्तोऽस्मीह किल्बिषात् ॥ सर्वपापहरो यस्मा दतश्शान्तिं प्रयच्छ मे ॥

त्रिष्वप्येतेषु दानेषु सुवर्णमेव दक्षिणां निदध्यात् । ब्राह्मणांश्च सुवासिनीश्च दशावरान् भोजयेत् ॥

अथोपसंहारः ॥

अस्मिन्नेवं कृते कार्ये श्रीरामस्य प्रसादतः । ससर्वदुरितान्मुक्तः पुत्रमाप्नोति सर्वथा ॥ दरिद्रो लभते वित्तं ब्रह्मचारी तु कन्यकाम् । सुवासिनी पुत्रकामा पुत्रमाप्नोति सद्गुणम् ॥ मोक्षकामो लभेन्मोक्षं रोगी रोगात् प्रमुच्यते । आषाढपूर्णिमा-

यान्तु श्रेयस्कामैर्मनीषिभिः ॥ यत्र कुत्रापि वा मासे माघ-
वैशाखकार्तिके । द्वादश्यामथवा राजन् कार्यमेतद्व्रतं स्मृतम् ॥

॥ इति वराहपुराणोक्तः रामलक्ष्मणप्रतिमादानविधिः ॥

॥ श्रीरामो जयति ॥

॥ उमासंहितायां रामायणपठनावसरेषु ॥

॥ निवेदनक्रमः ॥

रामायणस्य प्रारम्भे नारिकेळत्रयं शुभम् ।
स्वयन्तु पतितं वृक्षात् समभास्फोट्य चार्पयेत् ॥ १ ॥
श्रीरामजनने प्राप्ते रसखण्डांश्च शर्कराम् ।
शुण्ठीचूर्णसितायुक्तं पयश्च विनिवेदयेत् ॥ २ ॥
सुबाहुमारीचवधे घनीभूतं तु दुग्धकम् ।
वासितं चाग्निशिखतः प्रस्थमात्रं निवेदयेत् ॥ ३ ॥
पायसस्य प्रदाने तु पायसं विनिवेदयेत् ।
वन्ध्या पुत्रं प्रसूयेत ध्रुवं तत्पायसाशनात् ॥ ४ ॥
सीताविवाहे संप्राप्ते भक्ष्यभोज्यादिपेयकम् ।
सर्वं घृतेन चाभ्यज्य दिव्यान्नानि निवेदयेत् ॥ ५ ॥
चतुर्विंशतिविप्रांश्च यथालाभं सुवासिनीः ।
सीताराघवबुध्यैव भोजयेत् भक्तिपूर्वकम् ॥ ६ ॥

सुमन्त्रानुग्रहे प्राप्ते नवनीतं नवोद्धृतम् ।
पृथक्सितां शर्करांच मोदकांश्च निवेदयेत् ॥ ७ ॥
नानाविधफलं यावल्लब्धं गुहसमागमे ।
चित्रकूटं गते रामे दद्याल्लिकुचरसौदनम् ॥ ८ ॥
रामेण चित्रकूटे तु भरतस्य समागमे ।
मोदकान् शतसंख्याका नर्पयेत् घृतपाचितान् ॥ ९ ॥
पादुकाराज्यलाभे तु दाडिमीपनसादिकम् ।
कदळ्यन्तं फलं दद्यात् भोजयेच्च द्विजान् दश ॥ १० ॥
अनसूयासहास्यायां कुसुमं रक्तचन्दनम् ।
अर्पयित्वा पायसं च घृतमिश्रं निवेदयेत् ॥ ११ ॥
सुवासिनीस्तोषयेच्च वस्त्रगन्धादिदानतः ।
खरस्य निधने प्राप्ते शर्करासहितं शुभम् ॥ १२ ॥
नारिकेळान्नमभ्यज्य घृतेन विनिवेदयेत् ।
जटायुर्मोक्षदाने तु मधुद्राक्षाफलं दिशेत् ॥ १३ ॥
शबर्याश्रमसंप्राप्तौ कन्दानि च फलानि च ।
निवेदयेद्यथालाभं विशेषान्मातुलुङ्गकम् ॥ १४ ॥
पंपातीरे हनुमता राघवस्य समागमे ।
माषापूपान् घृते पक्वान् चतुष्पार्श्वं निवेदयेत् ॥ १५ ॥
प्राप्ते वालिवधे पुण्ये वासितं शर्करोदकम् ।
मक्तान् मुद्गकृतान् वाऽपि देवाय विनिवेदयेत् ॥ १६ ॥
राज्याभिषिक्ते सुग्रीवे चणकांस्तैलपाचितान् ।

निवेदयेद्विशेषेण रसालफलमर्पयेत् ॥ १७ ॥
हनूमतस्समुद्रस्य तरणे समुपस्थिते ।
दध्यन्नं व्यञ्जनयुतं नवनीतं च दापयेत् ॥ १८ ॥
हनूमतस्तु जानक्या दर्शने सोपदंशकम् ।
अन्नमम्लरसोपेतं ताम्बूलं च निवेदयेत् ॥ १९ ॥
रामाङ्गुळीयदानेतु गुडान्नं मुद्गसंयुतम् ।
निवेदयेत् घृतेनाक्तं भक्ष्याणि विविधानि च ॥ २० ॥
चूडामणिप्रदानेतु राघवाय हनूमता ।
गोक्षीरं मुद्गखण्डाढ्यं पक्वन्तु विनिवेदयेत् ॥ २१ ॥
विभीषणाय रामेणाभये दत्तेऽम्बुधेस्तटे ।
नारिकेळस्य शुष्कस्य क्षोदं शर्करया युतम् ॥ २२ ॥
दद्याद्विभीषणस्याभिषेकेतु घृतशष्कुलीः ।
नागास्त्रमोक्षणे क्षीरं सद्यो दुग्धं निवेदयेत् ॥ २३ ॥
ब्रह्मास्त्रबन्धनिर्मोक्षे दुग्धे पक्वान् सुवासिते ।
यवगोधूमसक्तूंश्च फलानिच नियेदयेत् ॥ २४ ॥
कुम्भकर्णस्य निधने नारिकेळाम्बु निर्मलम् ।
निवेदयेद्राघवाय लाभे जम्बूफलानि च ॥ २५ ॥
मेघनादस्य निधने स्निग्धं चैव तिलौदनम् ।
सलक्ष्मणाय रामाय दद्याद्दधि च मण्डयुक् ॥ २६ ॥
नाशे मूलबलस्याशे चित्रान्नानि निवेदयेत् ।
आदित्यहृदये पुण्ये गुडान्नं घृतसंयुतम् ॥ २७ ॥

कोमळाञ्चारिकेळांश्च सेक्षुदण्डान्निवेदयेत् ।
रावणस्य वधे सद्यः पक्कान् वासितसर्पिषि ॥ २८ ॥
पञ्चाशदवरान् दद्यात् गुडापूपान्समोदकान् ।
प्रविश्याग्निं यदा सीता समुत्थाय गता पतिम् ॥ २९ ॥
निवेदयेत्तु क्षीरान्नं सप्तं हैयङ्गवीनतः ।
राज्याभिषिक्ते श्रीरामे सर्वं पूर्वोदितं शुभम् ॥ ३० ॥
निवेदयेत् पूजयित्वा वस्त्रमाल्यादिभिः पृथक् ।
भोजयेच्च शतं विप्रान् नारीश्चापि सभर्तृकाः ॥ ३१ ॥
तत्तत्पट्टेषु चोक्तेषु तत्तद्द्रव्येत्वदुर्लभे ।
निवेदयेद्यथालाभं सर्वालाभे दिशेत्फलम् ॥ ३२ ॥
एवं कृते रघुपतिस्सर्वथैव प्रसीदति ।
ददाति काङ्क्षितानर्थान् अन्ते च परमां गतिम् ॥३३॥

॥ इत्युमासंहितायां रामायणघट्टीय निवेदनप्रकरणं समाप्तम् ॥

॥ श्रीरामो जयति ॥

॥ अथ कामनावृद्धिः पारायणीय ॥

॥ रामायण घट्टप्रदर्शनम् ॥

ईश्वर उवाच—

अथ वक्ष्यामि गिरिजे श्रूयतामवधानतः ।
श्रीमद्रामायणग्रन्थे कामनावृद्धिरादरात् ॥ १ ॥

षट्कानां पठनीयानां सङ्ग्रहाध्यायमादरात् ।
कामेप्सवो द्विजाः प्रातः स्नात्वा दिव्यसरिज्जले ॥ २ ॥
प्रयताश्शुद्धभावाश्च कृतजप्या हुताग्नयः ।
दिवसस्याष्टमं भागं परिहृत्य ततः परम् ॥ ३ ॥
रामं संपूज्य विधिवत् पठेयुः स्वेष्टषट्कम् ।
पठितुं चेदशक्तः स्यात् शृणुयात् स गदादिमान् ॥ ४ ॥
विप्रेतरैस्तु श्रोतव्यं सर्वदैव द्विजाननात् ।
पाठकं मानयेदन्ते मत्वा श्रीराविग्रहम् ॥ ५ ॥
धर्मकामस्तु (1) कौसल्यारामसंवादमादरात् ।
मङ्गळान्तं पठेत् प्रातर्मध्याह्ने वा स्मरन् प्रभुम् ॥ ६ ॥
अनश्नन्नेवहि पठेत् प्रातर्मध्याह्न एव च ।
पठनं यस्य षट्कस्य सायं च परिकीर्तितम् ॥ ७ ॥
तं पठेत् प्रयतस्सन्ध्यामनुष्ठाय धृतव्रतः ।
अशुद्धिश्चेद्दिवा प्राप्ता सायं स्नात्वा पठेत्ततः ॥ ८ ॥
अर्थकामः पठेत् सर्गं (2) यात्रादानकथांशकम् ।
रामस्यारण्यगमनसमये तु त्रिसन्ध्यकम् ॥ ९ ॥
कन्यार्थी च वदुः कन्याऽप्यनुरूपवरार्थिनी ।
(3) सीताविवाहसर्गं तु पठेत् प्रातः प्रयत्नतः ॥ १० ॥

---

(1) अयोध्याकाण्डे 21 22 23 24 25 सर्गाः ।
(2) अयोध्याकाण्डे 32 सर्गः ।
(3) बालकाण्डे 73 सर्गः ।

गव्यं निवेदयेत् क्षीरं सद्यो दुग्धं शुचिस्थले ।
मोक्षार्थिभिस्तु पाठ्या स्यात् (4) जटायुर्मोक्षदानका ।
रामस्य लक्ष्मणाश्वासाद्यारभ्य प्रयतैः कथा ॥ ११½ ॥
अपस्मारश्वासखासकुष्ठादिगदशान्तये ।
आद्ये युद्धे दशास्यस्य (5) मौळिभङ्गं दिनेदिने ।
पठेद्द्विवारं नैवेद्यमादौ मध्वन्ततः पयः ॥ १३ ॥
भूतवेताळपीडा चेत् (6) लङ्काविजयसर्गकम् ।
आदौ गुडान्नं नैवेद्यं कृत्वा सायं पठेद्यतः ॥ १४ ॥
विमार्गसर्वत्रेतिपद्यस्यान्ते नीराजनार्पणम् ।
कृत्वाऽयं प्रणमेत् भूमौ आञ्जनेयं हृदा स्मरन् ॥ १५ ॥
उन्माददोषशान्त्यर्थं (7) हनूमच्चिन्तनं पठेत् ।
अशोकवनिकायानसमये समुपस्थितम् ॥
निवेदयेद्यतः प्रातर्माषचूर्णान्नमादृतः ॥ १६½ ॥
दारिद्र्यध्वंसकामस्तु लङ्कायां तु हनूमता ।
(8) मैथिलीदर्शनं प्राप्तं पठेत् पापविमोचनम् ॥ १७½ ॥
दुःखध्वंसनकामस्तु रावणस्य वधोत्तरम् ।

---

(4) आरण्यकाण्डे 65 66 67 68 सर्गाः ।
(5) युद्धकाण्डे 59 सर्गः ।
(6) सुन्दरकाण्डे 3 सर्गः ।
(7) सुन्दरकाण्डे 13 सर्गः ।
(8) सुन्दरकाण्डे 15 सर्गः ।

(९) सीताञ्जनेयसंवादसर्गं तु प्रयतः पठेत् ॥१८½॥
अतार्कितापदुद्धारकामश्चे (१०) दभयार्पणम् ।
विभीषणाय रामेण पठेदर्थं विचिन्तयन् ।
आदावन्ते च संस्फोट्य नाळिकेरं निवेदयेत् ॥२०॥
विश्लिष्टबन्धुसंयोगकामना चेद्धनूमतः ।
(११) रामाङ्गुळीयार्पणं तु सीतायै सन्ध्ययोः पठेत् ॥
आदौ वाऽन्तेपि वा नित्यं पनसाम्रफलार्पणम् ॥२१½॥
दुःस्वमदोषशान्त्यर्थं (१२) त्रिजटास्वमदर्शनम् ।
पठेत्त्र्यहं प्रातरेव शर्करां विनिवेदयेत् ॥२२⅓॥
पारदारिकतादोषशान्तये हनुमत्कृतम् ।
निर्विकारमनाभूत्वा शुद्धान्ते रावणस्य च ॥
(१३) जानक्यन्वेषणकथासर्गपञ्चक मादरात् ।
सकृत् पठेत् प्रातरेव निवेद्यापूपविंशतिम् ॥२४⅓॥
बुध्याऽबुध्या रामविभो विहितागःप्रशान्तये ।
(१४) काकानुग्रहवृत्तान्तसर्गं नत्वा पठेत् प्रभुम् ॥२५½॥

---

(9) युद्धकाण्डे 116 सर्गः ।
(10) युद्धकाण्डे 17 18 सर्गौ ।
(11) सुन्दरकाण्डे 36 सर्गः ।
(12) सुन्दरकाण्डे 27 सर्गः ।
(13) सुन्दरकाण्डे 7 8 9 10 11 सर्गाः ।
(14) सुन्दरकाण्डे 38 सर्गः ।

सर्वसौख्यास्पदं भावि जन्म काङ्क्षद्भिरादरात् ।
अयोध्यायां (15) रघूत्तंसराज्यषट्काभिषेचनम् ।
पठनीयं मासमात्रं शुद्धाकं विनिवेदयेत् ॥२७॥
पुत्रकामस्तु (16) पुत्रीया मिष्टिं दशरथस्य ताम् ।
आगर्भधारणं स्त्रीणां पायसेन पठेच्छुचिः ॥२८॥
निवेदयेत् प्रतिदिनं घृतमिश्रं तु पायसम् ।
भावयेच्चापि पत्नीं स्वां कुल्यां विंशतिवासरान् ॥२९॥
सुखप्रसवकामस्तु गर्भिणीनां तु तच्छ्रवे ।
(17) अवतारकथासर्गं रामस्य प्रयतः पठेत् ॥
यथालब्धं तु नैवेद्यं कार्यं द्रव्येण चाल्पशः ॥३०½॥
कारागृहप्रवेशस्स्यादिति यस्यास्ति वै भयम् ।
(18) विभीषणेन सीताया नयनं रामसन्निधौ ॥
सपठेन्मधुरैर्द्रव्यै स्तोषयित्वा रघूत्तमम् ॥३२॥
सर्वार्थसिद्धिदं देवि रामायणमनुत्तमम् ।
पठेत्सर्वप्रयत्नेन कामिभिः पठितं पुरा ॥
मुनिभिस्सर्वतत्वज्ञैः सर्वानिष्टनिवारणम् ॥३३½॥

---

(15) युद्धकाण्डे 131 सर्गः ।
(16) बालकाण्डे 15 16 सर्गौ ।
(17) बालकाण्डे 18 सर्गः ।
(18) युद्धकाण्डे 117 सर्गः ।

(19) विश्वामित्रस्य ब्राह्मण्यकथया ब्रह्मवर्चसम् ॥
(20) गङ्गावतारकथयाऽप्यक्षय्यं पितृतर्पणम् ॥३४½॥
अयोध्याकाण्डप्रारम्भे श्रीरामगुणसन्ततेः ।
(21) पठनात् गुणवान् पुत्रो निर्गुणोऽपि भवेद्ध्रुवम् ॥
अत्रानिर्दिष्टकामास्तु ये स्युर्नानाभिधेप्सिताः ।
तैः पाठ्यं (22) भार्गवजयकथासर्गद्वयं यतैः ॥३६½॥
पायसापूपनैवेद्यं पठनान्ते प्रकारयेत् ।
अनिर्दिष्टं तु येषां तत् षड्ढानां स्यात् विशेषतः ॥३७½॥
नैवेद्यं तत्र कल्प्यं स्यात् कदलीफलपञ्चकम् ।
इमं शृण्वन्ति ये विप्रा अध्यायं ये पठन्ति वा ।
सर्वान् कामानवाप्यैते श्रीरामस्य पदं गताः ॥ ३९ ॥

इत्युमासंहितायां श्रीरामायणे कामनावृद्धिः
पारायणीयषड्ढविचारः ॥

---

(19) बालकाण्डे 50 प्रभृति 65 सर्गसमाप्तिपर्यन्तं पञ्चदश सर्गाः ।
(20) बालकाण्डे 34 प्रभृति दश सर्गाः ।
(21) अयोध्याकाण्डे 1 2 सर्गौ ।
(22) बालकाण्डे 75 76 सर्गौ ।

॥ श्रीरामो जयति ॥

॥ नवग्रहदशाभुक्तिदोषपरिहारः ॥

अथ उमासंहिताप्रोक्तः श्रीमद्रामायणस्थघट्टपारायणाधीन नवग्रहदशाभुक्तिपीडापरिहारप्रकारः कथ्यते—

ईश्वर उवाच—

अथ वक्ष्यामि दोषाणां दशाभुक्तिषु पार्वति ।
नवग्रहैः कारितानां परिहारं यथोदितम् ॥ १ ॥
ब्रह्मा तदात्मजाश्चापि शक्राद्याश्च सुरोत्तमाः ।
रामायणस्थघट्टानां केषां चित् पाठमात्रतः ॥
पीडां नवग्रहकृतामुत्तेरुः कृपया प्रभोः ॥२½॥

॥ अथ सूर्यदशादोषपरिहारः ॥

दुष्टा दशा चेत् सूर्यस्य नियमात् पूतमानसः ।
(1) हरेण गङ्गाधरणसर्गं नित्यं पठेद्द्विजः ॥३½॥
सूर्यस्यैव दशायां तु सूर्यभुक्तिस्तु दोषदा ।
(2) हरेण कालकूटस्य भक्षणं यत्र सर्गके ॥
तं पठेत् सातरैकाग्र्यात् ध्यात्वा रुद्रं परात्परम् ॥५॥
चन्द्रभुक्तिर्यदा क्रूरा सूर्यस्यैव दशान्तरे ।

---

(1) बालकाण्डे 43 सर्गः ।
(2) बालकाण्डे 45 सर्गः ।

पठे (3) च्छूर्पणखाभङ्गसर्गं त्रिषवणं यतः ॥६॥
कुजभुक्तिर्दोषदा चेत् सूर्यस्य च दशान्तरे ।
(4) आदावयोध्याकाण्डस्य पठेत् सर्गद्वयं व्रती ॥७॥
बुधस्य यदिचेत् भुक्तिः क्रूरा सूर्यदशान्तरे ।
(5) अधिकं मेनिरे विष्णुमिति सर्गं सदा पठेत् ॥८॥
गुरोर्भुक्तिर्दोषदा चेत् आदित्यस्य दशान्तरे ।
(6) सरामो रथमास्थायेत्यादिसर्गं पठेन्मुदा ॥९॥
शुक्रभुक्तिर्क्रौर्यदोषशान्त्यर्थं भास्करान्तरे ।
(7) सीतोक्तस्वविवाहाख्यसर्गं सर्वात्मना पठेत् ॥१०॥
शनिभुक्तिर्यदि क्रूरा दशायां भास्करस्य च ।
(8) इन्द्रजिद्वधसर्गन्तु पठेच्च शृणुयादपि ॥११॥
राहोश्चेद्दोषदा भुक्तिः दिनरश्मेर्दशान्तरे ।
(9) देवेभ्यः पार्वतीशापसर्गन्तु प्रयतः पठेत् ॥१२॥
केतुभुक्तिस्तु दुष्टा चेद्दशायां तु रवेस्तदा ।

---

(3) आरण्यकाण्डे 18 सर्गाः ।
(4) अयोध्याकाण्डे । 2 सर्गौ ।
(5) बालकाण्डे 75 सर्गाः ।
(6) अयोध्याकाण्डे 17 सर्गाः ।
(7) अयोध्याकाण्डे 118 सर्गाः ।
(8) युद्धकाण्डे 91 सर्गाः ।
(9) बालकाण्डे 36 सर्गाः ।

(10) जटायुषे मोक्षदानसर्गं भक्तियुतः पठेत् ॥१३॥

॥ इति सूर्यदशादोषपरिहारः ॥

॥ अथ चन्द्रदशादोषपरिहारः ॥

सोमस्य चेद्दशा दुष्टा तस्याश्शान्त्यर्थमादरात् ।
(11) "ततस्समध्यङ्गत" मित्यमुं सर्गं पठेन्निशि ॥१४॥
शुक्लपक्षे * प्रदोषेच ततश्चन्द्रं प्रपूजयेत् !
अशुभा सोमशुक्तिश्चेत् सोमस्यैव दशान्तरे ॥
(12) नृगस्य चरितं कृत्स्नं पठेदुत्तरकाण्डगम् ॥१५½॥
सूर्यशुक्तिर्यदाक्रूरा प्राप्य सोमस्य वै दशाम् !
(13) हनूद्रामसम्बन्धसर्गं भक्त्या च वाचयेत् ॥१६½॥
भौमस्य शुक्त्या दोषश्चेत् निशाकरदशान्तरे ।
(14) विश्वामित्रेण नयनं पठेद्राघवयोर्मुदे ॥१७½॥
सौम्यशुक्ति रसौम्या चेत् सोमस्यैव दशान्तरे ।
(15) सीताराघवसंवादसर्गान् मध्यन्दिने पठेत् ॥१८½॥

---

(10) आरण्यकाण्डे 68 सर्गः ।
(11) सुन्दरकाण्डे 5 सर्गः ।
(*) प्रदोषः — सूर्यस्यास्तमयात् परं घटिकाद्वयम् ।
(12) उत्तरश्रीरामायणे 53 54 सर्गौ ।
(13) किष्किन्धाकाण्डे 3 सर्गः ।
(14) बालकाण्डे 19 20 21 22 सर्गाः ।
(15) अयोध्याकाण्डे 26 27 28 29 30 सर्गाः ।

चन्द्रस्यैव दशायान्तु गुरुशुक्तिर्यदाऽशुभा ।
(16) नारदोक्तां रामकथां पूतात्मा प्रयतः पठेत् ॥१९½॥
शुक्रस्यान्तर्दशा दुष्टा यदि सोमदशान्तरे ।
(17) उत्थानसर्गं वह्नेस्तु सीताया भक्तितः पठेत् ॥
शनैश्चरस्य दुष्टा चेत् शुक्तिश्चन्द्रदशान्तरे ।
सायं प्रातः पठेत् सर्गं नित्यं (18) खरवधात्मकम् ॥
राहुशुक्तिर्दोषदा चेत् चन्द्रस्य तु दशान्तरे ।
(19) अहल्याशापनिर्मोक्षसर्गं भक्त्याऽत्र संपठेत् ॥
महादशायां सोमस्य केतोश्चेत् शुक्तिरक्षमा ।
(20) रक्षोवधप्रायश्चाख्यं पठेत्सर्गं प्रयत्नतः ॥२३½॥

॥ इति चन्द्रदशादोषपरिहारः ॥

॥ अथ कुजदशादोषपरिहारः ॥

कुजस्य चेद्दशा दुष्टा (21) कुमारोत्पत्तिसर्गकौ ।
पठेद्वा शृणुयाद्वाऽपि सुब्रह्मण्यार्पिताशयः ॥

---

(16) बालकाण्डे प्रथमस्सर्गः ।
(17) युद्धकाण्डे (2) सर्गः ।
(18) आरण्यकाण्डे 30 सर्गः ।
(19) बालकाण्डे 49 सर्गः
(20) आरण्यकाण्डे 6 सर्गः ।
(21) बालकाण्डे 36 37 सर्गौ ।

पठनान्ते च वल्लीशं पूजयेदालयेऽपि वा ॥२५॥
महादशायां भौमस्य तस्यैवान्तर्दशाऽशुभा ।
(22) अगस्त्यपूजां रामाय पठेदुत्तरकाण्डगाम् ॥२६॥
भौमस्यैव दशाभागे सूर्यभुक्तिश्शुभा न चेत् ।
(23) कन्दर्पनाशनाख्यं तु पठेत् सर्गमनुत्तमम् ॥२७॥
महादशायां भौमस्य सोमभुक्तिर्नचेच्छुभा ।
(24) वानरोत्पत्तिसर्गं तु भक्तियुक्तस्तदा पठेत् ॥२८॥
बुधभुक्तिर्दोषदा चेत् कुजस्यैव दशान्तरे ।
(25) पायसस्य प्रदानाख्यं पठेत्सर्गं प्रयत्नतः ॥२९॥
गुरोश्चेद्दोषदाभुक्तिर्भौमस्य तु दशान्तरे ।
(26) उपदेशं हनुमतो रावणाय तदा पठेत् ॥३०॥
शुक्रभुक्तिर्दोषदा चेत् लोहिताङ्गदशान्तरे ।
(27) सीतायाः प्रार्थनं वह्निमुद्दिश्य हनुमत्कृते ।
यत्र तं सर्गमाध्यायन्नाञ्जनेयं पठेत्क्रमात् ॥३१½॥
सौरेरन्तर्दशा क्रूरा यदि भौमदशान्तरे ।

---

(22) उत्तरश्रीरामायणे 76 सर्गः ।
(23) बालकाण्डे 23 सर्गः ।
(24) बालकाण्डे 17 सर्गः ।
(25) बालकाण्डे 16 सर्गः ।
(26) सुन्दरकाण्डे 51 सर्गः ।
(27) सुन्दरकाण्डे 53 सर्गः ।

(28) कबन्धबाहुलवनसर्गं ध्यायन्शनिं पठेत् ॥३२½॥
अङ्गारकदशायां तु राहोरन्तर्दशाऽशुभा ।
(29) पठेत्तु प्रथमे युद्धे रावणस्य पराभवम् ॥३३½॥
केतुभुक्तिर्दोषदाचे दङ्गारकदशान्तरे ।
सीताकृतां (30) राक्षसीनां रक्षां हनुमतः पठेत् ॥३४½॥

॥ इति कुजदशादोषपरिहारः ॥

॥ अथ राहुदशादोषपरिहारः ॥

दशा चेत्तमसो दुष्टा कर्मभिः कृतमादरात् ।
(31) लङ्कादहनसर्गं तु युद्धकाण्डगतं पठेत् ॥३५½॥
अन्ते तु ज्वालामालिन्यै पूजां कृत्वाऽथ यत्नतः ।
निवेदयेदपूपांश्च माष्वकिं च निवेदयेत् ॥ ३६½ ॥
तत्रैव राहुभुक्तिश्चेत् दोषदा तत्प्रशान्तये ।
(32) नागास्त्रबन्धनिर्मोक्षसर्गं भक्त्या युतः पठेत्॥३७½॥
राहोर्दशायां सूर्यस्य पीडाचेद्भुक्तितो भवेत् ।
बालकाण्डगतं (33) सूर्यवंशाख्यानं यतः पठेत् ॥३८½॥

---

(25) आरण्यकाण्डे 70 सर्गाः ।
(29) युद्धकाण्डे 59 सर्गाः ।
(30) युद्धकाण्डे 116 सर्गाः ।
(31) युद्धकाण्डे 75 सर्गाः ।
(32) युद्धकाण्डे 50 सर्गाः ।
(33) बालकाण्डे 70 सर्गाः ।

चन्द्रशुक्तिर्दोषदा चेत् राहोरेव दशान्तरे ।
(34) नर्मदायां रावणस्य पूजासर्गं यतः पठेत् ॥३९½॥
राहोर्दशायां भौमस्य भुक्त्या चेद्दुरितं भवेत् ।
(35) पठेत् कैलासचलने रावणस्य च रोदनम् ॥४०½॥
बुधस्य भुक्त्या दोषश्चेत् तमसस्तु दशान्तरे ।
(36) पठेत् ब्रह्मकृतं स्तोत्रं रावणस्य वधात्परम् ॥४१½॥
राहोर्दशायां भुक्त्या चेत् सुरेज्यस्याशुभं भवेत् ।
(37) सर्गं राज्याभिषेकाख्यं सुग्रीवस्य सदा पठेत् ॥
कवेर्भुक्तिरनर्थं चेद्राहोर्दत्ते दशान्तरे ।
(38) हनूमता राघवाय चूडामण्यर्पणं पठेत् ॥४३½॥
शनैश्चरस्य भुक्त्या चेद्दोषो राहुदशान्तरे ।
(39) हनूमताऽक्षनाशाख्यसर्गपारायणं चरेत् ॥४४½॥
केतोरन्तर्दशा दुष्टा राहोश्चेत्स्याद्दशान्तरे ।
(40) रामेण जामदग्न्यस्य लोकानां नाशनं पठेत् ॥४५½॥

॥ इति राहुदशादोषपरिहारः ॥

---

(34) उत्तरश्रीरामायणे 31 सर्गः ।
(35) उत्तरश्रीरामायणे 16 सर्गः ।
(36) युद्धकाण्डे 120 सर्गः ।
(37) किष्किन्धाकाण्डे 26 सर्गः ।
(38) सुन्दरकाण्डे 65 सर्गः ।
(39) सुन्दरकाण्डे 47 सर्गः ।
(40) बालकाण्डे 76 सर्गः ।

॥ अथ गुरुदशादोषपरिहारः ॥

गुरोर्दशा चेदुग्रा स्यात् तदा सुन्दरकाण्डके ।
(41) पठेत्समुद्रतरणसर्गमेकं हनूमतः ॥
अन्ते च सितया मिश्रान्लाजान् हनुमतेऽर्पयेत् ॥४७॥
गुरोर्दशायां तस्यैव भुक्तिश्चेद्दोषदा भवेत् ।
पठेत्तु (42) शरभङ्गस्य मोक्षसर्गं द्विसन्ध्ययोः ॥४८॥
गुरोर्दशायां सूर्यस्य भुक्तिश्चेद्दोषभाविनी ।
(43) सुग्रीवोक्तं चराणां पूर्वदिग्मार्गमापठेत् ॥४९॥
गुरोर्दशायां चन्द्रस्य भुक्तिर्यादि विपत्तिदा ।
(44) संपातिपक्षस्योत्पत्तिकथासर्गान् पठेत् सुधीः॥५०॥
गुरोर्महादशायां तु कुजभुक्तिर्यदाऽशुभा ।
(45) अयोध्यावर्णनं बालकाण्डस्थं सर्गमापठेत् ॥५१॥
गुरोर्दशायां सौम्यस्य भुक्तिर्यादि विपत्प्रदा ।
(46) देवानां प्रार्थनासर्गौ विष्णुं प्रति यतः पठेत् ॥५२॥
गुरोर्दशायां शुक्रस्य भुक्तिश्चेद्दोषदा तदा ।

---

(41) सुन्दरकाण्डे प्रथमस्सर्गः ।
(42) आरण्यकाण्डे 5 सर्गाः ।
(43) किष्किन्धाकाण्डे 40 सर्गः ।
(44) किष्किन्धाकाण्डे 60 61 62 63 सर्गाः ।
(45) बालकाण्डे 5 सर्गः ।
(46) बालकाण्डे 15 16 सर्गौ ।

(47) बालकाण्डान्तिमं सर्गं पठेद्भक्तिसमन्वितः ॥५३॥
शनिभुक्तिर्दोषदा चेत् सुरेज्यस्य दशान्तरे ।
(48) सुमन्त्रस्यानुग्रहार्थं पठेद्रामस्य दर्शनम् ॥५४॥
राहुभुक्तिर्दोषदा चेत् गुरोरेव दशान्तरे ।
(49) शबरीमोक्षसर्गन्तु पठेद्भक्तिसमन्वितः ॥५५॥
केतुभुक्त्या भवेत् पीडा गुरोर्यदि दशान्तरे ।
(50) पठेन्मधुवनध्वंसे सर्गद्वयमनुत्तमम् ॥५६॥

॥ इति गुरुदशादोषपरिहारः ॥

॥ अथ शनिदशादोषपरिहारः ॥

शनैश्चरस्य दुष्टा चेद्दशा राक्षसनाशनम् ।
(51) विश्वामित्राध्वरे सर्गं पठेत् पूर्वं तु भोजनात् ॥
पाठकाले भवेन्मौनी शृणुयादपि तादृशः ।
मृत्युञ्जयाय पाठान्ते तिलान्नं विनिवेदयेत् ॥५८॥
शनेर्दशायां भुक्तिश्चेत् शनेरेवाहिता भवेत् ।
(52) ब्रह्मास्त्रबन्धमुक्त्याख्यं पठेत् सर्गं हनूमतः ॥५९॥

---

(47) बालकाण्डे 77 सर्गः ।
(48) अयोध्याकाण्डे 16 सर्गः ।
(49) आरण्यकाण्डे 74 सर्गः ।
(50) सुन्दरकाण्डे 61, 62 सर्गौ ।
(51) बालकाण्डे 31 सर्गः ।
(52) सुन्दरकाण्डे 48 सर्गः ।

शनैश्चरदशायान्तु सूर्यभुक्तिर्यदाऽशुभा ।
(53) हनुमज्जननं सर्गं किष्किन्धाकाण्डगं पठेत् ॥६०॥
चन्द्रभुक्तिर्दोषदा चेत् शनैश्चरदशान्तरे ।
(54) ताटकावधसर्गान्तु पठेदादोषनाशनम् ॥ ६१॥
भौमस्य भुक्तिश्चेत्क्रूरा शनेरेव यदा दशा ।
(55) स्वयंप्रभाबिलोत्तारसर्गपारायणं चरेत् ॥६२॥
शनेर्दशायां सौम्यस्य भुक्तिश्चेत्क्लेशदायिनी ।
(56) लङ्कादाहं हनुमता कृतं सर्गं सदा पठेत् ॥६३॥
महादशायां सौरस्य गुरुभुक्तिस्तु दोषदा ।
(57) रामालिङ्गनसर्गान्तु पठेद्दासहनूमतः ॥६४॥
शनेर्दशायां शुक्रस्य भुक्तिर्यदि विपत्प्रदा ।
(58) चूडामणिप्रदानाख्यं पठेत् सर्गं हनूमते ॥६५॥
राहोश्चेत् भुक्तिरशुभा सौरस्याथ दशान्तरे ।
(59) मायामृगवधाभिख्यं पठेत् सर्गं प्रयत्नतः ॥६६॥

(53 किष्किन्धाकाण्डे 66 सर्गः ।
(54) बालकाण्डे 26 सर्गः ।
(55) किष्किन्धाकाण्डे 51, 52 सर्गौ ।
(56) सुन्दरकाण्डे 54 सर्गः ।
(57) युद्धकाण्डे प्रथमस्सर्गः ।
(58) सुन्दरकाण्डे 38 सर्गः ।
(59 आरण्यकाण्डे 44 सर्गः ।

केतुभुक्तिरनर्थं चेद्दत्ते शनिदशान्तरे ।
(60) सीताभरणजालानां सुग्रीवेणार्पणं पठेत् ॥६७॥

॥ इति शनिदशादोषपरिहारः ॥

॥ अथ बुधदशादोषपरिहारः ॥

दशा बुधस्य दुष्टा चेत् सीताग्रे हनुमत्कृतम् ।
(61) श्रीरामवर्णनं सर्गं पठेत् संपूज्य राघवम् ॥
पठनान्ते राघवस्य मुद्राङ्गं विनिवेदयेत् ॥ ६८½ ॥
बुधभुक्तिस्तु तत्रैव यदि दोषप्रदा भवेत् ।
(62) वामनोत्पत्तिचरितसर्गं प्रातः पठेच्चतुः* ॥ ६९½ ॥
बुधस्य तु दशायां चेत् सूर्यभुक्तिस्तु दोषदा ।
(63) तदा मूलबलध्वंससर्गं त्रिषवणं पठेत् ॥ ७०½ ॥
महादशायां सौम्यस्य चन्द्रस्यान्तर्दशाऽशुभा ।
(64) संवादमत्रे रामेण सर्गान्तु प्रयतः पठेत् ॥ ७१½ ॥
बुधस्य चेद्दशायां तु भौमभुक्तिस्तु पीडयेद् ।

---

(60) किष्किन्धाकाण्डे 6 सर्गाः ।
(61) सुन्दरकाण्डे 35 सर्गाः ।
(62) बालकाण्डे 29 सर्गाः ।
(*) चतुः— 4 Times.
(63) युद्धकाण्डे 94 सर्गाः ।
(64) अयोध्याकाण्डे 117 सर्गाः ।

(65) सीताशुभनिमित्ताख्यसर्गं षड्वारमापठेत् ॥
अशुभा गुरुशुक्ति श्चेत् बुधस्यैव दशान्तरे ।
(66) सर्गं पठेच्च सुरभे राख्यानं भरतोदितम् ॥ ७३½ ॥
बुधस्यैव दशायान्तु शुक्रशुक्तिर्यदाऽहिता ।
(67) सीताराघवसंवादं पठेदारण्यकाण्डगम् ॥ ७४½ ॥
शनिशुक्तिर्दोषदा चेत् बुधस्य तु दशान्तरे ।
स्मरन् मनसि कोदण्डपाणिं राघवमादरात् ।
पठेत् सर्गं भक्तियुतो (68) रावणस्य वधात्मकम् ॥७६॥
महादशायां सौम्यस्य राहुशुक्तिस्तु दोषदा ।
(69) चारेण तु दशास्याय राघवस्य प्रदर्शनम् ।
सर्गमेकं पठेद्यत्तः ग्रन्थे संपूज्य राघवम् ॥ ७७½ ॥
केतुशुक्तिर्दोषदा चेत् बुधस्याथ दशान्तरे ।
(70) हनूमताऽशोकवने सीताऽन्वेषणमापठेत् ॥ ७८½ ॥

॥ इति बुधदशादोषपरिहारः ॥

---

(65) सुन्दरकाण्डे 29 सर्गः ।
(66) अयोध्याकाण्डे 74 सर्गः ।
(67) आरण्यकाण्डे 9, 10 सर्गौ ।
(68) युद्धकाण्डे 111 सर्गः ।
(69) युद्धकाण्डे 28 सर्गः ।
(70) सुन्दरकाण्डे 14 सर्गः ।

॥ अथ केतुदशादोषपरिहारः ॥

केतोर्दशा दोषदा चेत् (71) सर्गं गुहसमागमम् ।
राघवस्य पठेद्भक्त्या हृदि कृत्वा रघूत्तमम् ॥
अन्ते निवेदयेद्वस्त्रान् माषापूपान् घृताचितान् ॥८०॥
केतोर्दशायां केतोश्चेत् भुक्तिर्दोषविधायिनी ।
(72) दैवप्रशंसां रामस्य मुखाब्जान्निस्मृतां पठेत् ॥
केतोर्दशायां सूर्यस्य भुक्तिश्चेत् क्लेशकारिणी ।
पठेदयोध्याकाण्डस्थं (73) सूर्यवंशानुकीर्तनम् ॥८२॥
केतोर्दशायां सोमस्य दुष्टात्वन्तर्दशा यदि ।
(74) बलातिबलयोर्दानं राघवाय पठेद्यतः ॥८३॥
केतोर्दशायां भौमस्य यदि भुक्त्याऽहितं भवेत् ।
(75) कञ्चित्सर्गं पठेत्सम्यक् हृदि ध्यायन् रघूत्तमम् ॥
केतोर्दशायां शुक्रस्तु बुधस्य यदि दोषदा ।
(76) पठेद्रामकथां प्रोक्तां भरताय हनूमता ॥८५॥
गुरुभुक्तिर्दोषदात्री केतोश्चेत्तु दशान्तरे ।

---

(71) अयोध्याकाण्डे 50 सर्गः ।
(72) अयोध्याकाण्डे 32 सर्गः ।
(73) अयोध्याकाण्डे 110 सर्गः ।
(74) बालकाण्डे 22 सर्गः ।
(75) अयोध्याकाण्डे 100 सर्गः ।
(76) युद्धकाण्डे 129 सर्गः ।

(77) हनूमदुक्तं सीतायै रामस्य विजयं पठेत् ॥ ८६ ॥
शुक्रभुक्त्या तु दोषश्चेत् केतोरेव दशान्तरे ।
(78) हनूमदुक्तं रामाय सीतादर्शन मापठेत् ॥ ८७ ॥
महादशायां केतोश्चेत् शनिभुक्तिरनर्थदा ।
पठेत् त्रिसन्ध्यं प्रयतः (79) ग्रहस्तवधसर्गकम् ॥ ८८ ॥
केतोर्महादशायान्तु राहुभुक्तिरनर्थदा ।
(८0) कुम्भकर्णस्य निधनं पठेत् सर्गं दिवानिशम् ॥८९॥

॥ इति केतुदशादोषपरिहारः ॥

॥ अथ शुक्रदशादोषपरिहारः ॥

शुक्रस्य चेद्दशा दुष्टा (८1) सीतोद्वाहाख्यसर्गकम् ।
जानकीं मनसा ध्यायन् सर्वाभरणभूषिताम् ॥ ९० ॥
पठेत् कुङ्कुमगन्धाद्यैरभ्यर्च्य ग्रन्थसत्तमम् ।
सुवासिनीभ्यः पाठान्ते मल्लिकाजातिमालतीः ॥ ९१ ॥
श्वेतपुष्पाणि चान्यानि चन्दनं कुङ्कुमं तथा ।
ताम्बूलं च यथाशक्ति दद्याद्द्रजतदक्षिणाम् ॥ ९२ ॥

---

(77) युद्धकाण्डे 116 सर्गः ।
(78) सुन्दरकाण्डे 65 सर्गः ।
(79) युद्धकाण्डे 58 सर्गः ।
(80) युद्धकाण्डे 67 सर्गः ।
(81) बालकाण्डे 73 सर्गः ।

तत्रैव शुक्रभुक्तिश्चेत् प्राणिनां दोषकारिणी ।
(82) अङ्गुलीयप्रदानस्य सर्गं सुन्दरकाण्डगम् ।
पठेत् त्रिषवणं भक्त्या पूजयित्वा महीसुताम् ॥ ९३½ ॥
सा चेत् भुक्तिर्दोषदा स्यात् स्त्रीणां तत्रैव काण्डके ।
(83) सीताया आञ्जनेयेन संवादस्य तु सर्गकम् ।
शृणुयुस्ता अर्थतश्च शब्दतश्च द्विजाननात् ॥ ९५ ॥
भार्गवस्य दशायां तु सूर्यभुक्तिर्यदाऽशुभा ।
पठे (84) च्छिवधनुर्भङ्गसर्गमत्यन्तमादृतः ॥ ९६ ॥
महादशायां शुक्रस्य चन्द्रभुक्तिस्तु दोषदा ।
पठेच्चन्द्रोदये शुक्लपक्षे पश्यन् सुधाकरम् ।
(85) इळोपाख्यानसर्गांस्तु ध्यात्वाऽम्बां चन्द्रमण्डले ॥
कवेर्दशायां भौमस्य यदि भुक्तिः प्रपीडयेत् ।
(86) राज्याभिषेकसर्गं तु पठेत् पादुकयोः प्रभोः ॥
बुधभुक्तिर्दोषदा चेच्छुक्रस्यैव दशान्तरे ।
(87) माल्यवन्मालिविजयं पठेत्सर्गत्रयं यतः ॥ ९९½ ॥

---

(82) सुन्दरकाण्डे 38 सर्गः ।
(83) सुन्दरकाण्डे 33 सर्गः ।
(84) बालकाण्डे 67 सर्गः ।
(85) उत्तरश्रीरामायणे 87, 88, 89, 90 सर्गाः ।
(86) अयोध्याकाण्डे 115 सर्गः ।
(87) उत्तरश्रीरामायणे 6, 7, 8 सर्गाः ।

गुरुभुक्तिः पीडिका चेत् शुक्रस्य तु दशान्तरे ।
(88) पठेद्दशरथस्याश्वमेधसर्गं प्रयत्नतः ॥ १००½ ॥
महादशायां शुक्रस्य मन्दस्यान्तर्दशाऽशुभा ।
(89) ओषधिक्ष्माभृदायत्तलक्ष्मणोज्जीवनं पठेत् ॥
शुक्रस्य चेद्दशायान्तु राहुभुक्तिस्तु दोषदा ।
(90) शक्रक्षेपं विराधस्य सर्गमादरतः पठेत् ॥ १०२½ ॥
शुक्रस्य तु दशायां तु केतुभुक्तिर्यदाऽशुभा ।
(91) सिन्धुतीरे राघवस्य शयनं दर्भसंस्तरे ।
पठेदासेतुबन्धान्तमन्ते नीराजयेत् प्रभुम् ॥ १०४ ॥

॥ इति शुक्रदशादोषपरिहारः ॥

॥ अथोपसंहारः ॥

एवं नवग्रहाणां तु दशाश्चान्तर्दशाः प्रिये ।
उद्दिश्य परिहारोऽयं कथितस्ते सुमध्यमे ॥ १०५ ॥
प्रियं रवेरिक्षुखण्डं चन्द्रस्य तु पयः प्रियम् ।
भौमप्रियं पायसं स्यात् बुधोद्राक्षाफलप्रियः ॥ १०६ ॥
गुरोः प्रिया तु कदळी रसखण्डं कवेः प्रियम् ।

---

(88) बालकाण्डे 14 सर्गः ।
(89) युद्धकाण्डे 102 सर्गः ।
(90) आरण्यकाण्डे 4 सर्गः ।
(91) युद्धकाण्डे 20 सर्गः ।

जम्बूफलैश्शनिप्रीतिः राहुर्नित्यं मधुप्रियः ॥ १०७ ॥
केतोः प्रियं नारिकेळ मेतानि विनिवेदयेत् ।
दशानां दोषशान्त्यर्थं पाठ्ये रामायणांशके ॥ १०८ ॥
तत्तत् ग्रहप्रीतिकरं पदार्थं विनिवेदयेत् ।
रामायणांशे पठिते भुक्तिदोषप्रशान्तये ॥ १०९ ॥
दशानाथप्रियं त्वादौ भुक्तिनाथस्य चान्ततः ।
निवेदयेत्प्रियं वस्तु यत्नात्संपाद्य सादरम् ॥ ११० ॥
अलभ्यं यदि किञ्चित्स्यात् अन्यद्यत् किञ्चिदुत्तमम् ।
निवेदयेत् भक्तियुतः तदभावे नवं फलम् ॥ १११ ॥
नारिकेळं तथा द्राक्षा कदळ्याश्च फलोत्तमम् ।
सर्वग्रहाणां प्रीत्यै स्यात् अलाभे तन्निवेदयेत् ॥ ११२ ॥
एवं दशाभुक्तिजन्यदोषाणां परिशान्तये ।
रामायणांशकाः प्रोक्ताः श्रवणाद्भुक्तिमुक्तिदाः ॥
इत्युमासंहितायां नवग्रहदशाभुक्तिदोषपारिहारकथनं
॥ समाप्तम् ॥

॥ श्रीरामो जयति ॥

॥ श्रीरामचन्द्रमूर्तिप्रतिष्ठाविधिः ॥

(रामपटलगतः)

ब्रह्मोवाच—

मूर्तिं श्रीरामचन्द्रस्य हेमरूप्यादिभिः कृताम् ।
लिखितां यन्त्रतो वाऽपि चित्ररूपामथापि वा ॥

यथा प्रतिष्ठितां कुर्यात् ततः पूजां च कारयेत् ।
वक्ष्ये विधिं यथान्यायं प्रणिपत्य रघूत्तमम् ॥

तत्र सङ्कल्पः ॥

अनादावस्मिन्ननन्ते च संसारे परिभ्रमवशात् अतीतेषु बहुषु जन्मसु इह च मया मनसा वचसा क्रियया च बुद्धिपूर्वमबुद्धिपूर्वं च सकृदसकृच्च कृतानामत्यन्ताभ्यस्तानां निरन्ताभ्यस्तानां च पापानां मध्ये इदानीं प्रारब्धफलानां वीर्यशून्यतासिद्धिद्वारा प्रारप्स्यमानफलानां तेषां अन्ततोविनाशार्थं श्रीरामचन्द्रप्रीत्यर्थं च श्रीरामचन्द्रस्य ——— * रूपां मूर्तिं प्रतिष्ठापयितुकामः (शुद्धसत्वप्रधानमायोपाधिकपरमेश्वरदेवताकेन प्रणवेन सकललोकसृष्टिस्थितिलयकारिब्रह्मविष्णुमहेश्वरदेवताक श्रीरामबीजेन, सर्वाहारिणाऽपि पापलेशलेपरहितेन वह्निनाऽधिष्ठितरेफेण, आश्रितजनकल्पवल्ल्या सर्वार्थासिद्धिप्रदाननिरतया च श्रियाऽधिष्ठितेन मकारेण, सर्वपापविधूननपरवायुदेवताकयकारेण, सद्यस्सर्वविधशुभफलवितरणपरसर्वज्ञरूपचिच्छक्तिस्वरूपाधिष्ठितनमश्शब्देन च सङ्घटितस्य अष्टाचत्वारिंशदक्षरमालामन्त्रमूलभूतस्य वर्णलक्षजपेन उपासकानां गगनगमनादिसिद्धिप्रदानसमर्थस्य धर्मार्थं जपतां सकलविधपापक्षयमूलकबहुविधैहिकामुष्मिकफलासिद्धिप्रदस्य श्रीरामषडक्षरीमन्त्रस्य उद्धारमहोद्धारपरमोद्धारादि बहुविध विकल्पविलासपरिमण्डितस्वरूपस्य, अकारादिक्षकारान्तवर्णसङ्घटितावयव-

* अत्र मूर्तेः प्रकृतिभूतं कनक, रजत, चित्रादिकं, पूरणेयं।

स्य, यदा कदापि सकृदपि स्मरणदर्शनादिभिस्सकलेहितासिद्धि-प्रदस्य, भूतप्रेतपिशाचादिबाधाहरणप्रवीणस्य, रहस्यदेवतात्मक श्रीसीतालक्ष्मणहनुमत्संयुतश्रीरामविग्रहस्य, यन्त्ररूपस्य चित्ररूपस्य हेमानिर्मितस्य (इत्यादि यथासम्भवं वाच्यम्)* श्रीरामपटलोक्तविधानेन सम्भवता द्रव्येण सम्भवता प्रकारेण सम्भवन्त्या दक्षिणया च वैदिकपूजाविधियोग्यताप्रदप्रतिष्ठाख्यं कर्म करिष्ये । इति सङ्कल्प्य । अकांस्यपैत्तळे पात्रे जलं गङ्गादितो हृतम् । प्रतिष्ठाप्य यथावच्च कुम्भपूजां विरच्य च । आवाह्य वरुणं तत्र पूजयेच्च यथाविधि ॥

ततः प्रतिष्ठाप्यमानां श्रीरामस्य मूर्तिं यन्त्रं वा पञ्चगव्ये निक्षिपेत् (चित्रादिमूर्तिं तु वस्त्रादर्शादिभिराच्छाद्य पञ्चगव्यगन्धो यथाऽन्तः प्रविशेत् तथा वस्त्राद्युपरि पञ्चगव्यं निक्षिपेत्) । ततः पुनस्सङ्कल्पः—

मया प्रतिष्ठाप्यमानस्य —— रूपस्य श्रीरामविग्रहस्य भूधातुसम्बन्धवशात् कारुशिल्पादिदोषवशाच्च सञ्जनिताशुद्धिनिवृत्तिद्वारा वैदिकपूजार्हतासिध्यर्थं तत्र श्रीरामचन्द्रस्य नित्यसान्निध्यसिध्यर्थं एतत्कुम्भस्थतीर्थस्य श्रीरामविग्रहाभिषेकयोग्यतासिध्यर्थं च अग्निनिर्ऋतिवाय्वीशानकोणस्थितैः एभिर्ब्राह्मणैश्शुद्धिजपकर्म करिष्ये । शुद्धिजपकर्मकुरुध्वमिति ब्राह्मणान् प्रार्थयेत् ॥

---

* पूर्वपृष्ठस्थ "शुद्धसत्वे" त्यादिः एतदन्तोग्रन्थः, यन्त्रप्रतिष्ठायां योजनीयः ।

तत्र जप्यानि–(1) त्वष्टाहतपुत्रः, (2) विष्णुमुखावै, (3) विष्णोःक्रमोसि, (4) विश्वरूपोवै, (5) महीनां पयोसि, एते अनुवाकाः, दधिक्राव्णः, हिरण्यवर्णाः, पवमानस्रुवर्जनः, पञ्चशान्तयः, श्रीरुद्राध्यायः, चमकं, वरुणसूक्तं च ॥

जपान्ते मूलमन्त्रेण दधिमध्वाज्यसंयुतैः ।
अग्नैः पृथक् पृथग्विप्राः अष्टोत्तरशताहुतीः ॥
घृतेन च पृथक्कुर्युः अग्नौ चत्वार ऋत्विजः ।
मिळितेन च तैः कुर्यादन्नेन द्वौ च ऋत्विजौ ॥
अष्टोत्तरशतं होमं रामगायत्रियाऽऽदितः ।
स्वगृह्योक्तेन विधिना प्रतिष्ठाप्यो हुताशनः ॥
होमाशक्तौ दशगुणं मूलमन्त्रं जपेद्व्रती ।
ततो विसृज्य वरुणं तेन कुम्भजलेन च ॥
क्षीरमिश्रेण चान्यैश्च द्रव्यैर्लब्धैर्यथासुखम् ।
यजमानो राममूर्तिं अभिषिञ्चेद्यथाक्रमम् ॥

---

(1) तै– संहिता का– २, प्र– ४, अनु– १२.
(2) .... का– ५, प्र– २, अनु– १.
(3 ... . का– ४, प्र– २, अनु– १.
(4) .... का– २, प्र– ५, अनु– १.
(5) .... का– ३, प्र– २, अनु– ६.

मूर्तिश्चेच्चित्रलेप्यादिनिर्मिता सा भवेद्यदि ।
तामन्वारभ्य निक्षिप्ते कुशकूर्चेऽभिषेचनम् ॥

तदा जप्यो जपः ॥

पुरुषसूक्तं, श्रीसूक्तं, भूसूक्तं, नीळासूक्तं, उपनिषत्, प्रश्नचतुष्टयञ्च ॥

प्राणप्रतिष्ठां कृत्वाऽथ गुडान्नं विनिवेदयेत् ।
ततः कल्पोक्तविधिना पुंसूक्तविधिनाऽपि वा ॥
उपचारैष्षोडशभिः पूजां सङ्कल्पपूर्वकम् ।
कृत्वा नाम्नां सहस्रेण विष्णोः संपूजयेत् प्रभुम् ॥
पद्मैर्वा चंपकैर्वाऽपि अथवा तुळसीदळैः ।
पायसापूपसहितं भक्ष्यभोज्यसमन्वितम् ॥
निवेदयेत् षड्विधानामन्नानां राशिमादृतः ।
यजमानः स्वयं कुर्यात् पूजां नाचार्यरूपतः ॥
पूजान्ते प्रार्थनां कुर्यादित्थं रामस्य सन्निधौ ।
शिरस्यञ्जलिमाधाय तिष्ठन् ध्यायन् रघूत्तमम् ॥
त्वमक्षरोऽसि भगवन् व्यक्ताव्यक्तस्वरूपधृत् ।
यथा त्वं रावणं हत्वा यज्ञविघ्नकरं खलम् ॥
लोकान् रक्षितवान् राम तथा मन्मानसाश्रयम् ।
रजस्तमश्च निर्हत्य त्वत्पूजाऽऽलस्यकारकम् ॥
सत्वमुद्रेकय विभो त्वत्पूजादरासिद्धये ।
विभूतिं वर्धय गृहे पुत्रपौत्राभिवृद्धिकृत् ॥

कल्याणं कुरु मे नित्यं कैवल्यं दिश चान्ततः ।
विधितोऽविधितोवाऽपि या पूजा क्रियते मया ॥
तां त्वं सन्तुष्टहृदयो यथावद्विहितामिव ।
स्वीकृत्य परमेशान माला मे सह सीतया ॥
लक्ष्मणादिभिरप्यत्र प्रसादं कुरु मे सदा ।
ततश्च द्वादशान्यूनान् विधिना भोजयेत् द्विजान् ॥
दधिमध्वाज्यसंपृक्तै र्द्रव्यैरन्नैश्च षड्विधैः ।
ततः प्रतिदिनं राम मभिषिच्य यथाविधि ॥
विष्णोर्नामसहस्रेण पूजयित्वाऽम्बुजादिभिः ।
पायसापूपसहितं दिव्यान्नं च निवेदयेत् ॥
अशक्तौ पर्वसु विभो रभिषेकादिकं चरेत् ।
पुनर्वसुदिनेऽवश्यमभिषेकादिपूजनम् ॥
पूर्वोक्तेन प्रकारेण कुर्यात् ध्यायन् रघूत्तमम् ।
एवं कृते लोकनाथो रामचन्द्रः प्रसीदति ॥

॥ इति रामप्रतिमाप्रतिष्ठाविधानम् ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीस्कन्दोपपुराणोक्तम् ॥

॥ श्रीरामायणमाहात्म्यम् ॥

॥ अथ प्रथमोऽध्यायः ॥

नारद उवाच—

पितामहोऽसि लोकानां पिताऽसि च मम प्रभो ।
तत् त्वां पृच्छामि लोकेश लोकानां मम चाब्जज ॥१॥
हिताय करुणासिन्धो कृपयाऽऽख्याहि सादरम् ।
उक्तं किल त्वया ब्रह्मन् पठनाच्छ्रवणादपि ॥ २ ॥
श्रीरामायणकाव्यस्य चतुर्वर्गो भवेदिति ।
कथं पाठाद्भवेद्धर्मः कथं चार्थश्च सिध्यति ॥ ३ ॥
कथं कामो भवेत्पुंसां मोक्षो वाऽपि कथं भवेत् ।
विभवं विस्तरं चैव नियमं च सकल्पनम् ॥ ४ ॥
ब्रूहि जगतां नाथ सर्वज्ञोऽसि मतो मम ।

ब्रह्मोवाच—

शृणु नारद वक्ष्यामि श्रीरामायणवैभवम् ॥ ५ ॥
यस्य स्मरणमात्रेण नरः पापात्प्रमुच्यते ।
त्वन्मुखेनाखिला लोका उत्तरेयु रघार्णवात् ॥ ६ ॥
श्रीमद्रामायणं पुण्यमितिहासं पुरातनम् ।
येऽर्चयन्ति रघूत्तंसं स्मरन्तस्ते सुखा नराः ॥ ७ ॥
ब्रह्मक्षत्रियविट्छूद्रैश्चतुर्वर्गफलेप्सुभिः ।

श्रोतव्यं नियमान्नित्यं श्रीरामायणमादरात् ॥ ८ ॥
पठनं च प्रवचनं ब्राह्मणाधीनमेव च ।
श्रीमद्रामायणाख्यस्य कल्पवृक्षस्य नारद ॥ ९ ॥
सप्तकाण्डाह्वयाश्शाखास्सप्तरूपफलप्रदाः ।
पठनाच्छ्रवणं पुण्यमधिकं संप्रयच्छति ॥ १० ॥
अर्थप्रवचनं तस्मान्महापुण्यतमं स्मृतम् ।
पुत्रपौत्रादिसंपत्तिं सर्वरोगनिवारणम् ॥ ११ ॥
पत्नीपुत्रादिकलहनाशनं क्षेमवर्द्धनम् ।
करोति बालकाण्डस्य पठनश्रवणादिकम् ॥ १२ ॥
अभीष्टकार्यप्रत्यूहनाशनं धर्मवर्धनम् ।
पितापुत्रादिवात्सल्यं रामदास्येऽधिकां रुचिम् ॥ १३ ॥
अयोध्याकाण्डपठनं करोति रुचिरं नृणाम् ।
वियुक्तबन्धुसंश्लेषं पतिभक्तिं च योषिताम् ॥ १४ ॥
धर्माविरुद्धं कामानामवाप्तिं साधुषु स्पृहाम् ।
लभते वनकाण्डस्य पठनश्रवणान्नरः ॥ १५ ॥
अर्थावाप्तिं च विपुलां मित्रलाभगुणानपि ।
सत्साहाय्यं सुखप्राप्तिं स्वामिभक्तिं च निर्मलाम् ॥
किष्किन्धाकाण्डसर्गाणां पठनात् प्राप्नुयान्नरः ।
यद्यत्संकल्पितं चित्ते सुकरं वाऽपि दुष्करम् ॥ १७ ॥
शत्रुहस्ताद्विमुक्तिं च कारागाराद्विमोक्षणम् ।
लभते सुन्दराख्यस्य काण्डस्य पठनान्नरः ॥ १८ ॥

दिनेदिने सप्त सर्गान् तस्य काण्डस्य यो नरः ।
पठेद्भक्त्यातु काकुत्स्थं हृदि कृत्वा नमस्य च ॥१९॥
तस्य जन्मान्तरशतैस्सञ्चितस्यापि पाप्मनः ।
नाशं कुर्यात् सुप्रसन्नो रामो विष्णुस्सनातनः ॥२०॥
किंपुनश्चिन्तितार्थांस्तं चिन्तयामः पुनःपुनः ।
युद्धकाण्डस्य पठनात् श्रवणाच्च प्रवाचनात् ॥२१॥
सर्वशत्रुक्षयो भूयात् असाध्यं साध्यतामियात् ।
श्रीमदुत्तरकाण्डस्य पठनात् भक्तितो नरः ॥२२॥
जीवन्मुक्तस्स विज्ञेयो राघवस्य प्रसादतः ।
न पुनस्सतु जायेत कर्म भोक्तुं स्वयं कृतम् ॥२३॥
उषित्वा स तु वैकुण्ठे कार्यब्रह्मसमीपतः ।
ब्रह्मज्ञानं प्रपन्नोऽथ विष्णोस्सायुज्यमाप्नुयात् ॥२४॥
येषां गृहेषु तिष्ठेत श्रीरामायणपुस्तकम् ।
यक्षरक्षःपिशाचाद्या भिया धावन्ति तद्गृहात् ॥२५॥
श्रीरामायणकोशस्य यैः पूजा क्रियतेऽऽदरात् ।
तस्य देवास्तु निखिलाः प्रसीदन्ति स्वयं सुत ॥२६॥
यैर्नित्यं पठ्यते भक्त्या दिनविच्छित्तिशून्यकम् ।
गच्छन्तमनुगच्छेत्तं श्रीरामः करुणावशः ॥२७॥
पाठः काम्यश्च नित्यश्च मोक्षार्थश्चेति स त्रिधा ।
सङ्कल्प्यानिष्टनाशं वा इष्टावाप्तिं मनोरथे ॥२८॥
श्रीरामायणपाठस्तु काम्यस्स परिकीर्तितः ।

श्रीमदुत्तरकाण्डस्य समाप्तौ तु द्विजोत्तम ।
महोत्सवं प्रकुर्वीत रामस्य परमात्मनः ॥ ५० ॥
नित्यपाठे च पाठे च मुमुक्षूणां यथाक्रमम् ।
काण्डास्सप्तापि पाठ्यास्यु रन्यथा निष्फलं भवेत् ॥
काम्यपाठे तु षट्काण्डमितं रामायणं पठेत् ।
न तत्रोत्तरकाण्डश्च पठने श्रेयसां क्षतिः ॥ ५२ ॥
रामायणस्य पठनं यदाऽऽरभ्येत हि क्वचित् ।
तद्ग्रन्थस्य पुरस्तात्तु कोऽपि नासीत सर्वथा ॥ ५३ ॥
शृणोति तत्र ह्यासीनो हनुमान् राघवीं कथाम् ।
स्वस्थाने यस्समासीनस्तं शपेत् स तु कोपतः ॥५४॥
सर्वशास्त्रार्थपारज्ञो भक्तियुक्तो रघूत्तमे ।
वाल्मीकिहृदयाभिज्ञश्शब्दसारार्थसारवित् ॥ ५५ ॥
प्रवक्तृत्वेऽधिक्रियेत ह्यन्यथा हनुमान् शपेत् ।
श्रोतृभिश्च प्रवक्ता तु पूजनीयः प्रयत्नतः ॥ ५६ ॥
तं च मत्वा रघूत्तंसं आदृताः शृणुयुः कथाम् ।
दुग्धेन मधुनाऽऽज्येन भोजयेत्तं दिनेदिने ॥ ५७ ॥
वस्त्रैराभरणैश्चित्रैः स्तुतिभिश्चापि पुष्कलैः ।
संमानयेत् प्रवक्तार मादावन्ते च मध्यतः ॥ ५८ ॥
एतदुद्देशतः प्रोक्तं श्रीरामायणवैभवम् ॥
यः पठेच्छृणुयाद्वाऽपि भक्त्याऽध्यायमिमं नरः ।

श्रीरामस्य प्रसादस्य पात्रं स भवति ध्रुवम् ॥ ५९½ ॥

इति श्रीस्कन्दोपपुराणे पुराणवैभवखण्डे ब्रह्मनारदसंवादे
रामायणपठनश्रवणविधिनिरूपणं नाम
त्रयोविंशोऽध्यायः ॥

(॥ इयि प्रथमोऽध्यायः ॥)

॥ श्रीरामो जयति ॥

॥ अथ द्वितीयोऽध्यायः ॥

युधिष्ठिर उवाच—

भगवन् सर्वधर्मज्ञ अपारकरुणानिधे ।
रामायणेतिहासस्य काम्यपाठक्रमं वद ॥ १ ॥
कथं वा कामिभिः पाठ्यं कं वा नियममाश्रितैः ।
एतदाख्याय मां सद्यः पावय त्वं महामुने ॥ २ ॥

दाल्भ्य उवाच—

सम्यक्पृष्टं महाराज रामदिव्यकथामृतम् ।
पुनीयात्त्वां च मां चैतान् रामायणमहानदी ॥ ३ ॥
चतुराननवक्त्राब्जात् श्रीरामायणवैभवम् ।
श्रुत्वा जगाद धर्मात्मन् नारदो भगवानृषिः ॥ ४ ॥

नारद उवाच—

रामस्य चरितं प्रोक्तं मया वाल्मीकये पुरा ।
श्रुत्वा मत्तस्तु निखिलं मुनिः काव्यं चकार हि ॥ ५ ॥

प्रोच्यते तस्य काव्यस्य माहात्म्यं कथमीदृशम् ।
अन्ये च मुनयः केचिद्रामस्य चरितं शुभम् ॥ ६ ॥
निबध्नन्ति स्वकैर्वाक्यैर्नतेऽत्र कथमादरः ।
प्रमार्जयैनं सन्देहं चरणाब्जं नतोऽस्मि ते ॥ ७ ॥

ब्रह्मोवाच—

नतेऽत्र संशयः कार्यः वत्स सर्वात्मना मुने ।
सुबहूनि निबध्नन्ति काव्यानि बहवो भुवि ॥ ८ ॥
श्रीराघवकथाऽऽढ्यानि युक्तियुक्तानि चैव हि ।
न मे तत्रादरं चेतः करोति मधुरेष्वपि ॥ ९ ॥
वाल्मीकिरुपदेशं तु गृहीत्वा तव बुद्धिमान् ।
भक्तियुक्तो रघूत्तंसे द्रुताच्चित्तोऽभवत्तदा ॥ १० ॥
राघवः परमात्माऽथ रहस्याहूय मां प्रभुः ।
आदिदेश स्वचरितं प्रकटीकर्तुमुद्यतः ॥ ११ ॥

श्रीराम उवाच—

चतुरास्य तवेदानीं कार्यं किमपि गोपितम् ।
तत्ते कर्तव्यमचिरान्मम प्रियचिकीर्षया ॥ १२ ॥
संसारसिन्धुतरणं जनाः कर्तुमनीश्वराः ।
मत्कथासंज्ञितां नावं प्राप्य नन्दन्तु निर्वृताः ॥ १३ ॥
इति मे बुद्धिरुत्पन्ना तदर्थं चाहुतो भवान् ।
अवतारक्रिया पूर्णा रावणो निहतो रिपुः ॥ १४ ॥
मोक्ष्ये त्वच्छापमित्येव भृगवेऽहं वरं ह्यदाम् ।

तदर्थं यत्नमास्थास्ये इति कार्यद्वयं मतम् ॥ १५ ॥
शृङ्गारविरळं दुःखशोकायासनिरन्तरम् ।
मच्चरितं यथावच्तु कस्समर्थो निबन्धितुम् ॥ १६ ॥
वाल्मीकिर्नारदमुने राकर्ण्य चरितं मम ।
द्रवच्चित्तोऽभवत्सद्यः कौमुद्या चन्द्रकान्तवत् ॥ १७ ॥
मन्येऽहं मच्चरित्रस्य ग्रथने तस्य योग्यताम् ।
खरादिनिधनाद्भीतः शङ्कुकर्णो निशाचरः ॥ १८ ॥
दण्डकारण्यगो भूत्वा क्रौञ्चरूपसमाश्रयः ।
बाधतेऽद्य मुनींस्तस्मात्तस्य कार्यो वधो मया ॥ १९ ॥
मन्मायामोहितस्सोऽथ दुष्टो वाल्मीकिसन्निधौ ।
क्रीडिष्यति समं वध्वा रूपे तदनुरूपया ॥ २० ॥
तदा निषादरूपोऽहं वधिष्यामि निशाचरम् ।
स्त्रीणामवध्यता यस्मात्तस्मात्तां परिवर्जये ॥ २१ ॥
वाल्मीकिस्तु स्वया बुध्या द्रुतभेदस्य दर्शनात् ।
शप्स्यते मां स्त्रीवियोगी भवेति रुषितः किल ॥ २२ ॥
इष्टं मे कार्यमेतत्स्यात्तस्य दातुं हि गौरवम् ।
अतस्सरस्वतीं त्वं तु प्रेरयास्याऽऽननं प्रति ॥ २३ ॥
मच्चरित्रं तवादेशा दथासौ ग्रथयिष्यति ।
तच्च श्रोष्यामि कालेन स्वयमेव वृतोऽखिलैः ॥ २४ ॥
मच्चरित्रपरीक्षायां साधुवाऽसाधुवेति हि ।
अवक्तुं कोऽर्हति पुमान् मां विना प्रतिपादितम् ॥२५॥

प्रायेण चरितं मे हि वनेषु चलितं त्वभूत् ।
तद्गच्छ प्रेरय गिरां देवीमस्याननं प्रति ॥ २६ ॥
इति प्रतिसमादिष्टो वाणीं संप्रैरयं ततः ।
वाल्मीकिर्नियमायाथ तमसामगमन्नदीम् ॥ २७ ॥
तस्मिन् पश्यति तत्रैव वृक्षे क्वापि दंपती ।
क्रौञ्चौ चिक्रीडतुर्हर्षात् कामबाणवशानुगौ ॥ २८ ॥
तयोः पुमांसं वेगेन व्याधो विव्याध बाणतः ।
तदुद्वीक्ष्य महाप्राज्ञो वाल्मीकिस्सुमहातपाः ॥ २९ ॥
रुवन्त्यां करुणं तत्र क्रौञ्च्यां निर्भिण्णमानसः ।
सुरतासक्तयोर्घातो न धर्म्य इति जज्ञिवान् ॥ ३० ॥
शशाप समुनिस्तत्र व्याधमाकृष्टकार्मुकम् ।
"मानिषाद प्रतिष्ठां त्वमगमश्शाश्वतीस्समाः ॥ ३१ ॥
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ।
शपन्निति मुनिः क्रोधादुत्तरक्षण एव हि ॥ ३२ ॥
नापश्यत निषादं तं तां क्रौञ्चीं तं च वृक्षकम् ।
चिन्तयामास च मुनिर्मायेयं कस्य चिद्भवेत् ॥ ३३ ॥
अन्यथा हि कथं सर्वं दृष्टनष्टं भवेदिदम् ।
इति चिन्ताऽऽकुलः स्नात्वा समाप्य नियमांश्च सः ॥
स्वाश्रमं पुनरायातः परिक्लिष्टेन चेतसा ।
ततोऽहमगमं तत्र स्मरन्नाज्ञां रघुप्रभोः ॥ ३५ ॥
सावित्र्या च सरस्वत्या हंसयुक्तरथे स्थितः ।

अभ्यर्चितश्च तेनाथ ससम्भ्रममहं तदा ॥ ३६ ॥
वाक्यं वल्मीकजन्मानमब्रवं रचिताञ्जलिम् ।

ब्रह्मोवाच—

ब्रह्मन् वल्मीकसम्भूत माभूश्चिन्तासमाकुलः ॥ ३७ ॥
कृता माया भगवता परीक्षार्थं हृदस्तव ।
परदुःखासहिष्णुत्वात् द्रुतचित्तोऽसि साम्प्रतम् ॥ ३८ ॥
मयैव प्रेरिता तुभ्यमियं देवी सरस्वती ।
स्वयं मुखान्निर्गता ते ज्ञातस्ते वचसो रसः ॥ ३९ ॥
ईदृशैरेव सरसैः पद्यैरन्यैश्च भूरिशः ।
कुरु रामकथां पुण्यां यथा ते नारदाच्छ्रुतम् ॥ ४० ॥
रामत्वेनावतीर्णस्य हरेरद्भुतकर्मणः
जन्मारभ्य स्वधामाप्तिपर्यन्तां सरसां कथाम् ॥ ४१ ॥
पुण्यां सुललितार्थाञ्च अतीतानागतःश्रयाम् ।
आश्रित्य सुमहत्काव्यं सर्गबन्धोज्वलं कुरु ॥ ४२ ॥

वाल्मीकिरुवाच—

चतुरानन लोकेश सर्वधर्मप्रवर्तक ।
निमग्नोऽस्मि सुधासारे श्रीरामचरिताह्वये ॥ ४३ ॥
जाने पुरुषमीशानं रामं रघुकुलोद्भवम् ।
आचार्यानुपदिष्टाया विद्याया वीर्यशून्यताम् ॥ ४४ ॥
विज्ञाय नारदमुनेः प्राप्तं रामकथामृतम् ।
यदि शक्तोऽस्मि रामस्य चरितं पुण्यवत्तमम् ॥ ४५ ॥

काव्यात्मना संग्रथितुं यदि चानुग्रहस्तव ।
वक्ष्यामि रघुनाथस्य कथां काव्यात्मना शुभाम् ॥४६॥
तवानुग्रहतो भूयात् काव्ये मे नानृतं क्वचित् ।
नच मिथ्याप्रलपितं प्रब्रूयुर्मां बुधा भुवि ॥ ४७ ॥
श्लोकानामखिलानां च तात्पर्यं सुमहद्भवेत् ।
रसाः शृङ्गारकारुण्यहास्यवीरादयोऽखिलाः ॥ ४८ ॥
तत्र तत्र मयोद्दिष्टा भूयासुश्च यथोचितम् ।
न क्वचिदपशब्दो मे न च किञ्चिद्वृथा पदम् ॥ ४९ ॥
श्रीरामचरिते भूयान्मम काव्यं प्रमाणकम् ।
नान्यत्किञ्चित्तथा भूयान्मत्काव्यस्यार्चनीयता ॥५०॥
पठनश्रवणाभ्यां मे काव्यस्य सकृदप्यहो ।
पुरुषार्थाश्च सर्वेऽपि भूयासुर्भुवि सर्वतः ॥ ५१ ॥

ब्रह्मोवाच—

वल्मीकजन्मन् सुमुने रामनामप्रभावतः ।
शापात्त्वं नीचवृत्तिस्थोऽप्येवं जातो मुनीश्वरः ॥५२॥
नाम्न एवं प्रभावश्चेद्रामस्य परमात्मनः ।
किमु तच्चरिताम्भोधिप्लावनादघनाशने ॥ ५३ ॥

वाल्मीकिरुवाच—

न ज्ञायते कथं ब्रह्मन् रामनामप्रभावतः ।
एवं मुनिरहं जातश्शापश्च मम कीदृशः ॥ ५४ ॥

ब्रह्मोवाच—

वर्णने त्वच्चरित्रस्य न कालोऽयं तथाऽप्यहम् ।
तवौत्सुक्यनिवृत्त्यर्थं संक्षेपात् प्रब्रवीमि ते ॥ ५५ ॥
वरुणस्य सुतः पूर्वं त्वमभूर्हरिताभिधः ।
कदाचित्तव गेहे तु वरुणेन समाहुताः ॥ ५६ ॥
मुनयस्सनकाद्यास्तु सङ्गता ब्रह्मवादिनः ।
सञ्जल्पुर्मिथस्तत्र श्रुतिस्मृत्याश्रयाः कथाः ॥ ५७ ॥
प्रसङ्गेन च रामस्य हरेरवतरिष्यतः ।
वधाय दशकण्ठस्य कथां ते चक्रिरे तथा ॥ ५८ ॥
क्रीडापरवशस्त्वं तु तदाऽभू र्गृहबर्हिणा ।
तत्कैकाभिश्च ते हासैः कथाविघ्नो बभूव ह ॥ ५९ ॥
सनत्कुमारः कुपितश्शशाप त्वां तदा किल ।
यस्माल्लोकोत्तरकथाविघ्नाय किल दर्पतः ॥ ६० ॥
पक्षिणा क्रीडसे तस्माद्व्याधत्वं तु गमिष्यसि ।
इत्युक्ते वचने तेन सम्भ्रान्ता मुनयोऽखिलाः ॥ ६१ ॥
त्वं तु निश्चेतनो जातो वरुणो दुःखितोऽभवत् ।
प्रसादयामास मुनिं पिता ते शापशान्तये ॥ ६२ ॥
ततः प्रसन्नस्स मुनिः पुनस्त्वां वाक्यमब्रवीत् ।
तव भ्रातुर्भृगोर्वंशे प्रचेता नाम वै मुनिः ॥ ६३ ॥
आस्तेऽद्य दण्डकारण्ये तपः कुर्वन् सुदुश्चरम् ।
भवितासि सुतस्तस्य वेदवेदाङ्गपारगः ॥ ६४ ॥

कालेन व्याधवृत्तिश्च भवितासि गिरा मम ।
सप्तर्षीणां प्रसादेन रामनामप्रभावतः ॥ ६५ ॥
पूतो भूत्वा तपः कृत्वा मुनिवर्यत्वमेष्यसि ।
इत्युक्त्वा स मुनिर्यातस्त्वं च प्राचेतसोऽभवः ॥ ६६ ॥
वेदवेदाङ्गनिष्णातो ह्यभूस्त्वं बाल्य एव च ।
समित्कुशादीनाहर्तुं जातु त्वं वनमध्यगः ॥ ६७ ॥
बहूनानायतो बद्धान् बध्यमानांश्च वै मृगान् ।
पश्यंस्त्वं रममाणोऽभूर्व्याधेन मुनिशापतः ॥ ६८ ॥
आहूतोऽपि च पिता त्वं नाध्यगच्छः स्वमाश्रमम् ।
नैषाद्या वर्तमानस्त्वं वृत्त्या हिंसन् मृगान् खगान् ॥
परिणीय च भिल्लानां कन्यां कामपि संयतः ।
पुत्रानुत्पादयंस्तस्यां भरंस्तांश्च मृगैः खगैः ॥ ७० ॥
कुटुम्बभरणात् खिन्नः बहुवर्षसहस्रतः ।
जातु त्वं वनमध्यस्थ स्तरुस्थं ह्यवधीः खगम् ॥ ७१ ॥
पलायितस्सच खगस्सच बाणोऽपतत् त्वयि ।
तेन विद्धांसदेशस्त्वं रुदितो वेदनावशात् ॥ ७२ ॥
तदा सप्तर्षयो मार्गागतास्त्वां वीक्ष्य कंपिताः ।
दैन्यराशिं त्वामथोचु र्दययाऽभिपरिप्लुताः ॥ ७३ ॥
अहो मूर्खत्वमेतत्ते विप्रोभूत्वा कुलोद्भवः ।
ईदृशीं वृत्तिमापन्नोऽस्यरे निष्कृतिवर्जिताम् ॥ ७४ ॥
यथा त्वं खिद्यसे मूढ बाणेनानेन विध्यता ।

तथा मृगविहङ्गानां व्यथा किं नेति ते मतिः ॥ ७५ ॥
स्वमांसं परमांसेन यः पुष्णाति नराधमः ।
रुरवो भक्षयिष्यन्ति तस्य मांसं यमालये ॥ ७६ ॥
न त्वं निर्विद्यसे मूढ अपीमां वेदनां गतः ।
इत्युक्ते वचने तैस्तु करुणार्द्रितमानसैः ॥ ७७ ॥
कालयोगात्तु निर्विण्णस्समुज्झातस्त्वं मृगात्ययात् ।
तानब्रवीः प्राञ्जलिस्त्वं तेभ्यो नत्वाऽथ दूरगः ॥७८॥
अहो अधन्यता मेऽद्य यदहं विप्रवंशजः ।
भूत्वाऽपि वृत्तिमापन्नो मृगमांसैः स्वयं हृतैः ॥ ७९ ॥
पश्चात्तप्तोऽस्म्यहं श्रेष्ठाः प्रायश्चित्तं वदन्तु मे ।

सप्तर्षय ऊचुः—

तुष्टा वयं त्वद्विनया दिच्छामस्त्वत्समुद्धृतिम् ॥ ८० ॥
किन्तु त्वं पतितो जातः प्रायश्चित्तं न ते श्रुतम् ।
वक्ष्यामोऽथापि कृपया त्वं कुरुष्व यथोदितम् ॥ ८१ ॥
पात्रापात्रविचारो न रामनाम्नां प्रकीर्तने ।
श्रवणे चोपदेशे च तस्मात्तत्तेऽद्य तु क्षमम् ॥ ८२ ॥
रामनाम समुच्चार्य यस्मात् पापान्न मुच्यते ।
त्रिलोक्यामास्ति तन्नैव सत्यमेतत् प्रकीर्तितम् ॥ ८३ ॥
जातोऽद्यैव रघोर्वंशे रामनाम वहन् हरिः ।
त्वं तदाम्नाय भक्त्याऽद्य मोक्ष्यसे सर्वपातकैः ॥ ८४ ॥
उपविश्याश्वत्थमूले कामक्रोधौ विसृज्य च ।

आजानुबाहुं दीर्घाक्षं नीलकुञ्चितमूर्द्धजम् ॥ ८५ ॥
प्रगृह्य वामहस्तेन चापं सव्येन सायकम् ।
प्रावृषेण्यपयोवाहस्वच्छकान्तिमनोहरम् ॥८६॥
निष्काभरणाविस्तीर्णवक्षसं वनमालिनम् ।
सुप्रसन्नमुखाम्भोजं सुस्पृष्टमणिकुण्डलम् ॥ ८७ ॥
चिन्तयन् राघवं बुध्या रामनाम जपाऽऽदृतः ।
उपकृत्येति कृपया निवृत्तास्ते स्वकं पदम् ॥ ८८ ॥
त्वं ततः पुत्रदारादिचिन्तामुत्सृज्य दूरतः ।
राम रामेति रामेति जपन् निश्चलतां गतः ॥ ८९ ॥
कालेनाल्पेन ते देहं वल्मीकः प्रावृणोन्महान् ।
अतीते वत्सरे काले त्वस्थिमात्रावशेषितम् ॥ ९० ॥
जपन्तं रामरामेति वल्मीकाच्छादिताङ्गकम् ।
रामनामजपान्मुक्तपातकं त्वां विचिन्तयन् ॥९१॥
अहं कमण्डलुजलैरभ्युक्ष्य त्वां न्यबोधयम् ।
कायं च पूर्ववत् कृत्वा तपसे त्वां समैरयम् ॥ ९२ ॥
स्ववृत्तिमनुचिन्त्य त्वं यतः खिन्नोऽभवः पुरा ।
अतीतानां विस्मरणं ततोऽहमददां तव ॥ ९३ ॥
ततश्शुद्धात्मतां प्राप्य मुनिश्रेष्ठत्वमागतः ।
यत्त्वं वल्मीकतो जातो वाल्मीकिरिति तद्भवान् ॥९४॥
इदमेव नवं जन्म तव कृत्वाऽहमाह्वयम् ।
वाल्मीकिरिति तेन त्वं ख्यातो नाम्नाऽमुनैव ते ॥९५॥

ख्यातो लोके सर्वलोकैः रामनाम्नाऽसि संमतः ।
तस्मात्वं कुरु रामस्य चरितं काव्यरूपतः ॥ ९६ ॥

न ते वागनृता काव्ये काचिदत्र भविष्यति ।
रसपुष्टिर्भावपुष्टिः श्लोकानां ते भविष्यति ॥ ९७ ॥

नचापशब्दो भविता न चार्थगुणविच्युतिः ।
प्रमाणं रामचरिते काव्यं तव भविष्यति ॥ ९८ ॥

रहस्यं च प्रकाशश्च रामस्य चरितं महत् ।
तवैव विदितं भूयात् नान्यो ज्ञास्यति तत्वतः ॥ ९९ ॥

इत्युक्ते च मया तत्र वाक्यमूचे सरस्वती ।

सरस्वत्युवाच—

मा ते भूत् काव्यकरणे भयं शब्दार्थसंश्रयम् ॥ १०० ॥

यथा यथा कर्षसि मां शब्दतश्चार्थतोऽपि वा ।
तथा तथाऽनुयास्ये त्वां त्वदाशयवशानुगा ॥ १०१ ॥

तव यत्नं विनैवाऽहं रसं भावं च पोषये ।
त्वन्मूलतः कृतार्था स्यामुक्त्वा रामकथां मुने ॥१०२॥

त्वन्मार्गालम्बनाद्ये वै कवयो राघवीं कथाम् ।
विवक्षन्तीह तेषां च भविष्यामि वशानुगा ॥१०३॥

पश्चात् कवीनामाधारं काव्यं तव भविष्यति ।
रञ्जयिष्यन्ति लोकांस्तु कवयस्त्वत्पथानुगाः ॥१०४॥

इत्युक्तवत्यां वाग्देव्यां सावित्री वाक्यमब्रवीत् ।

सावित्र्युवाच—

कुरु रामकथां पुण्यां काव्यरूपां मनोरमाम् ॥ १०५ ॥
प्रविष्टा स्याश्च ते काव्ये प्रतिश्लोकसहस्रकम् ।
विभक्तावयवा भूत्वा चतुर्विंशतिधा ह्यहम् ॥ १०६ ॥
काव्यचिन्तैकमनसा त्वया चेदनुपास्थिता ।
न ते कुप्यामि बुद्धेश्च प्रसादं ते ददाम्यहम् ॥ १०७ ॥
त्वन्मार्गालम्बतो ये स्यू रामस्य चरितं शुभम् ।
काव्मात्मनोद्यताः कर्तुं यशसे वा धनाय वा ॥ १०८ ॥
प्रसीदामि च तेभ्योऽपि तेन मे स्यात् कृतार्थता ।

ब्रह्मोवाच—

इत्येवमनुगृह्यैनं निवृत्ताः स्मो वयं मुने ॥ १०९ ॥
अथायं ज्ञानतो वीक्ष्य कृत्स्नां रामस्म सत्कथाम् ।
राघवस्य प्रसादेन अस्माकं च विशेषतः ॥ ११० ॥
रामायणं महाकाव्यं चकार चरितव्रतः ।
चतुर्विंशतिसाहस्रं श्लोकानामुक्तवानृषिः । १११ ॥
गायत्र्याद्याक्षरं त्वादौ विन्यस्यारब्धवांस्ततः ।
प्रतिश्लोकसहस्रस्य समाप्तावेकमक्षरम् ॥ ११२ ॥
विनियुञ्जंश्च गायत्र्या न्यबध्नाद्राघवीं कथाम् ।
त्रिवर्गमात्रशरणशरण्यां प्रथमं मुनिः । ११३ ।
श्रीरामस्म महीप्राप्तिपर्यन्तां निर्ममे कथाम् ।
ततश्चतुर्वर्गपरैस्सेवनीयां प्रयत्नतः । ११४ ।

स्वधामप्राप्तिपर्यन्तां राघवस्याकरोत्कथाम् ।
तस्मादुक्तं नित्यपाठे मुमुक्षूणां च पाठके ॥११५॥
सप्तापि काण्डाः पाठ्यास्स्युष्षट्काण्डाः फल काम्यया ।
तस्मान्नारद वाल्मीकिप्रोक्ता रामस्य सत्कथा ॥११६॥
प्रशस्ता सर्वलोकेषु स च तत्करणान्मुनिः ।
उपदेष्टृत्वाच्च तस्याः कथायास्ते यशःकृते ॥११७॥
आद्ये सर्गे वर्णितस्त्वं श्लाघ्यस्त्वं तेन भावितः ।
एवं त्वया कृताः प्रश्नास्सम्यगुच्चरिता मया ॥११८॥
मुने रामायणं कृत्स्नं चर गायन्नितःपरम् ॥११८½॥

इति श्रीस्कन्दोपपुराणे पुराणवैभवखण्डे ब्रह्मनारदसंवादे
रामायणप्रणयनकथनं नाम
॥ चतुर्विंशोऽध्यायः ॥
(॥ इति द्वितीयोऽध्यायः ॥)

॥ श्रीरामो जयति ॥

॥ अथ तृतीयोऽध्यायः ॥

नारद उवाच—

तात प्रीतोऽस्मि सञ्जातो रामायणकथाश्रवात् ।
इतःपरं तां गास्यामि वीणाहस्तश्चरन् मुहुः ॥ १ ॥
मन्ये पूज्यतमं लोके वाल्मीकिं मुनिपुङ्गवम् ।
श्रीरामायणवेदस्य काम्यपाठः कथंविधः ॥ २ ॥

लोकनाथ मम ब्रूहि शुश्रूषोः प्रणतस्य च ।

ब्रह्मोवाच—

धन्योऽसि नारद मुने वक्ष्यामि शृणु ते हितम् ॥ ३ ॥
श्रीरामायणवेदस्य काम्यपाठविधिक्रमम् ।
चतुर्विधः काम्यपाठस्तत्तत्कालोचितः स्मृतः ॥ ४ ॥
श्रीमत्सुन्दरकाण्डस्य सप्तसर्गप्रपाठनम् ।
सर्वाभीष्टप्रदं प्रोक्तममराणामपि हितम् ॥ ५ ॥
शुभे दिवसनक्षत्रे सङ्कल्प्य विधिपूर्वकम् ।
यथाशक्ति सुवर्णेन रजतेनाथ ताम्रतः ॥ ६ ॥
रामस्य लक्ष्मणस्यापि वैदेह्याश्च हनूमतः ।
विधाय प्रतिमास्ताश्च प्रतिष्ठाप्य यथाविधि ॥ ७ ॥
पूजयेद्दर्भपुञ्जे वा त्वरा चेद्रघुनन्दनम् ।
सहस्रनामभिर्विष्णोरर्चयेच्च दिनेदिने ॥ ८ ॥
पठेत्सुन्दरकाण्डस्य सप्तसर्गीं विधानतः ।
यदा तु सप्तमस्सर्गः काण्डस्यान्तिमसर्गकः ॥ ९ ॥
भविष्यति तदन्तं तु सप्त सर्गान् पठेद्व्रती ।
अथ श्रीरामचन्द्रस्य सर्गं राज्याभिषेचने ॥१०॥
पठित्वा पूजयित्वा च पाठनं तु समापयेत् ।
समाप्तिदिवसे कुर्यात् बहुब्राह्मणभोजनम् ॥११॥
यद्यद्विचिन्तितं चित्ते तत्सर्वं तु समश्नुते ।

॥ अथ पुनर्वसुपारायणविधिः ॥

अथ रामायणस्यास्य पाठं वक्ष्ये पुनर्वसौ ॥१२॥
मुक्तिमुक्तिफलं स्तुते पाठस्तस्य पुनर्वसौ ।
निर्माय मण्डपं दिव्यं नानालङ्कारशोभितम् ॥१३॥
रत्नैर्वा मौक्तिकैर्वाऽपि धातुभिर्वा विशेषितैः ।
कृत्वा चित्रा रङ्गवल्लीस्तत्र वेदिं विधाय च ॥१४॥
अधोव्रीहीन् प्रस्थमात्रान् तुषहीनान् प्रसार्य च ।
तावन्मात्रान् चन्द्रशुभ्रान् तदुपर्यपि तण्डुलान् ॥१५॥
ततश्चणकखण्डांश्च निस्तुषान् प्रस्थमात्रकान् ।
ततस्तिलान् प्रस्थमात्रान् ततो माषांस्तथाविधान् ॥
तदुपर्यपि गोधूमैः मुद्गैर्वा हरितैर्भृतम् ।
घटं संस्थाप्य तच्छृङ्गे नारिकेलफलोपरि ॥१७॥
सुवर्णप्रतिमां सीतारामलक्ष्मणशोभिनीम् ।
निधाय च प्रतिष्ठाप्य सर्वोपकरणैर्युतः ॥१८॥
पूजां पुरुषसूक्तेन विधाय च यथाविधि ।
अनुज्ञाप्य द्विजानग्र्यान् नान्दीश्राद्धं विधाय च ॥१९॥
हिरण्येनैव पूर्णेन तोषकेण द्विजन्मनाम् ।
श्रीरामायणकोशेऽथ रामपूजां विधाय च ॥२०॥
पुनर्वसुदिने शुद्धे काले सज्जनवासके ।
आञ्जनेयस्वरूपांश्च श्रोतॄन् भक्तान् रघूत्तमे ॥२१॥
वृत्वा यथासंभवञ्च कृत्वा चित्तं रघूत्तमे ।

नारदेनोपदिष्टार्थसर्गमारभ्य भक्तितः ॥२२॥
उच्चैःस्वरं रागयुक्तं पठेत् सर्गांस्तु विंशतिम् ।
स्वयमेव पठेच्छक्तो यदि सर्गानविक्लवम् ॥२३॥
नचेद्विप्रमुखेनैव पठेत्तत्स्यात्तु मध्यमम् ।
पठितं यच्च भुक्तेन यच्च व्यग्रेण वा पुनः ॥२४॥
यच्चास्पष्टपदं भूयात् तत्सर्वं निष्फलं स्मृतम् ।
मध्याह्ने तु समायाते पाठं कृत्वा समाप्य च ॥२५॥
पञ्चोपचारैस्संपूज्य गुडान्नादिनिवेदनैः ।
ब्राह्मणान् भोजयेत्पश्चात् दधिमध्वाज्यसंयुतम् ॥२६॥
भोजनानन्तरं सर्वैस्सह विश्रम्य किञ्चन ।
अधृत्वाऽपि च ताम्बूलमनाभाष्य च पुल्कसैः ॥२७॥
वक्तारं ब्राह्मणश्रेष्ठं सर्वशास्त्रार्थपारगम् ।
वाक्यार्थचतुरं दान्तमलुब्धं सत्यवादिनम् ॥२८॥
नानोपचारैस्संपूज्य तोषयित्वा च तं धनैः ।
पूर्वं वृत्वोपवेश्यैनमुच्चैरासनमण्डले ॥२९॥
उपविश्य ततोऽधस्तात् रामे चित्तं निधाय च ।
पूर्वाह्णे पठितान् सर्गान् प्रार्थयेद्वाचयेति च ॥३०॥
तदुक्तार्थांश्च शृणुयान्मङ्गळाशासनान्तकम् ।
ततस्सायं विधिं कृत्वा विष्णोर्नामसहस्रतः ॥३१॥
रघुनाथं समभ्यर्च्य ततो भुक्त्वा स्वपेत् क्रमात् ।
एवं दिनेदिने कुर्वन्नुपचारैरनुक्रमात् ॥३२॥

पठित्वा विंशतिं सर्गान् वाचयेच्च यथाक्रमम् ।
प्रत्येकदिवसे कुर्यादन्यान्यैस्संभवे सुमैः ॥३३॥
सहस्रनामभिः पूजां श्रीरामस्य पदाब्जयोः ।
सीतापाणिग्रहो यत्र यत्र सुग्रीवसख्यकम् ॥३४॥
अङ्गुलीयकदानञ्च रावणस्य वधस्तथा ।
तत्र तत्र दिने कुर्यात्तूर्यलास्यपुरस्सरम् ॥३५॥
अभ्यर्च्यं रघुनाथस्य वक्तारं च प्रपूजयेत् ।
पठित्वैवं क्रमेणैव सप्तविंशतिवासरान् ॥३६॥
पुनः पुनर्वसौ प्राप्ते रामस्य विदितात्मनः ।
पट्टाभिषेकसर्गन्तु पठेन्मङ्गळपूर्वकम् ॥३७॥
पुनः पुनर्वसुप्राप्तिस्तारावृद्धिक्षयादिभिः ।
सप्तविंशे दिने चेत्स्यात् तदा तत्रैव वासरे ॥३८॥
शिष्टान् सर्गान् वाचयेत्तु यावद्रामाभिषेचनम् ।
अथ वृद्ध्या तु सा चेत्स्यादेकोनत्रिंशवासरे ॥३९॥
अष्टाविंशादिनं पाठशून्यं कृत्वाऽर्चयेद्विभुम् ।
एकोनत्रिंशदिवसे पठेत् पट्टाभिषेचनम् ॥४०॥
अष्टाविंशे क्रमेणैव सा चेत् तत्र तु वासरे ।
पठेत् पट्टाभिषेकाख्यसर्गमात्रं कृतोत्सवः ॥४१॥
पूर्वेद्युः पाठसमये तं सर्ग मवशेषयेत् ।
प्रातःकालेऽह्नि यत्नातिव्याप्तिर्दृष्टा पुनर्वसोः ॥४२॥
आरभेत च तत्रैव तत्रैव च समापयेत् ।

दिनद्वये समा चेत्सा रौद्रविद्धां परित्यजेत् ॥४३॥
सप्तविंशावरान् विप्रान् दधिमध्वाज्यपायसैः ।
भोजयेत् परया भक्त्या ध्यात्वा राघवविग्रहान् ॥४४॥
वक्तारं पठितारञ्च यथाशक्ति प्रपूजयेत् ।
एवमाराधिते रामे सर्वलोकशरण्यके ॥४५॥
वन्ध्या नारी प्रसूयेत पुत्रं सर्वगुणान्वितम् ।
आपन्नो मुच्यते कृच्छ्रादपमृत्युं व्यपोहति ॥४६॥
अतिक्रान्तचिकित्साच्च रोगादुल्लाघतां व्रजेत् ।
भक्तिं च रघुनाथस्य पादयोर्विन्दते दृढाम् ॥४७॥
अन्ते ज्ञानेन मुक्तस्स्यादान्तं स्याद्दुःखवर्जितः ।
एष तूद्दिशतः प्रोक्तो मया ते फलविस्तरः ॥४८॥
नाहं पटुः प्रवक्तुं स्यां संपूर्णफलविस्तरम् ।
यं यं कामयते कामं स स हस्ते भविष्यति ॥४९॥
मुमुक्षोरपि कार्यं स्यादेतत्पारायणं भुवि ।
एवं कर्तुमशक्तश्चेद्वित्तलोभं विना द्विजः ॥५०॥
यथाशक्त्यर्चयित्वा तु रामं सर्वार्थसिद्धिदम् ।
पूर्वोक्तरीत्या सर्गाणां केवलं विंशतिं पठेत् ॥५१॥
तस्याऽपि फलसामग्र्यं दद्याद्धि रघुनन्दनः ।

॥ अथ नवरात्रपारायणविधिः ॥

अतःपरं प्रवक्ष्यामि नवरात्रे तु पाठनम् ॥५२॥

चैत्रे वाऽऽश्वयुजे मासि प्रथमायां शुभे दिने ।
आरभ्य च नवम्यन्तं पठेत् प्रातरपि क्रमात् ॥५३॥
दशम्यां रावणवधं पठित्वा तत्र वै दिने ।
रामपट्टाभिषेकस्य पठन् सर्गं समापयेत् ॥५४॥
पूर्वोक्तविधिमातिष्ठेत् अत्रापि नियतो द्विजः ।
अशक्तः केवलं पाठमाचरेत् भक्तिसंयुतः ॥५५॥
सर्वसिद्धिस्ततो भूयात् आधिव्याधी विनश्यतः ।
रघुनाथः प्रसन्नात्मा तस्य स्यादनुगस्सदा ॥५६॥
पुत्रमित्रकलत्रेषु न हानिं द्रक्ष्यते क्वचित् ।

॥ अथ ऐच्छिकपारायणविधिः ॥

अथ रामायणस्यास्य वक्ष्ये मुनिवरोत्तम ॥५७॥
पारायणं त्वैच्छिकं यत् कालापेक्षा न तत्र हि ।
महाव्याधिसमुद्भूतौ विश्लेषे बन्धुजाययोः ॥५८॥
राष्ट्रक्षोभे च दुर्भिक्षे भूपालाच्च भयागमे ।
यस्यां कस्यां च तारायां जन्मर्क्षे च विशेषतः ॥५९॥
श्रीरामायणकाव्यस्य पारायणमथाचरेत् ।
न सर्गसंख्यानियमो न घटस्थापनादिकम् ॥६०॥
न चापि दिनसंख्याऽत्र पारायणसमापने ।
मन्द्रस्वरं पठेत् सर्गान् यथासौकर्यमेव च ॥६१॥
भुक्त्वा तु न पठेत् किञ्चित् न च प्रवचनं चरेत् ।

पुष्पैर्लब्धैश्च तुलसीदलैर्बिल्वदलैरपि ॥६२॥
विष्णोर्नामसहस्रेण प्रयतः पूजयेत् प्रभुम् ।
सर्वसङ्कल्पसिद्धिः स्यादेतावन्मात्रके कृते ॥६३॥
जन्मलग्नवशाद्वाऽपि चन्द्रलग्नवशादपि ।
ग्रहाणां क्रूरता यस्मिन्काले भवति दुःखदा ॥६४॥
विशेषेणार्कपुत्रस्य चन्द्रपुत्रस्य वा गुरोः
दशा चान्तर्दशा यत्र काले भवति दुःखदा ॥६५॥
आत्मपीडा दारपुत्रपीडा चापि धनक्षयः ।
तदा रामायणं भक्त्या काम्यपाठक्रमात्पठेत् ॥६६॥
प्रसङ्गादेष कथितः पाठो रामायणस्य तु ।

॥ अथ पुनर्वसुत्रयापेक्षपारायणविधिः ॥
ऐच्छिकं तुर्यपाठन्तु काम्यं वक्ष्यामि नारद ॥६७॥
पुनर्वसौ समारभ्य तृतीयेऽथ पुनर्वसौ ।
समापयेत् प्रतिदिनं पठेच्च दशसर्गकान् ॥६८॥
गीताया एकमद्ध्यायमपि भक्त्याऽऽदृतः पठेत् ।
गृहे देवालये वाऽपि रामचन्द्रस्य सन्निधौ ॥६९॥
पूजयित्वा चंपकैर्वा पद्मैर्वा तुलसीदलैः ।
विष्णोर्नामसहस्रेण पायसापूपमिश्रितम् ॥७०॥
निवेदयित्वा दिव्यान्नं आरभेत ततः परम् ।
अनुज्ञाप्य द्विजान् स्वर्णैः सङ्कल्प्य च यथाविधि ॥

पुण्याहवाचनं कृत्वा कृत्वा शुद्धं च मण्टपम् ।
श्रोतारमेकं वृत्वा च पठेद्वै दश सर्गकान् ॥७२॥
सायमर्थप्रवचनं नावश्यकमिहेरितम् ।
विष्णोर्नाम्नां सहस्रेण रामनाम्नां शतेन वा ॥७३॥
अभ्यर्च्य रात्रौ श्रीरामं तत्क्षीरं निवेदयेत् ।
पाठस्य बहुकालेन साद्धयत्वाद्दैवयोगतः ॥७४॥
आशौचेनाथवा रोगै राजोपप्लवनादिभिः ।
यजमानस्य विघ्नश्चेत् स्वस्थानेऽन्यं प्रकल्पयेत् ॥७५॥
यजमानः पठेद्भक्त्या पाठमेनं दिनेदिने ।
अशक्तश्चेत्तु शृणुयात् पाठकं परिकल्प्य च ॥७६॥
चतुःपञ्चाशताऽहोभिर्दशसर्गक्रमेण तु ।
एवं पारायणं कृत्वा तृतीये तु पुनर्वसौ ॥७७॥
पूर्वोक्तेन क्रमेणैव श्रीमतो राघवप्रभोः ।
महोत्सवं प्रकुर्वीत सर्गं राज्याभिषेचनम् ॥७८॥
पठित्वा पूजयित्वा च पाठं तत्र समापयेत् ।
काम्यपाठस्त्वयं वत्स करणीयः सुखेन च ॥७९॥
सुलभस्स्याद्दरिद्राणामपि सर्वार्थसिद्धिदः ।
आवश्यकास्त्रिवर्गस्य मर्त्यानां कामनावताम् ॥८०॥
पुनर्वसुमहापाठ उत्तमोत्तम ईरितः ।
अन्ये पाठाश्चोत्तमास्स्युः यस्मात्त्रैवर्गिका हि ते ॥८१॥
इत्युक्तो गुणविस्तारस्संग्रहान्नारदाद्य ते ।

श्रीरामायणवेदस्य काम्यपाठक्रमस्य तु ॥८२॥
विस्तराद्वक्तुमीशस्स्यात् स एव रघुनन्दनः ।
गच्छ कामं चरन् पुत्र गायन् रामायणं सदा ॥८३॥

दालभ्य उवाच—

श्रुत्वा रामायणस्येत्थं माहात्म्यं नारदो मुनिः ।
नत्वा चतुर्मुखं सद्यो वाल्मीकिमभिगम्य च ॥८४॥
तं नमस्कृत्य बहुशः प्रशस्य च पुनःपुनः ।
गीतं कुशलवाभ्यां च श्रुत्वा रामायणं ततः ॥८५॥
रामं नन्तुमथागच्छ दयोद्धचां मुनिभिस्सह ।
अत्रान्तरे मृतं पुत्रमादायागान्नृपान्तिकम् ॥८६॥
विप्रः कोऽपि शपन् रामं तदैनं नारदोऽब्रवीत्
प्रभो राघव धर्मज्ञ सर्वभूतहिते रत ॥८७॥
किञ्चित्ज्ञ इव भासीह द्विजात्मजमृतिं प्रति ।
शूद्रः करोति च तपो दण्डकायां वने क्वचित् ॥८८॥
तं हत्वा जीवय सुतं ब्राह्मणस्य कृपावशात् ।
इति श्रुत्वा रघुवरः पुष्पकेण सहायुधः ॥८९॥
शंबूकाख्यं दण्डकायां शूद्रं हत्वा तपस्विनम् ।
जीवयित्वा द्विजसुत मगस्त्यमभिवाद्य च ॥९०॥
गतः पुनरयोद्धयां च वाजिमेधेन चेजिवान् ।

॥ अथ नारदकृत पुनर्वसुपारायणघट्टः ॥

निर्माय पर्णशालां तु नारदो मुनिभिस्सह ॥९१॥

गङ्गाद्वारे महापुण्ये रामपूजनतत्परः ।
पुनर्वसौ समारभ्य श्रीरामायणमादृतः ॥९२॥
सर्गाणां विंशतिं नित्यं पठित्वा विधिपूर्वकम् ।
वक्तारं कल्पयित्वाऽत्र वाल्मीकिं मुनिपुङ्गवम् ॥९३॥
व्रतं समापयामास पुनः प्राप्ते पुनर्वसौ ।
अथ दृश्यत्वमापन्न स्साक्षात्तत्रोटजाङ्गणे ॥९४॥
स्निग्धेन्दीवरपत्राभः पद्मरक्तान्तलोचनः ।
युक्तः किरीटकटकेयूराङ्गुळिभूषणैः ॥९५॥
वनमालायुतोरस्कः पूर्णचन्द्रनिभाननः ।
मन्दस्मितप्रभारूढबिंबोष्ठविलसन्मुखः ॥९६॥
वामहस्तेन कोदण्डं दक्षिणेन च सायकम् ।
बिभ्रत्तूणौ च संपूर्णौ निशितैस्सायकोत्तमैः ॥९७॥
पार्श्वस्थया च सर्वाङ्गभूषणोज्वलया पुनः ।
सयज्ञकरया देव्या सेव्यमानश्च सीतया ॥९८॥
अग्रे धृताञ्जलिं प्रह्वं हनुमन्तं कृपाढ्यया ।
दृष्ट्याऽनुगृह्णन् तमपि प्रसन्नवदनेक्षणम् ॥९९॥
सेव्यमानो लक्ष्मणेन पार्श्वे प्राञ्जलिना मुदा ।
नारदस्तु तमालोक्य प्रणिपत्य सहस्रशः ॥१००॥
स्तुत्वा बहुविधैः स्तोत्रैर्वैदिकैर्लौकिकैरपि ।
पाहि पाहीति च ततोऽब्रवीत् प्रेमाश्रुलोचनः ॥१०१॥

श्रीराम उवाच—

वत्स नारद तुष्टोऽस्मि त्वद्रामायणपाठतः ।
पारायणात्पुनर्वस्त्वां विशेषानुग्रहो मम ॥१०२॥
यथाऽनेनास्मि तुष्टोऽद्य तथा न तपसा तव ।
रामायणं यत्र यत्र भक्तितोऽभक्तितोऽपि वा ॥१०३॥
पठ्यते तत्र सान्निद्ध्य महं कुर्वे यथेह तु ।
यो वांछति प्रसादं मे स तु रामायणं पठेत् ॥१०४॥
श्रीमद्वाल्मीकिवचसां माधुर्यं मां प्रकर्षति ।
अहं चाकर्णयिष्यामि त्वया च त्वादृशैस्सह ॥१०५॥
स च कालो भवेच्छीघ्रं त्वमत्यागच्छ यत्नतः ।
ब्रियतामद्य च वरो यथेष्टं प्रददामि ते ॥१०६॥

नारद उवाच—

किमिहाद्य वरैः कार्यं निस्सङ्गस्य ममेतरैः ।
अयं वरो मे परमो यदेवं त्वां विलोकये ॥१०७॥
दृष्टः मया शङ्खचक्रगदापीतांबरान्विता ।
कौस्तुभाभरणग्रीवा लक्ष्मीयुक्तोरसाऽन्विता ॥१०८॥
तव सा क्षीरपाथोधौ मूर्तिर्नारायणाह्वया ।
वैकुण्ठस्थानगा मूर्तिर्भुजाष्टकविभूषिता ॥१०९॥
सुनन्दनन्दप्रमुखैस्सेविता नित्यसूरिभिः ।
दृष्टा तपःप्रभावेन कृपया दर्शिता त्वया ॥११०॥
नरनारायणाभिख्ये लोकरक्षार्थमाहते ।

तपस्विवेषे ते मूर्तीं दृष्टे बदरिकाश्रमे ॥१११॥
सर्वावतारबीजात्मा वैराजी साऽपि ते तनुः ।
नानाविश्वमयी दृष्टा श्वेतद्वीपे मया पुरा ॥११२॥
न तथा हर्षमगमं यथाऽद्य तव दर्शनात् ।
बाणकोदण्डपाणेश्च जानक्या सेवितस्य च ॥११३॥
दिव्यतेजोनिधेस्तेऽद्य दर्शनान्निर्वृणोम्यहम् ।
मनो मे मोदतेऽत्यर्थं मन्ये पूर्वं न चेदृशः ॥११४॥
तदहं प्रार्थये त्वाऽद्य वरं सर्ववरोत्तमम् ।
यदा यदाऽहं वांछामि द्रक्ष्यामि त्वां तदा तदा ॥
एवं बाणधनुष्पाणिं सीतालक्ष्मणसेवितम् ।
अचञ्चला च त्वद्भक्तिः स्यान्मे कारुण्यतस्तव ॥११६॥
किं चैवं काम्यपाठेन श्रीरामायणमादरात् ।
पुनर्वसौ समारभ्य यः पठेद्विधिपूर्वकम् ॥११७॥
भक्तितो दंभतोवाऽपि तस्य त्वं प्रीतमानसः ।
धर्मार्थिकाममोक्षाख्यं चतुर्वर्गं दिश प्रभो ॥११८॥
पुत्रान् पौत्रान् संपदश्च ज्ञानमन्ते च सोऽश्नुताम् ।

श्रीराम उवाच—

सत्यमुक्तं त्वया ब्रह्मन् मद्भक्ता मामकीं तनुम्॥११९॥
कोदण्डपाणिं संद्रष्टुं समीहन्ते न चान्यथा ।
ईदृशी मे तनुः पूर्वं स्वतेजःपुञ्जसंवृता ॥१२०॥
कोटिसूर्यसमाभासा रक्तचन्दनसेविता ।

सीतया सेविता पार्श्वे वालव्यजनहस्तया ॥१२१॥
मायां दर्शनमात्रेण निहन्ती भेदधीप्रदाम् ।
चिरमाशासमानाय मत्प्रसादाभिकांक्षया ॥१२२॥
सनत्कुमाराद्विज्ञाय ममाविर्भावमञ्जसा ।
सारथ्यान्मन्त्रकृत्याच्च इक्ष्वाकुकुलसेविने ॥१२३॥
दर्शिताऽभूत् सुमन्त्राय प्रस्थास्येऽहं यदा वनम् ।
शबर्यै शरभङ्गाय वालिने च सुमूर्षवे ॥१२४॥
दर्शिताऽभूदिदानिं त्वं दृष्टवान् मत्कथाबलात् ।
नित्यं रामायणं ये वा पठेयुः कामतोऽपि वा ॥१२५॥
मुक्तये वाऽपि ते सर्वे एवंरूपं तु मां मुने ।
अन्ते दृष्ट्वा प्राप्नुयुर्मां नात्र कार्या विचारणा ॥१२६॥
य वा पुनर्वसुदिने समारभ्य यथाविधि ।
श्रीमद्रामायणं भक्त्या पठेयुः पुत्रकाम्यया ॥१२७॥
धनाप्तये वा विपदां तारणायाथवा मुने ।
अन्ते तेषां सुप्रसन्नः पाठस्यास्य यथेप्सितम् ॥१२८॥
सर्वान् कामान् ददाम्येव न ते शोचन्ति भूतले ।
प्रारब्धमपि दुःखं स्यात् तेषां निर्वीर्यमञ्जसा ॥१२९॥
नाहं स्वाध्यायतोवाऽपि बाह्याभ्यन्तरपूजनात् ।
तपसा त्यागतो वाऽपि प्रसीदामि तथा मुने ॥१३०॥
यथा रामायणकथापठनश्रवणादिभिः ।
दर्शयिष्यामि ते मूर्तिमेवंरूपां मनोरमाम् ॥१३१॥

यदा यदा वाञ्छसि त्वं यत्र क्वापि मुनीश्वर ।
मत्प्रसादाद्दक्षशापो न त्वामभ्यभवन्मुने ॥१३२॥
अत्र स्थितं मासमात्रं क्षणमात्रमतःपरम् ।
नात्र स्थेयमितस्तस्मात् गच्छ लोकान् यथासुखम् ॥
त्वं च नित्यञ्चरन् गायेः श्रीरामायणमादृतः ।
प्रकाशय कथामेतां लोकानां सुखसिद्धये ॥१३४॥
वाल्मीके त्वं च शिष्याभ्यां गायद्भ्यां मत्कथां सदा ।
आनन्दमाप्नुहि परं नान्यलभ्यं कथञ्चन ॥१३५॥
आहरिष्याम्यश्वमेधं स्वर्णसीतासमन्वितः ।
आगच्छ सह शिष्याभ्यां मत्पुत्राभ्यां महाध्वरम् ॥
तदा कर्मान्तरे काव्यं त्वत्कृतं मत्कथाश्रयम् ।
श्रोष्यामि बहुभिस्सार्द्धं सभायां राजभिस्सह ॥१३७॥
आऽश्वमेधकथाघट्टं मुनिभिश्च भवादृशैः ।
आन्तं ततश्च श्रोष्यामि त्वं यशोभाग्भविष्यसि ॥
पुत्रौ च स्वीकरिष्यामि सर्वलोकस्य सन्निधौ ।
इदं रहस्यं प्रोक्तं ते त्वया प्रोक्तं च काव्यके ॥१३९॥
त्वं निवत्स्यसि मल्लोके मत्समो बहुकल्पकम् ।
मामेवैष्यसि चान्ते त्वं सत्यं प्रतिश्रृणोमि ते ॥१४०॥

दाल्भ्य उवाच—

इत्युक्त्वाऽन्तर्हितो रामस्सीताद्यैरनुगैस्सह ।
अद्यापि गायति मुनिश्वरन् रामायणं सदा ॥१४१॥

स एनमर्थं प्रावोचद्व्यासायामिततेजसे ।
उपादिशत् स्वपुत्राय सोऽपि राजन् शुकाय च॥१४२॥
स मे कथितवान् पूर्वं प्रसङ्गाद्भक्तसंसदि ।
मया तवोपदिष्टं च श्रीरामायणवैभवम् ॥१४३॥
त्वं चादित्ये समायाते मदुक्तविधिपूर्वकम् ।
पठन् रामायणं भक्त्या वक्तारं परिकल्प्य च ॥१४४॥
श्रोतॄंश्च परमोदारान् तरिष्यसि महापदम् ।

युधिष्ठिर उवाच—

श्रीमन्मुनिगणश्रेष्ठ दाल्भ्य सर्वज्ञसंमत ॥१४५॥
धन्योऽस्म्यनुगृहीतोऽस्मि विपदं तारितोऽस्मि च ।
अहं रामायणं भक्त्या पठिष्यामि पुनर्वसौ ॥१४६॥
वक्ता भव महाभाग नान्योऽस्ति मम संमतः ।

श्रीसूत उवाच—

इत्युक्त्वा पाण्डुतनयस्सम्भारान् भ्रातृभिर्मुदा ॥१४७॥
संपाद्य च ततो वृत्वा श्रोतॄन् भक्तान् रघूत्तमे ।
दाल्भ्यं वक्तारमाधाय द्वारकां प्रेष्य चानुजान्॥१४८॥
गोविन्दं च समानीय प्रोक्तवान् स्वमनीषितम् ।
स चैनमब्रवीद्राजन् तुष्टोऽस्मि तव कार्यतः ॥१४९॥
अस्मिन्नप्यवतारेऽहं मम पूर्वावतारके ।
रामात्मके यच्चालितं तद्योवर्णयते मुदा ॥१५०॥
तदा परवशो राजन् भवामि प्रीतमानसः ।

किमुताऽद्य महीपाल श्रीरामायणपाठतः ॥१५१॥
चलत्वयं विधिस्सर्वः श्रोष्यामि च सह द्विजैः ।

श्रीसूत उवाच—

ततो युधिष्ठिरो राजा संकल्प्य विधिपूर्वकम् ॥१५२॥
द्रौपद्या सह धर्मात्मा पुनर्वसुमहादिने ।
रामायणं यथान्यायं समारभ्य पठन् स्वयम् ॥१५३॥
समापयच्च विधिना कृत्वा कृष्णं सभेश्वरम् ।
यदा सभां पूजयितुमुत्थितो धर्मनन्दनः ॥ १५४ ॥
न ददर्श तदा कृष्णं तत्स्थानेऽन्यं ददर्श ह ।
सव्ये पार्णौ च कोदण्डं दक्षिणे चापि सायकम् ॥
सीतालक्ष्मणसंसेव्यं पादान्ते च हनूमता ।
श्रीरामं पुष्पवर्षेण कीर्यमाणं नभस्सदाम् ॥ १५६ ॥
सूर्यकोटिसमाभासं प्रसन्नवदनाम्बुजम् ।
दृष्ट्वा परवशो भूत्वा हर्षेण कुरुनन्दनः ॥ १५७ ॥
सहस्रकृत्वः प्राणंसीत् तुष्टाव च पुनः पुनः ।
पाद्यार्घ्याचमनीयेन सम्यगाराधयन्मुदा ॥ १५८ ॥
भगवानपि सर्वात्मा राजानमिदमब्रवीत् ।

श्रीभगवानुवाच—

तुष्टोऽस्म्यनेन विधिनां श्रीरामायणपाठतः ॥ १५९ ॥
अवाप्स्यस्यखिलान् कामानन्ते सायुज्यमेष्यसि ।
शत्रून् हनिष्यस्यखिलान् प्रतिज्ञान्ते नृपोत्तम ॥१६०॥

राज्यं प्राप्स्यसि भूयोऽपि भ्रातृभिः परिवारितः ।
इत्युक्त्वाऽऽसीत् पुनः कृष्णस्सर्वालङ्कारशोभितः॥१६१॥
सदस्या विस्मयाम्भोधौ मग्नाः श्रीरामदर्शनात् ।
तुष्टुवुर्द्वारकानाथं तन्माहात्म्यवशीकृताः ॥ १६२ ॥
राजाऽपि कर्म तत् सम्यक्समाप्य विधिपूर्वकम् ।
अन्नैश्च षड्रसोपेतैः सूर्यपात्रविनिर्मितैः ॥ १६३ ॥
ब्राह्मणान् भोजयामास सहस्राधिकसंख्यया ।
वक्कारं पूजयामास कृष्णदत्तैर्धनादिभिः ॥ १६४ ॥

ततो व्यतीते वनवासदुःखे जित्वा रिपून् भीष्ममुखान् महात्मा ।
महोदयैस्सेवितपादपद्मो महीं प्रपेदे महतीं मुदं च ॥ १६५ ॥

श्रीसूत उवाच—

यो रामायणमाहात्म्य मिदमुक्तं मुनीश्वराः ।
पठेद्वा शृणुयाद्वाऽपि स रामे भक्तिमान् भवेत् ॥१६६॥
श्रीरामस्य प्रसादेन सर्वान् कामानवाप्नुयात् ॥ १६६½॥

इति श्रीस्कन्दोपपुराणे पुराणवैभवखण्डे ब्रह्मनारदसंवादे
रामायणमाहात्म्ये काम्यपाठनिरूपणन्नाम
पञ्चविंशोऽध्यायः ॥

॥ इति तृतीयोऽध्यायः ॥

॥ इति श्रीरामायणमाहात्म्यं संपूर्णम् ॥

॥ श्रीरामो जयति ॥

॥ अथ कुमारसंहितोक्तः ॥

॥ श्रीरामायण नवाहपारायणविधिः ॥

माण्डूकणिरुवाच—

कुम्भसम्भव धर्मज्ञ विष्णुभक्त नमोऽस्तु ते ।
रामायणस्य यत्प्रोक्तं नवाहपठनं त्वया ॥ १ ॥
विस्तराच्छ्रोतुमिच्छामि तदद्य मुनिपुङ्गव ।
पूजां पारायणं दानं जपहोमार्चनादिकम् ॥ २ ॥
कथं कार्यं कदा वाऽपि क्वचं वा वद विस्तरात् ।

अगस्त्य उवाच—

मुने वक्ष्यामि ते पृष्टं श्रूयतामवधानतः ॥ ३ ॥
तुष्टोऽस्म्यनेन प्रश्नेन राघवं स्मारितोऽस्म्यहम् ।
धर्मकामनयावाऽपि अर्थकामनयाऽपि वा ॥ ४ ॥
मोक्षकामोऽथ वा रामप्रीतिमात्राभिलाषुकः ।
अपस्मारादिरोगैश्च दुश्चिकित्सैः अपीडितः ॥ ५ ॥
नवग्रहाणां दौस्थ्येन पीडितो वाऽपि चैकद ।
विश्लिष्टबन्धुसंयोगकामुको वा सुतार्थिकः ॥ ६ ॥
श्रीमद्रामायणाख्यस्य इतिहासोत्तमस्य च ।
नवाहपठनं कृत्वा सर्वं सौख्यमवाप्नुयात् ॥ ७ ॥
गृहे देवालये वाऽपि महाभोगाङ्गणान्विते ।

कुर्यान्मण्टपिकां चित्रां पट्टवस्त्रवितानकाम् ॥ ८ ॥
तोरणालङ्कृतां दिक्षु कदळीस्तम्भसंवृताम् ।
कोमळैर्नारिकेळैश्च पक्वैः पूगफळैरपि ॥ ९ ॥
शोभितां रङ्गवल्लीभिश्चित्राभिस्सर्वतो वृताम् ।
शङ्खचक्राब्जमीनादिरूपाभिः कृतभक्तिभिः ॥ १० ॥
महतीं चतुरश्रां च कुर्यात्तत्र च वेदिकाम् ।
तत्र व्रीहीन् संप्रसार्य द्वादशप्रस्थसंमितान् ॥ ११ ॥
अनाहतेन शुक्लेन वस्त्रेणाच्छाद्य तानथ ।
तदर्धपरिमाणेन तण्डुलांस्तस्य चोपरि ॥ १२ ॥
निक्षिप्य तत्र विलिखेत् पद्ममष्टदळं शुभम् ।
परितस्तस्य विलिखेत् भूपुरद्वितयं ततः ॥ १३ ॥
त्रिकोणद्वयमालिख्य कर्णिकायां सरोरुहः ।
प्रणवं रामबीजञ्च सीताबीजं तथैव च ॥ १४ ॥
विलिख्य दर्भैराच्छाद्य तण्डुलांस्तान् समस्ततः ।
तस्य चोपरि गङ्गादितीर्थसंपूरितं घटम् ॥ १५ ॥
हाटकं राजतं वाऽपि ताम्रं वा स्थापयेत् शुभम् ।
पञ्चपल्लवकूर्चादिपट्टवस्त्राद्यलंकृते ॥ १६ ॥
उदक्छिखं नारिकेळं पक्वं विन्यस्य तत्र च ।
सुवर्णस्याथ रौप्यस्य पलद्वयविनिर्मिताम् ॥ १७ ॥
स्नापितां पञ्चगव्येन यथावच्च प्रतिष्ठिताम् ।
प्रतिमां यत्राष्टदळपद्ममध्ये रघूद्वहः ॥ १८ ॥

उत्सङ्गे सीतया सार्द्धं भाति चिन्मुद्रयाऽन्वितः ।
स्थापयित्वा द्विजश्रेष्ठैरनुज्ञातो गणाधिपम् ॥ १९ ॥
पूजयित्वा प्रार्थ्य तं च श्रीरामायणपुस्तके ।
प्रतिमायां च संपूज्य ततस्संकल्पयेन्मुदा ॥ २० ॥

॥ तत्र सङ्कल्पः ॥

मम अनादावस्मिन्संसारे परिभ्रमतः अतीतेषु बहुषु जन्मसु अस्मिंश्च जन्मनि कामक्रोधलोभमोहादिभिस्संमार्जितानां पापानां फलत्वेन अनुभूयमानानुभविष्यमाणसकलविधवेदनानिवृत्त्यर्थं, पत्नीपुत्रशिष्यादिप्रातिकूल्यजन्यमानसंतापनिवृत्त्यर्थं पूर्वजन्मनि सूर्यप्रतिमेहन, गवादिव्यवायदर्शन परस्त्रीकामनादिदोषादिभिस्सम्भूतपुत्रप्रतिबन्ध नेत्रहृदयादिरोगनिवृत्त्यर्थं, जन्मान्तरे वापीकूपादिपांसुप्रक्षेपण पुष्पवाटिकानाशन नारिकेळपनसदाडिमादिफलवृक्षच्छेदन गोब्राह्मणदेवालयदेवखातात्यप्रदक्षिणीकरणादिपापवशात् सञ्जनितापुत्रत्वमृतपुत्रत्वादिदुःखनिवृत्त्यर्थं, ब्रह्मलोकप्रसिद्धशतकोटिसंख्यकग्रन्थस्य, परमदयाळुना भगवता वाल्मीकिना ब्रह्मनिदेशात्सरस्वतीकृपया प्रणीत चतुर्विंशतिसहस्रश्लोकात्मकस्य, नारदादिभिस्सर्वकामानामुपरिस्थितैरपि नित्यमुपगीयमानस्य, अहल्याशापविमोचनशरभङ्ग शबरी जटायुःप्रभृतिमोक्षदान सेतुबन्धन सीताहनुमःसंवाद सीताग्निप्रवेशादिभिः सकृच्छ्रवणपठनादिना सर्वपापविनाशनचणैः पावनतमैश्चरित्रैः श्रीराममहिमप्रकाशकस्य, का-

श्यां मृतानां कर्णदेशे भगवता भवेन भवपाशनिवृत्तये उपदिश्यमानतारकनाम्नः, वालिमारीचमाल्यवन्मयादिभिर्महापातकिभिरपि स्तूयमानधर्मपरत्वमहिममाहितस्य सकृदपि नमतां आदेहान्तं समस्तानपि भोगान् अतःपरं बन्धमोक्षं चार्पयितुं वामाङ्कस्थितया सीतया दक्षिणकरकमलोद्भासिन्या चिन्मुद्रयाच विलसितस्य भगवतः श्रीरघुनन्दनस्य चरित्रप्रतिपादनेन महनीयतमस्य, श्रीरामायणाख्यमहेतिहासस्य, कुमारसंहितोक्तप्रकारेण अगस्त्येन माण्डूकर्णये महर्षये उपदिष्टां रीतिमनुसृत्य मम (आवयोः) सीतारामप्रसादेन सकलविधारिष्टनिवृत्तिद्वारा सर्वाभीष्टसिध्यर्थं —— सिध्यर्थं नवाहश्रवणपठनाख्यं कर्म करिष्ये ॥ इति सङ्कल्प्य ॥

पठितारौ कुशलवस्वरूपौ वृणुयात्ततः ।
वक्तारमपि वाल्मीकिरूपमेकं वृणीत च ॥ २१ ॥
श्रोतारमेकं हनुमत्स्वरूपं वृणुयात्ततः ।
उपश्रोतॄन् ततस्त्रींश्च वृणुयाद्राघवप्रियान् ॥ २२ ॥
पठने वा प्रवचने श्रवणे वा यदा स्वयम् ।
पदुर्भवेत्तदा कुर्यात्तथा सङ्कल्पमेव च ॥ २३ ॥
ततः पठेन्नारदोपदिष्टमारभ्यसर्गकम् ।
आबालकाण्डसंपूर्तेः पठेत्तु प्रथमे दिने ॥ २४ ॥
द्वितीये वै दशरथप्राणयात्रान्तमेव च ।
तृतीये तु दिने पाठ्यं अयोध्याकाण्डशेषकम् ॥ २५ ॥

चतुर्थे तु पठेत् गृध्रराजमोक्षावधि क्रमात् ।
बिलप्रवेशात् पूर्वन्तु पञ्चमे विरमेत् पुनः ॥ २६ ॥
हनूमतो निवृत्त्यन्तं षष्ठे लङ्कापुरात् पठेत् ।
नागपाशनिवृत्त्यन्तं सप्तमे दिवसे पठेत् ॥ २७ ॥
रावणस्य वधान्तं च दिवसे चाष्टमे पठेत् ।
नवमे दिवसे पाठ्यं यावद्रामाभिषेचनम् ॥ २८ ॥
पठनान्ते राघवस्य विष्णोर्नामसहस्रतः ।
मल्लिकाचंपकैरर्चां पद्मैर्वा तुळसीदळैः ॥ २९ ॥
कृत्वाऽथ पायसापूपभक्ष्यभोज्यादिसंयुतम् ।
शाल्यन्नं विनिवेद्याथ ब्राह्मणान् भोजयेत्ततः ॥३० ॥
प्रथमे दिवसे विप्राः भोज्या द्वादशसंख्यकाः ।
द्वितीयेऽष्टौ तृतीये तु विंशतिश्च चतुर्थके ॥ ३१ ॥
दश विप्राः पञ्चमे तु भोज्याः पञ्चदश द्विजाः ।
षष्ठे च द्वादशैव स्युः सप्तमे तूनविंशतिः ॥ ३२ ॥
अष्टमे दश विप्राश्च न संख्या नवमे स्मृता ।
मध्वाज्यफलसंमिश्रं भोजनं सर्वदा दिशेत् ॥ ३३ ॥
दक्षिणामपि विप्राणां दद्याद् भुक्तवतां व्रती ।
सायं च यामे पूर्वे च रात्रेः प्रतिदिनं ततः ॥ ३४ ॥
वक्तुर्मुखाच्च शृणुयात् पूर्वाह्णपठितस्य च ।
भक्त्याऽर्थान् पूजयेत्तं चाप्यभीष्टैः प्रतिवासरम् ॥३५॥
वक्ता श्रोता च पठिता यजमानस्तथैव च ।

ब्रह्मचर्यव्रतपरा भवेयु र्नव वासरान् ॥ ३६
एवं कृत्वा प्रतिदिनं प्राप्ते तु नवमे दिने ।
पठनान्ते तु सङ्कल्पं कृत्वा कल्पोक्तमार्गतः ॥ ३७
कृत्वा पूजां यथाशक्ति पुष्पादिद्रव्यसंयुताम् ।
कुर्यात् पट्टाभिषेकाख्यमहोत्सवमथादरात् ॥ ३८
स्वगृह्योक्तेन विधिना प्रतिष्ठाप्य हुताशनम् ।
क्षीरान्नेन च पालाशसमिद्भिश्च घृतेन च ॥ ३९
त्रिशतं रामगायत्र्या जुहुयाद्राघवं स्मरन् ।
गुडान्नेन च दूर्वाभिर्घृतेन च चतुःशतम् ॥ ४०
मूलमन्त्रेण जुहुयात् स्वयं वाऽऽचार्यमूलतः ।
धर्मात्मेति च मन्त्रेण घृताक्तान्नेन सर्पिषा ॥ ४१
अश्वत्थसमिधां चाऽपि जुहुयात्त्रिशतं व्रती ।
तद्विष्णोरिति मन्त्रेण हुनेदष्टोत्तरं शतम् ॥ ४२
तत्र हव्यं तु तद्धानं समिधस्तु कुशाः स्मृताः ।
होमाशक्तौ होममन्त्रान् होमत्रिगुणसंख्यया ॥ ४३
आवर्तयेद्रघुपतिं कूर्चेष्वावाह्य चोच्चकैः ।
प्रतिमामप्यथोद्वास्य दद्याद्विप्राय योगिने ॥ ४४
स्नपयेद्यजमानं चाचार्यः कुम्भजलेन च ।
वक्त्रे पठिते श्रोत्रे च वस्त्रालङ्करणादिभिः ॥ ४५
दीनारैरपि संमानं ततः कुर्याद्यथोचितम् ।
इदं व्रतं शुक्लपक्षे चैत्रेवाऽऽश्वयुजेऽपि वा ॥ ४६

प्रथमायां समारभ्य नवम्यां च समापयेत् ।
तिथिवृध्यातु नवमी यदि स्याद्दशमे दिने ॥ ४७ ॥
तदाऽऽरभेद्द्वितीयायां नवाहं स्यान्महोत्सवः ।
तिथिक्षयेण सा चेत् स्यादष्टमे दिवसे भवेत् ॥४८॥
अमायांतु व्रतमिदं प्रारभ्य नव वासरान् ।
मध्याह्नव्यापिनी ग्राह्या नवमी रामपूजने ॥ ४९ ॥
कुर्याद्भक्त्या च तुष्ट्या च श्रद्धया च समन्वितः ।
मासद्वयन्तु पूर्वोक्तं मुख्यपक्षसमाश्रयात् ॥ ५० ॥
अन्येष्वपि च मासेषु शुक्लपक्षे यथारुचि ।
कुर्यात् व्रतमिदं यत्नः सर्वसंपत्समृद्धये ॥ ५१ ॥
एवं कृते जगत्स्वामी रामभद्रः श्रियःपतिः ।
तुष्टो भवति मोक्षान्तान् सर्वान्कामान् ददाति च ॥
अपुत्रो लभते पुत्रं अपमृत्युं तरेत च ।
भुञ्जीत सर्वान् भोगांश्च कुबेरेण समो भुवि ॥ ५२ ॥
आचन्द्रार्कं वंशवृद्धिः यजमानस्य वै भवेत् ।
प्रीयन्ते पितरस्तस्य आविंशतिकुलं ततः ॥ ५४ ॥
नरकादुत्तरन्त्येते रामभाहात्म्यतोऽखिलाः ।
आयुः कीर्तिश्च वर्धेत सर्वं दुःखं प्रणश्यति ॥ ५५ ॥
इदमुक्तं महाभाग माण्डूकर्णे महामुने ।
रामातिक्रमदोषाच्च क्षत्रियभ्रूणनाशनात् ॥ ५६ ॥
इदं यथोदितं चक्रे जामदग्न्यः पुरा व्रतम् ।

अत्यक्षोभूय रामश्चाप्यनुजग्राह तं ततः ॥ ५७ ॥
बहुभिश्च ततो भूपैः मुनिभिश्च द्विजोत्तमैः ।
अनुष्ठितं व्रतमिदं तत्तत्कामनयाऽन्वितैः ॥ ५८ ॥
अनायासेन ते प्राप्ता अभीष्टं रघुसत्तमात् ।
एवं कर्तुमशक्तश्चेत् वित्तलोभं विना द्विजः ॥ ५९ ॥
यावच्छक्ति व्रतामिदं कुर्याद्भक्तिसमन्वितः ।
सर्वाशक्तौ नवादिनं यथोक्तक्रमतः पठेत् ॥ ६० ॥
पूजयेच्च रघूत्तंसं तेन रामः प्रसीदति ॥ ६०½ ॥

इति श्रीकुमारसंहितायां अगस्त्यमाण्डूकर्णिसंवादे
॥ श्रीरामायणनवाहपारायणविधिकथनम् ॥
॥ समाप्तम् ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीरामदशावरणपूजा ॥

॥ प्रारभ्यते ॥

आदौ सङ्कल्प्य । कलशपूजां शङ्खपूजां च कृत्वा । आदौ लिखेद्यन्त्रराजं रघुनन्दनविग्रहम् । सौवर्णे राजते ताम्रे पीठे भूर्जेऽथवा भुवि ॥ विना यन्त्रेणचेत् पूजा देवता न प्रसीदति । श्रीरामः पूजितो यन्त्रे सीतया सह यन्त्रितः ॥ यदिष्टं तत्करोत्येव नात्रकार्या विचारणा । तदित्थम्— मध्ये षट्कोणम् ।

अष्टदळम् । पुनरष्टदळम् । द्वादशदळम् । षोडशदळम् । द्वात्रिंशद्दळम् । भूगृहत्रयम् । एवं लिखित्वा पीठपूजां कुर्यात् । स्ववामभागे । गुं गुरुभ्यो नमः, पं परमगुरुभ्यो नमः, पं परमेष्ठिगुरुभ्यो नमः, पं परात्परगुरुभ्यो नमः । इत्यभ्यर्च्य । दक्षिणभागे गं गणपतये नमः, सं सरस्वत्यै नमः, दुं दुर्गायै नमः, क्षें क्षेत्रपालाय नमः । गृहमध्ये वास्तुपुरुषाय नमः, मण्डूकाय नमः, कालाग्निरुद्राय नमः, आधारशक्तये नमः, कूर्माय नमः, अनन्ताय नमः, पृथिव्यै नमः, क्षीरसागराय नमः, श्वेतद्वीपाय नमः, रत्नमण्टपाय नमः, कल्पवृक्षाय नमः, रत्नवेदिकायै नमः, रत्नसिंहासनाय नमः, इत्यभ्यर्च्य । पीठपादेषु धर्माय नमः, ज्ञानाय नमः, वैराग्याय नमः, ऐश्वर्याय नमः । पीठगात्रेषु, अधर्माय नमः, अज्ञानाय नमः, अवैराग्याय नमः, अनैश्वर्याय नमः । कर्णिकायां आनन्दकन्दाय नमः, संपन्नाळाय नमः, सर्वतत्वसरोरुहाय नमः, प्रकृतिपत्रेभ्यो नमः, विकारकेसरेभ्यो नमः, पञ्चाशद्वर्णाढ्यकर्णिकायै नमः, रं वह्निमण्डलाय दशकळात्मने नमः, अं अर्कमण्डलाय द्वादशकळात्मने नमः, सों सोममण्डलाय षोडशकळात्मने नमः, सत्वाय प्रबोधात्मने नमः, रजसे प्रकृत्यात्मने नमः, तमसे मोहात्मने नमः, आत्मने नमः, अन्तरात्मने नमः, परमात्मने नमः, ज्ञानात्मने नमः, मायातत्वाय नमः, कलातत्वाय नमः, विद्यातत्वाय नमः, परतत्वाय नमः । कर्णिकायाः पूर्वाद्यष्टपत्रेषु, विमलायै नमः, उत्कर्षिण्यै नमः, ज्ञानायै नमः, क्रियायै

नमः, योगायै नमः, ब्रह्मयै नमः, सत्यायै नमः, ईशायै नमः, मध्ये अनुग्रहायै नमः, कर्णिकायां (षट्कोणमध्ये) ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मकाय योगपीठाय नमः । पुष्पाञ्जलिं दद्यात् । इति पीठपूजा । (श्लो) चैतन्यविग्रहं रामं स्थितं हृदयपङ्कजे । श्वासमार्गेणानुगतं चिन्तयेत् कुसुमाञ्जलौ ॥ पादुकामुद्रयाऽऽनीय मूर्तौ संयोज्ययत्नतः । आवाहन्यादिकास्सप्तदश मुद्राः प्रदर्शयेत् ॥ सालग्रामे स्थावरे च नावाहनविसर्जने । सालग्रामशिलायां तु नित्यं सन्निहितो हरिः ॥ अञ्जलौ पुष्पाणि गृहीत्वा । दशकृत्वः मूलमन्त्रमुच्चार्य । दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात् । श्रीरामाय सायुधाय सपरिवाराय सवाहनाय पुष्पाञ्जलिं कल्पयामि नमः । इति स्वहृदयस्थितं चैतन्यविग्रहं रामं श्वासमार्गेण पुष्पाञ्जलावागतं विभाव्य यन्त्रमध्ये यन्त्रमध्यप्रतिष्ठापितमूर्तौ सालग्रामे वा संयोजयन् पुष्पाञ्जलिं दद्यात् । ततः आवाहितो भव, स्थापितो भव, सन्निहितो भव, सन्निरुद्धो भव, ममाभिमुखो भव, इत्यावाहनी स्थापिनी सन्निधिकरणी, सन्निरोधिनी, संमुखीकरणी, सङ्कलीकरणी, महामुद्राशङ्खचक्रगदापद्मधेनुकौस्तुभगरुडश्रीवत्सवनमालायोनिमुद्रास्सप्तदश प्रदर्शयेत् ततः पुरुषसूक्तेन प्रत्युपचारं मूलमन्त्रमुच्चार्य साङ्गाय सावरणाय सपरिवाराय श्रीरामाय नमः इति कीर्तयन् पूजयेत् । (श्लो) प्रधानपूजां निर्वर्त्य प्राप्ते पूजाविधौ ततः । दशावरणपूजां च प्रकुर्याद्विधिचोदिताम् ॥ साचेत्थम्—तस्मादश्वा अजायन्ते-

त्याद्यृचा रामाय अष्टपुष्पाञ्जलीनर्पयित्वा सहस्रनामादिभिरर्चेत्। अथ रामस्य वामभागे सीतामन्त्रेण (अश्वपूर्वामित्यादिवाक्यद्वयेन) सीतां पूजयेत् । दक्षिणभागे लक्ष्मणमन्त्रेण लक्ष्मणं पूजयेत् । (अथ वामपार्श्वे) शां शार्ङ्गाय नमः । (दक्षिणपार्श्वे) शं शरेभ्यो नमः । (पृष्ठभागे) तूं तूणीराभ्यां नमः । इत्यभ्यर्च्य । (श्लो) रामचन्द्र महेष्वास भुक्तिमुक्तिप्रदायक । त्वदावरणपूजायै दत्वाऽनुज्ञां कृपां कुरु ॥ (इत्यनुज्ञां लब्ध्वा षट्कोणे रां हृदयाय नमः, रीं शिरसेस्वाहा, रूं शिखायैवषट्, रैं कवचायहुम्, रौं नेत्रत्रयाय वौषट्, रः अस्त्रायफट् । इति पुष्पाक्षतान्निक्षिप्य । शङ्खोदकेन पुष्पसहितेन हस्तौ प्रक्षाल्य, 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव प्रथमावरणार्चनम् ॥' इति पुष्पाञ्जलिं दत्वा, शङ्खमुद्रां प्रदर्श्य, प्रथमाष्टदळमूलेषु, आं आत्मने नमः, निं निवृत्तये नमः, अं अन्तरात्मने नमः, प्रं प्रतिष्ठायै नमः, पं परात्मने नमः, विं विद्यायै नमः, क्षां क्षान्त्यै नमः, ज्ञां ज्ञानात्मने नमः, इत्यभ्यर्च्य ॥ (१)

पूर्ववत् पुष्पसहितेन शङ्खोदकेन हस्तौ प्रक्षाळ्य । 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव द्वितीयावरणार्चनम् ।' इति पुष्पाञ्जलिं विकीर्य चक्रमुद्रां प्रदर्श्य । प्रथमाष्टदळमध्ये, वां वासुदेवाय नमः, श्रीं श्रियै नमः, सं सङ्कर्षणाय नमः, शां शान्त्यै नमः, प्रं प्रद्युम्नाय नमः, रं रत्यै नमः, अं अनिरुद्धाय नमः, प्रीं प्रीत्यै नमः, इत्यभ्यर्च्य ॥ (२)

पूर्ववत् हस्तप्रक्षाळनं कृत्वा 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव तृतीयावरणार्चनम् ।' इति प्रार्थ्य, गदामुद्रां प्रदर्श्य । प्रथमाष्टदळाग्रेषु, हं हनुमते नमः, सुं सुग्रीवाय नमः, भं भरताय नमः, विं विभीषणाय नमः, लं लक्ष्मणाय नमः, अं अङ्गदाय नमः, शं शत्रुघ्नाय नमः, जां जाम्बवते नमः, इत्यभ्यर्च्य ॥ (३)

पूर्ववत् हस्तौ प्रक्षाळ्य, 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव चतुर्थावरणार्चनम् ।' इति पुष्पाञ्जलिं दत्वा । पद्ममुद्रां प्रदर्श्य, द्वितीयाष्टदळेषु, धृं धृष्टये नमः, जं जयन्ताय नमः, विं विजयाय नमः, सुं सुराष्ट्राय नमः, रां राष्ट्रवर्द्धनाय नमः, अं अशोकाय नमः, धं धर्मपालाय नमः, सुं सुमन्त्राय नमः, इत्यर्चयित्वा ॥ (४)

पूर्ववत् हस्तौ प्रक्षाळ्य, 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये देव पञ्चमावरणार्चनम्।' इति पुष्पाञ्जलिं दत्वा धेनुमुद्रां प्रदर्श्य । द्वादशदळेषु, वं वसिष्ठाय नमः । वां वामदेवाय नमः, जां जाबालये नमः, गौं गौतमाय नमः, भं भरद्वाजाय नमः, कौं कौशिकाय नमः, वां वाल्मीकये नमः । नां नारदाय नमः, सं सनकाय नमः, सं सनन्दनाय नमः, सं सनत्सुजाताय नमः, सं सनत्कुमाराय नमः, इत्यभ्यर्च्य ॥ (५)

पूर्ववत् हस्तौ प्रक्षाळ्य । 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव षष्ठमावरणार्चनम् ॥' इति पुष्पाञ्जलिं दत्वा । कौस्तुभमुद्रां प्रदर्श्य । षोडशदळेषु । नं

नळाय नमः, नीं नीलाय नमः, गं गवयाय नमः, गं गवाक्षाय नमः, गं गन्धमादनाय नमः, शं शरभाय नमः, मैं मैन्दाय नमः, द्विं द्विविदाय नमः, किं किरीटाय नमः, कुं कुण्डलद्वयाय नम., श्रीं श्रीवत्साय नमः, कौं कौस्तुभाय नमः, शं शङ्खाय नमः, चं चक्राय नमः, गं गदायै नमः, पं पद्माय नम., इत्यभ्यर्च्य ॥ (६)

पूर्ववत् हस्तौ प्रक्षाळ्य । 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव सप्तमावरणार्चनम् ।' इति पुष्पाञ्जलिं दत्त्वा गरुडमुद्रां प्रदर्श्य । द्वात्रिंशद्दळेषु ध्रुं ध्रुवाय नमः, धं धर्माय नम., सों सोमाय नमः, अं अर्क्यो नमः, नं अनिलाय नमः, अं अनलाय नमः, प्रं प्रत्यूषाय नमः, प्रं प्रभासाय नम, वीं वीरभद्राय नमः, शं शम्भवे नमः, गिं गिरीशाय नमः, अं अजैकपदे नमः, अं अहयेबुध्न्याय नमः, पिं पिनाकीशाय नमः, भुं भुवनाधीश्वराय नमः, कं कपालिने नमः, दिं दिक्पतये नमः, स्थां स्थाणवे नमः, भं भर्गाय नमः, अं अरुणाय नमः, सूं सूर्याय नमः, वें वेदाङ्गाय नमः, भं भानवे नमः, इं इन्द्राय नमः, रं रवये नमः, गं गभस्तये नमः, यं यमाय नमः, हिं हिरण्यरेतसे नमः, दिं दिवाकराय नमः, मिं मित्राय नमः, विं विष्णवे नमः, धां धात्रे नमः, नम्यर्च्य ॥ (७)

पूर्ववत् हस्तौ प्रक्षाळ्य । 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव अष्टमावरणार्चनम् ।' इति

पुष्पाञ्जलिं दत्वा । श्रीवत्समुद्रां प्रदर्श्य । प्रथमभूगृहे, इं इन्द्राय नमः, रं अग्नये नमः, यं यमाय नमः, निं निरृतये नमः, वं वरुणाय नमः, वां वायवे नमः, कुं कुबेराय नमः, इं ईशानाय नमः, अं ब्रह्मणे नमः, ओं विष्णवे नमः, इत्यभ्यर्च्य ॥ (८)

पूर्ववत् हस्तौ प्रक्षाळ्य । 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव नवमावरणार्चनम् ।' इति पुष्पाञ्जलिं दत्वा । वनमालामुद्रां प्रदर्श्य । द्वितीयभूगृहे । वं वज्राय नमः, शं शक्तये नम , दं दण्डाय नम , कुं कुन्ताय नमः, पां पाशाय नमः, ध्वं ध्वजाय नम , गं गदायै नमः, त्रिं त्रिशूलाय नमः, अं अब्जाय नम , चं चक्राय नमः, इत्यभ्यर्च्य ॥ (९)

पूर्ववत् हस्तप्रक्षाळनं कृत्वा । 'दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् । भक्त्या समर्पये देव दशमावरणार्चनम् ।' इति पुष्पाञ्जलिं दत्वा । योनिमुद्रां प्रदर्श्य । तृतीयभूगृहे रामपार्षदेभ्यो नमः, बहिर्नागेभ्यो नमः, इत्यभ्यर्च्य ॥ (१०)

पुष्पाञ्जलिं दत्वा । ओं प्रणवस्वरूपाय चिच्छक्तिरूपसीतासमलङ्कृतोत्सङ्गाय, अहङ्काररूपकोदण्डधारिणे, बुद्धितत्वरूपशरपाणये सच्चिदानन्दात्मकचिन्मुद्राङ्किताय साङ्गाय सायुधाय सवाहनाय सपरिवाराय सपार्षदाय सावरणाय श्रीरामाय परब्रह्मणे नमः, इत्यञ्जलिसंमितानि पुष्पाणि समर्प्य । अनेन दशावरणपूजनेन भगवान् सर्वात्मकः श्रीरामचन्द्रस्सुप्रीतस्सुप्रसन्नो वरदो भवतु । ततः पुनः पुरुषसूक्तस्य 'यत्पुरुषं

न्सदधु' रित्यादिभिः ऋग्भिर्धूपदीपाद्युपचारान् विधाय (श्लो) 'नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे । उत्तमश्लोकधुर्याय न्यस्तदण्डार्चितांघ्रये ॥ इन्दीवरदलश्यामो रामो राजीवलोचनः । मानसे वर्तते यस्यास्तां सीतां प्रणमाम्यहम् ॥' इति प्रणम्य छत्रचामरादिराजोपचारान् कृत्वा, प्रार्थयेद्राघवं भक्त्या कपिमुद्रां प्रदर्शयन् । 'तर्जन्यग्रेऽङ्गुष्ठमूलं कृत्वाऽन्याङ्गुलियोजनम् । तत्संपुटितयोः पाण्योः मुद्रा वानरसंज्ञका ॥' इत्युक्तप्रकारेण कपिमुद्राप्रदर्शनपूर्वं 'अज्ञानादथवा ज्ञानादशुभं यन्मया कृतम् । क्षन्तुमर्हसि तत्सर्वं दास्येनैव गृहाण माम् ॥ साधु वाऽसाधु वा कर्म यद्यदाचरितं मया । तत्सर्वं भगवन्विष्णो गृहाणाराधनं तव ॥' इति प्रार्थ्य । 'त्वमेवाहं मंह च त्वं सच्चिन्मात्रवपुर्धरः । आवयोरन्तरभ्रान्तिं नेश्यत्वाज्ञाबलात्तव' ॥ इत्यात्मार्पणं कृत्वा । 'त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥' इति निर्माल्यग्रहणं कृत्वा । 'मन्त्रहीनं क्रियाहीनं भक्तिहीनं च राघव । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥' इति पुष्पाञ्जलिं धृत्वा संहृत्यावरणान् हरौ । 'भक्त्या संशोधितं स्वान्तं विश विश्रामतेव ॥ हृत्पद्मकर्णिकामध्ये सीतया सह राघव । निवस त्वं रघुश्रेष्ठ सर्वैरावरणैस्सह ॥' इति निर्माल्यपुष्पाञ्जलिद्वारा भगवन्तं श्वासमार्गेणान्तः प्रवेश्य । 'देवदेव जगन्नाथ शङ्खचक्रगदाधर । देहि देव ममानुज्ञां युष्मत्तीर्थनिषेवणे ॥' इति तीर्थं गृहीत्वा शिरसि च धृत्वा । (श्लो) या दृष्टा निखिलाघसङ्घशमनी

स्पृष्टा वपुःपावनी रोगघ्नी ह्यभिवन्दिताऽमलजलासिक्ताऽन्तक-त्रासिनी । प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता विष्णुपदे विमुक्तिफलदा तस्यै तुळस्यै नमः ॥ इति तुळसीग्रहणं कृत्वा उत्थाय आचम्य श्रीरामस्वरूपान् ब्राह्मणान् सीतास्वरूपिणीस्सुवासिनीश्च वस्त्राङ्गरागानुलेपनकुसुममालाभिः परितोष्य मधुक्षीराज्यसंमितं भोजयेत् । एवं कृते वत्सरमात्रेण भगवान् श्रीरघुनाथः स्वप्ने प्रथममाञ्जनेयं प्रेष्य शुद्धसत्वप्रधानचित्ततां परिज्ञाय क्रमेण स्वयमपि प्रसन्नो भूत्वा सर्वसिद्धीर्यच्छेदिति ॥ शुभम् ॥

इति श्रीरामार्चनचन्द्रिकाप्रोक्ता
॥ श्रीरामदशावरणपूजा समाप्ता ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीरामतापिन्युपनिषद्गतम् ॥

॥ श्रीरामस्तोत्रम् ॥

भद्रं कर्णेभिरिति शान्तिः ॥

अथ हैनं भारद्वाजो याज्ञवल्क्यमुवाच । अथ कैर्मन्त्रैः स्तुतः श्रीरामचन्द्रः प्रीतो भवति, स्वात्मानं दर्शयति, तान्नो ब्रूहि भगवन्निति । सहोवाच याज्ञवल्क्यः । पूर्वं सत्यलोके श्रीरामचन्द्रेणैवं शिक्षितो ब्रह्मा पुनरेतया गाथया नमस्करोति—

विश्वरूपधरं विष्णुं नारायणमनामयम् । पूर्णानन्दैकविज्ञानं परब्रह्मस्वरूपिणम् । मनसा संस्मरन् ब्रह्मा तुष्टाव परमेश्वरम् ॥ ॐ योहवै श्रीरामचन्द्रस्सभगवान् अद्वैतपरमानन्द आत्मा यत् परं ब्रह्म भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ १ ॥

* यो हवै श्रीरामचन्द्रस्सभगवा नद्वैतपरमानन्द आत्मा यश्चाखण्डैकरसात्मा भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ २ ॥ यो हवै + आत्मा यच्च ब्रह्मानन्दामृतं भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ३ ॥ यो हवै + आत्मा यत्तारकं ब्रह्म भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ४ ॥ यो हवै + आत्मा यो ब्रह्मा विष्णुर्महेश्वरो यस्सर्वदेवात्मा भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ५ ॥ यो हवै + आत्मा ये सर्वे वेदास्साङ्गास्सशाखास्सेतिहासपुराणा भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ६ ॥ यो हवै + आत्मा यो जीवान्तरात्मा भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ७ ॥ यो हवै + आत्मा यस्सर्वभूतानामन्तरात्मा भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ८ ॥ यो हवै + आत्मा ये देवासुरमनुष्यादिभागाः भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ९ ॥ यो हवै + आत्मा [मत्स्यकूर्माद्यवतारा भूर्भुव + नमः ॥ १० ॥ यो हवै + आत्मा योऽन्तःकरणचतुष्टयात्मा भूर्भुव + नमः ॥ ११ ॥ यो वै + आत्मा यश्च प्राणो भूर्भुव + नमः ॥ १२ ॥ यो हवै - आत्मा यश्च यमो भूर्भुव + नमः ॥ १३ ॥ यो हवै +

---

* वक्ष्यमाणेषु सर्वेष्वपि मन्त्रेषु आद्यन्तौ प्रथममन्त्रवत् । मध्ये विशेषो दर्श्यते ॥

आत्मा यश्चान्तको भूर्भुव + नमः ॥ १४ ॥ यो हवै + आत्मा यश्चमृत्यु र्भूर्भुव + नमः ॥ १५ ॥ यो हवै + आत्मा यच्चामृतं भूर्भुव + नमः ॥ १६ ॥ यो हवै + आत्मा यानिच पञ्च महाभूतानि भूर्भुव + नमः ॥ १७ ॥ यो हवै + आत्मा यः स्थावरजङ्गमात्मा भूर्भुव + नमः ॥ १८ ॥ यो हवै + आत्मा ये पञ्चाग्नयो भूर्भुव + नमः ॥ १९ ॥ यो हवै + आत्मा यास्सप्त महाव्याहृतयो भूर्भुव + नमः ॥ २० ॥ यो हवै + आत्मा या विद्या भूर्भुव + नमः ॥ २१ ॥ यो हवै + आत्मा या सरस्वती भूर्भुव + नमः ॥ २२ ॥ यो हवै + आत्मा या लक्ष्मी र्भूर्भुव + नमः ॥ २३ ॥ यो हवै + आत्मा या गौरी भूर्भुव + नमः ॥ २४ ॥ यो हवै + आत्मा या जानकी भूर्भुव + नमः ॥ २५ ॥ यो हवै + आत्मा यच्च त्रैलोक्यं भूर्भुव + नमः ॥ २६ ॥ यो हवै + आत्मा यस्सूर्यो भूर्भुव + नमः ॥ २७ ॥ यो हवै + आत्मा यस्सोमो भूर्भुव + नमः ॥ २८ ॥ यो हवै + आत्मा यानि च नक्षत्राणि भूर्भुव + नम ॥ २९ ॥ यो हवै + आत्मा ये च नवग्रहा भूर्भुव + नमः ॥ ३० ॥ यो हवै + आत्मा येचाष्टौ लोकपाला भूर्भुव + नमः ॥ ३१ ॥ यो हवै + आत्मा येचाष्टौ वसवो भूर्भुव + नमः ॥ ३२ ॥ यो हवै + आत्मा येचैकादश रुद्रा भूर्भुव + नमः ॥ ३३ ॥ यो हवै + आत्मा येच द्वादशादित्या भूर्भुव + नमः ॥ ३४ ॥ यो हवै + आत्मा यच्च भूतं भव्यं भविष्यत् भूर्भुव + नमः ॥ ३५ ॥ यो हवै + आत्मा यत् ब्रह्माण्डस्य बहिर्व्याप्तं भूर्भुव

+ नमः ॥ ३६ ॥ यो हवै + आत्मा यो हिरण्यगर्भो भूर्भुव
+ नमः ॥ ३७ ॥ यो हवै + आत्मा या प्रकृतिर्भूर्भुव + नमः
। ३८ ॥ यो हवै + आत्मा यश्चोङ्कारो भूर्भुव + नमः ॥३९॥
ो हवै + आत्मा याश्चतस्रोऽर्द्धमात्रा भूर्भुव + नमः ॥ ४० ॥
ो हवै + आत्मा यः परमपुरुषो भूर्भुव + नमः ॥ ४१ ॥
ो हवै + आत्मा यश्च महेश्वरो भूर्भुव + नमः ॥ ४२ ॥ यो
वै + आत्मा यश्च महादेवो भूर्भुव + नमः ॥ ४३ ॥ यो हवै
- आत्मा ॐ नमो भगवते वासुदेवाय भूर्भुव + नमः ॥४४॥
ो हवै + आत्मा योमहाविष्णुर्भूर्भुव + नमः ॥ ४५ ॥ यो
वै + आत्मा यः परमात्मा भूर्भुव + नमः ॥ ४६ ॥ यो हवै
आत्मा यो विज्ञानात्मा भूर्भुव + नमः ॥४७॥ यो हवै श्री-
मचन्द्रस्सभगवा नद्वैतपरमानन्द आत्मा यस्सच्चिदानन्दाद्वै-
कचिदात्मा भूर्भुवस्सुवस्तस्मै वै नमो नमः ॥ ४८ ॥ इति
च् ब्रह्माऽब्रवीत् । (अष्ट) सप्तचत्वारिंशन्मन्त्रैर्नित्यं देवं स्तु-
ध्वम् । ततो देवः प्रीतो भवति । स्वात्मानं दर्शयति ।
स्माद्य एतैर्मन्त्रैर्नित्यं देवं स्तौति स देवं पश्यति । सोऽमृतत्वं
गच्छतीति महोपनिषत् ॥

भद्रं कर्णेभिरिति शान्तिः ॥ ओम् ॥

॥ इति रामोत्तरतापिन्यां श्रीरामस्तुतिस्समाप्ता ॥

॥ श्रीरामचन्द्रो विजयते ॥

॥ अथ हनुमत्कृतश्रीरामस्तोत्रम् ॥

श्रीशुकः— किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपास्ते ॥

आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ॥

ओं नमो मतवते उत्तमश्लोकाय, नम आर्यलक्षणशीलव्रताय, नम उपाशिक्षितात्मने, नम उपासितलोकाय, नमस्साधुवादनिकर्षणाय, नमो ब्रह्मण्यदेवाय, महापुरुषाय महाराजाय नमः ॥ इति ॥

यत्तद्विशुद्धानुभवैकमात्रं
स्वतेजसा ध्वस्तगुणव्यवस्थम् ।
प्रत्यक्प्रशान्तं सुधियोपलम्भनं
ह्यनामरूपं निरहं प्रपद्ये ॥ ॥ १ ॥

मर्त्यावतारस्त्विह मर्त्यशिक्षणं
रक्षोवधायैव न केवलं विभोः ।
कुतोऽन्यथा स्याद्रमतः स्व आत्मन्
सीताकृतानि व्यसनानीश्वरस्य ॥ ॥ २ ॥

न वै स आत्माऽऽत्मवतां सुहृत्तमः
सक्तस्त्रिलोक्यां भगवान् वासुदेवः ।

न स्त्रीकृतं कश्मलमन्वगीत
न लक्ष्मणं चापि विहातुमर्हति ॥ ३ ॥
न जन्म नूनं महतो न सौभगं
न वाङ्न बुद्धि र्नाकृतिस्तोषहेतुः ।
तैर्यद्विसृष्टानपि नो वनौकसः
चक्कार सख्ये बत लक्ष्मणाग्रजः ॥ ४ ॥
सुरोऽसुरो वाऽपि नरोऽथ वानरः
सर्वात्मना यस्सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिं
य उत्तराननयत्कोसलान् दिवम् ॥ इति ॥ ५ ॥

इति श्रीमद्भागवते पञ्चमस्कन्धे एकोनविंशतितमेऽध्याये
॥ श्रीहनुमत्कृतं रामस्तोत्रं संपूर्णम् ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीरामभुजङ्गस्तोत्र प्रारम्भः ॥

कल्याणदम्भवेत्तत् करुणाकूपारवीक्षणं कामम् ।
कलशीपयोधितनयाकटाक्षपुनरुक्तकाळिम महो नः ॥ १ ॥
दर्शनतो दुःखहरं दशास्यभयभुग्दिविषदभयकरम् ।
दशरथसुकृतौघफलं दयतां नो दमशमादिसंपत्यै ॥ २ ॥
रामाख्यया प्रसिद्धां नामाम्नायेन निखिलसिद्धिकरीम् ।
सीमामिह करुणाया भूमावगतिश्रेये शरणम् ॥ ३ ॥

श्रियां लोलनेत्रं श्रितं तार्क्ष्यपत्रं
मुनिस्तोत्रपात्रं मुहुरक्ष्यसत्रम् ।
महीजाकळत्रं मनोज्ञाब्जवक्त्रं
भजे विश्वजैत्रं विभुम्मिलगोत्रम् ॥ ४ ॥

दयावाद्यपाङ्गं पयोदोज्वलाङ्गं
सताञ्चित्तरङ्गं सरन्तं विसङ्गम् ।
रमास्याब्जभृङ्गं श्रये रामलिङ्गं
स्वभासाऽप्यनङ्गं नयन्तञ्च भङ्गम् ॥ ५ ॥

भवारण्यतान्तं भयान्मामवन्तं
भवन्तं विना राम कान्तं रमायाः ।
अनन्तं शमन्ते पदं ते च गन्तुं
कमन्यन्तु सन्तो हृदन्ते भजन्ते ॥ ६ ॥

पयोदाभदेहं पराराण्यदाहं
रमाचारुगेहं रसादिष्टदोहम् ।
विरुच्याद्य मोहं विशेषेण सोऽहं
भजे भव्यवाहं भवाङ्गक्तगूहम् ॥ ७ ॥

रघूत्तंस रक्षोऽपकारिन् रणोग्र-
प्रताप प्रचण्डारिनाशैकनिष्ठ ।
रमानाथ रामेति ते नामपुञ्जं
रटन् गोचरस्स्यां रयात्ते कृपायाः ॥ ८ ॥

शिवाख्यातनामा शिवावाहिभूमा
स्वभक्तौघकामावहापाङ्गदामा ।

रिपूणां विरामाददा नित्यधामा
सदा पातु रामाभिधा मुक्तिसीमा ॥ ९ ॥
पिता मे च माता श्रिताभीष्टदाता
स रामो धराजाऽभिरामोऽमरार्च्यः ।
न चान्यो विचारो न चारुः प्रचारः
स रक्षेन्मम क्षेमपक्षे विविक्षेत् ॥ १० ॥
विरन्तुं हि मन्तोर्न जन्तुस्समर्थो
विहन्तुं तमीशे ह्यहन्तु त्वदाख्याम् ।
ब्रुवाणो नवागास्तवाङ्घ्री निषासी
कुधा मा कुथा मां वृथा त्वं व्यथायै ॥ ११ ॥
अङ्कावासिमहीसुताय नमतां पङ्काळये द्रुह्यते
हुङ्कारेण विनिर्जितारिततयेऽहङ्कारिणान्दूरतः ।
टङ्कायाघशिलाततेः मुनिमनोऽलङ्कारताङ्गग्मुषे
कङ्कायापि गतिप्रदाय रचये लङ्कारयेऽहं नतीः ॥१२॥

इति श्रीसुब्रह्मण्यकविमणिप्रणीतम्
॥ श्रीरामभुजङ्गस्तोत्रम् संपूर्णम् ॥

॥ श्रीसीतारामौ विजयेते ॥

अथ अगस्त्यसंहितोक्तः

॥ श्रीरामपट्टाभिषेकविधिः ॥

ब्राह्मणैरभ्यनुज्ञातः पत्न्या सह सङ्कल्प्य — नक्षत्रे — शौ जातस्य — शर्मणः मम — नक्षत्रे — राशौ जातायाः —

नाम्नयाः अस्याः मम धर्मपत्न्याश्च जन्मान्तरसहस्रकृतसकल-विधागामिसञ्चितपापपरिहारद्वारा आवयोः अयुष्मत्पुत्रपौत्रादिसमृध्यर्थं सकलविधक्षेमसिध्यर्थं श्रीसीतारामचन्द्रप्रसादेन आदेहान्तं अरोगदृढगात्रतासिध्यर्थं देहपातानन्तरं श्रीरामचन्द्रपदप्राप्त्यर्थं (विशिष्य — * सिध्यर्थं) अगस्त्यसंहितोक्तप्रकारेण श्रीसीतारामचन्द्रपट्टाभिषेकमहोत्सवाख्यं कर्म करिष्ये । इति सङ्कल्प्य विघ्नेशमभ्यर्च्य पुण्याहवाचनं कृत्वा तदुदकेन मण्टपपूजाद्रव्यादीनि प्रोक्ष्य ऋत्विग्वरणं कुर्यात् । अस्मिन् मया सङ्कल्पित श्रीसीतारामचन्द्रपट्टाभिषेककर्मणि आचार्यं वसिष्ठं त्वां वृणे ॥ (श्लो) यथाऽऽचार्यो वसिष्ठोऽभूदिक्ष्वाकूणां पुरे पुरा । तथा पट्टाभिषेकेऽस्मिन् अचार्यो भव सुव्रत ॥ इति वृत्वा । अस्मिन् कर्मणि ब्रह्माणं वामदेवं वृत्वा । (श्लो) । वामदेवो यथा ऋत्विग्ब्रह्माऽयोध्यापुरेऽभवत् । तथा पट्टाभिषेकेऽस्मिन् ब्रह्मा भव बुधोत्तम ॥ अथ जाबालिं, काश्यपं, कात्यायनं, गौतमं, सुयज्ञं, विजयं, चेत्यष्टौ ऋत्विजः उपद्रष्टारं चैकं वृणुयात् । अथ तान् प्रति प्रार्थना । (श्लो) । सर्वे स्वकर्मकुशला स्सर्वे श्रीरामरूपिणः । स्वस्वकर्म विनिर्वर्त्य कुरुध्वं मां कृतार्थकम् ॥ इति । ते च कर्मच्छिद्रपिधानार्थं * श्रीरामतारक विष्णुसहस्रनाम, नामत्रय, महामन्त्रान् जपेयुः ॥

---

* अत्र स्वाभीष्टं वक्तव्यम् ॥

* रामतारकः— मूलमन्त्रः । नामत्रयं—अच्युतायनमः । अनन्तायनमः । गोविन्दायनमः इति ॥

अथ गोमयोपलिप्तायां रङ्गवल्लचलंकृतायां भूमौ सुवर्ण-रजतताम्रान्यतमविरचितशलाकया प्रागपवर्गं रेखात्रयं विलिखेत् । ब्रह्मजज्ञानमिति मन्त्रेण मध्ये । यमायसोमामिति दक्षिणतः । आप्यायस्वेत्युत्तरतः । अथ तधुपर्युदगपवर्गुरेखात्रयं लिखेत् । यो रुद्रो अग्नाविति मध्ये । अप उपस्पृश्य । इदंविष्णुर्विचक्रम इति पश्चात् । इन्द्रं विश्वौ अवीवृधन् इति पूर्वतः । इति षड्रेखा लिखित्वा अद्भिरवोक्ष्य शलाकामैशान्यां निरस्य तत्र चतुर्विंशतिप्रस्थपरिमितान् व्रीहीन् तदुपरि तावन्मानांश्च तण्डुलान् प्रसार्य, तदुपरि सुवर्णसूत्रसहितं पट्टवस्त्रमनाहतं प्रसार्य, तत्र प्रागाद्यष्टदिक्षु अष्टदळपद्मेषु अष्टौ अकांस्यपैत्तळान् कलशान् प्रतिकलशं ब्रह्मजज्ञानमिति मन्त्रेण प्रतिष्ठाप्य तेष्वष्टादिक्षु नदीजलानि आपोवा इदं, शन्नोदेवीरभिष्टय इति प्रतिकलशं मन्त्रावृत्त्या प्रक्षिप्य, मध्ये पूर्वादिक्रमेण चतुरः कलशान् प्रतिष्ठाप्य, तान् चतुस्समुद्रजलैः पूर्वोक्तमन्त्रेण पूरयित्वा ओं भूर्भुवस्सुवरोमित्यक्षतान् निक्षिप्य चन्दनकुङ्कुमकुसुममालादिभिरलंकृत्य तेषु कलशेषु काण्डात्काण्डादिति दूर्वाग्राणि, पुष्पावतीरिति पुष्पाणि, याःफलिनीरिति फलानि, अश्वत्थेव इति पल्लवान्, सहिरण्यानीति रत्नानि, हिरण्यरूप इति हिरण्यम्, गन्धद्वारामिति चन्दनगोरोचनागैरिकपद्ममुस्ताकुङ्कुमकरसिद्धार्थप्रमुखानि सुगन्धिवस्तूनि च निक्षिप्य, पूर्वादिक्प्रवहन्नदीतीर्थान्यावाहयामीत्यादिरीत्या तत्तत्कलशेषु तत्तद्दिक्प्रवहन्नदीतीर्थान्यावाह्य, इमंमे गङ्गे इत्यभिमन्त्र्य, मध्ये पूर्वस-

मुद्रमावाहयामीत्यादिरीत्याऽऽवाह्य, समुद्राय वयुनायेत्यभिमन्त्र्य, तेषु द्वादशस्वपिकलशेषु तत्वायामीति वरुणमावाह्य, 'आवाहितेभ्यस्तीर्थेभ्योनमः' इति षोडशोपचारैरभ्यर्च्य पूजान्ते इमान् मन्त्रान् जापयेत् ॥

॥ तदा जपितव्या मन्त्राः ॥

(१) दधिक्राव्णः, (२) हिरण्यवर्णाः, (३) पवमानस्सुवर्जनः, (४) हिरण्यशृङ्गं, रुद्राध्यायः चमकं, (५) प्रत्युष्टꣳरक्षः (६) एतद्वा अपां, (७) पूर्णापश्चात्, (८) विष्णुमुखा वै दैवाः, (९) ऋष्टीनरोब्रह्मणावः, (१०) प्रतिपूरुषमेककपालान् इमे अनुवाक्काः, (११) आददेग्रावासीतिप्रश्नः, (१२) ब्रह्मणे ब्राह्मणमिति प्रश्नः, (१३) (ओं) नमः ग्राच्यैदिशे, (१४) भूः प्रपद्ये इमावनुवाकौ, (१५) विष्णुसूक्तम्, (१६) पुरुषसूक्तम्, (१७) रुद्रसूक्तम्, (१८) देवीसूक्तम्, (१९) दुर्गासूक्तम्, (२०) पञ्च शान्तयः ॥

अथ सीतारामचन्द्रप्रतिमां सौवर्णीं अग्न्युत्तारणादिभिस्संस्कृत्य पञ्चगव्ये निक्षिप्य प्राणप्रतिष्ठां कृत्वा पट्टाभिषेकमण्टपान्तस्थदिव्यसिंहासने प्रतिष्ठाप्य गुडान्नापूपादिनिवेदनपुरस्सरं षोडशोपचारैः कल्पोक्तविधिना कलशशङ्खपूजापुरस्सरमभ्यर्च्य पुष्पाक्षतलाजवस्त्राङ्गुलीयकच्छत्रचामरकिरीटादिपट्टाभिषेकद्रव्याणि शङ्खजलप्रोक्षणेन मूलमन्त्राभिमन्त्रणेन च शुचीकृत्य "शिरस्यञ्जलिमाधाये" ति पट्टाभिषेकसर्गं पठित्वा,

यजमानश्चतुस्समुद्रकलशैर्वसस्त्वेति पूर्वदिशि रुद्रास्त्वेति दक्षिणतः विश्वेत्वादेवा इति उत्तरतः बृहस्पतिस्त्वेति पश्चाच्च स्थित्वा तत्तत्समुद्रकलशैरभिषिञ्चेत् । तदा मङ्गळवाद्यानि स्तुतीः कनकवर्षाणि पुष्पवर्षाणि चोज्जृम्भयेत् । ततः आचार्यादय ऋत्विजोऽष्टौ कलशानादाय देवस्येति मन्त्रेण । 'इन्द्रियं वा एतदस्मिन् लोके । यद्दधि । यद्दध्नाऽभिषिञ्चति । इन्द्रियमेवास्मिंस्तद्दधाति । रसो वा एष ओषधिवनस्पतिषु । यन्मधु । यन्मध्वाभिषिञ्चति । रसमेवास्मिंस्तद्दधाति । तेजोवा एतत्पशूनाम् । यद्घृतम् । यद्घृतेनाभिषिञ्चति । तेज एवास्मिंस्तद्दधाति । अमृतं वा एतदस्मिन् लोके । यदापः । यदद्भिरभिषिञ्चति । अमृतमेवास्मिंस्तद्दधाति । इमा आपश्शिवतमाः । इमास्सर्वस्य भेषजीः । इमा राष्ट्रस्य वर्द्धनीः । इमाराष्ट्रभृतोऽमृताः । याभिरिद्रमभ्यषिञ्चत् प्रजापतिः । सोमं राजानं वरुणं यमं मनुम् । ताभिराद्भिरभिषिञ्चामि त्वामहम् । राज्ञां त्वमधिराजोभवेह । महान्तं त्वामहीनाम् । सम्राजं चर्षणीनाम् । देवीजनित्र्यजीजनत् । भद्राजनित्र्यजीजनत् । देवस्यत्वास + हस्ताभ्यां अश्वेस्तेजसा सूर्यस्य वर्चसा । इन्द्रस्येन्द्रियेणाभिषिञ्चामि । बलाय श्रियै यशसेऽन्नाद्याय । भूर्भुवस्सुवरोम् । इत्यैतरेयखण्डिकया च तीर्थान्यवशेषीकृत्याभिषिञ्चेयुः । अवशिष्टजलैः अनतिक्रान्तदशमवर्षाः अन्यूनपञ्चवर्षाश्च कन्याः मन्त्रियोधादयश्चाभिषिञ्चेपुः । इति रामप्रतिमां श्रीरामायणपुस्तकं चाभिषिच्य, तत्तन्मन्त्रैर्वस्त्राङ्गरागपुष्पमालिकाऽङ्गुळीयकच्छत्रचामरकिरीटा-

दिभिरलंकृत्य, धूपदीपभक्ष्यभोज्यादिनिवेदनैश्चाराध्य, कन्याभिर्नीराज्य, पुष्पाक्षतैराशिषोवाचयित्वा द्वादशकृत्वः प्रदक्षिणनमस्कारान् कुर्यात् । अनन्तरं श्रीरामायणार्थश्रावयितारं आचार्यं सपत्नीकं सीतारामरूपत्वेन ध्यात्वा, पीठे महोन्नते तौ स्थापयित्वा, सङ्कल्पपुरस्सरं पादप्रक्षालनवस्त्रधूपदीपादिभिरभ्यर्च्य, अचार्यानीं हरिद्राकुङ्कुमचन्दनादिभिः पत्न्यालेपयित्वा माङ्गल्यसूत्रपादाङ्गुल्याभरणादिकं च दापयेत् । चतुर्विंशतिसहस्रान् चतुर्विंशतिशतान् चतुर्विंशतिदशकान् चतुर्विंशतिसहस्रान् चतुर्विंशतिशतान् चतुर्विंशतिदशकान् चतुर्विंशतिं वा दीनारान् गोभूश्रीरामायणपुस्तकश्रीरामपादुकासाहितान् दद्यात् । गृहोपकरणानि च दद्यात् । अथ ऋत्विजां वरणक्रमेण गन्धपुष्पवस्त्रोपवीतभूषणदक्षिणादिकं यथाविभवं दद्यात् । दण्डवच्च प्रणमेत् । अथाभिषेककर्त्रीभ्यः कन्याभ्यः प्रथममङ्गालेपार्थं हरिद्रापङ्कं दद्यात् । ताश्च प्रथमं मुखं अथ कण्ठं अथ बाहू अथ पादौ चेति क्रमेण तेन पङ्केन स्वाङ्गानि लिंपेयुः । [हरिद्रालेपनं कुर्युर्मुखे तु प्रथमं स्त्रियः । अन्यथा तास्तु कुर्वाणा विन्दन्ते भर्तृवैशसम् ॥ मुखे कण्ठे कण्ठसूत्रे बाह्वोश्चरणयोरपि । स्त्रियो हरिद्रां लिंपेयुः स्नानकाले तथा शुभे ॥ इति सौभाग्यरत्नाकरोक्तेः] । अथ ताः कुङ्कुमचन्दनपुष्पवस्त्रकूर्पासकादिदानेन तोषयेत् । अथ चतुर्विंशतिसहस्रं तदृशांशान् तदृशांशान् चतुर्विंशतिं वा ब्राह्मणान् सुवासिनीश्च दधिमध्वाज्यप्रचुरं मृष्टान्नैर्भोजयेत् । रात्रौ पट्टाभिषेकसर्गप्रवचनानन्तरं

श्रीरामप्रतिमां रामायणग्रन्थं च शिबिकाद्यारोप्याष्टादशवाद्यघोषपुरस्सरं वीथिभ्रमणं कारयित्वा गृहं प्रविशेत् । एवं कृते श्रीरामचन्द्रस्सीतासहितः गृहे नित्यसन्निहितो भूत्वा भुक्तिमुक्तीं प्रयच्छतीति शिवम् ॥

॥ अथ होमः ॥

अयञ्च होमः अभिषेकारम्भात्पूर्वमेव कर्तव्यः । होमाशक्तौ होमद्रव्यं ब्राह्मणेभ्यो दक्षिणासहितं दत्वा होममन्त्रान् त्रिगुणमावर्तयेत् ॥

अथाचार्य यजमानसङ्कल्पित श्रीसीतारामचन्द्रपट्टाभिषेककर्माङ्गभूतं होमं करिष्यामीति सङ्कल्प्य । यजमानः यथाविधिहिते औपासनाग्नौ होमं कुर्यात् । तदभावे आचार्यः स्वयं वा श्रोत्रियागाराल्लौकिकाग्निमाहृत्य अरत्निमात्रपरिमितरेखोल्लेखनादिसंस्कारविशिष्टस्य स्थण्डिलस्य कुण्डस्य वा पुरतः पात्रे स्थापयित्वा, मूलमन्त्रेणावेक्ष्य, फडित्यस्त्रेण प्रोक्ष्य, तेनैव दर्भैस्सन्ताड्य हुमितिकवचेनावकुण्ठ्य । अनेन प्रकारेण क्रव्यादांशं निर्ऋतिभागात् बदरीमात्रमुत्सृज्य शिष्टं देवांशमग्निं रामियग्निबीजेन चैतन्येन संयोज्य मूलमन्त्रेणाभिमन्त्र्य भूर्भुवस्सुवरोमित्यग्निं प्रतिष्ठाप्य "अद्य क्रियमाणे श्रीसीतारामपट्टाभिषेकाख्यशुभकर्माणि साङ्गं सायुधं सपरिवारं श्रीरामचन्द्रं सिद्धान्नद्रव्येण घृतेन च यक्ष्ये" इति पुनः सङ्कल्प्य, अग्निमिध्वा धात्वा अलङ्कृत्य दर्भैः परिस्तीर्य षट्पात्राण्यासाद्य प्रोक्षणी-

जलेन मूलमन्त्रेण प्रोक्ष्य इध्मप्रक्षेपणान्तं स्वगृह्योक्तविधिना कृत्वा वाग्यतो भूत्वा न्यासं कुर्यात् । सहस्रार्चिषे हृदयाय नमः । स्वस्ति पूर्णाय शिरसे स्वाहा । उत्तिष्ठपुरुषाय शिखायै वषट् । धूमव्यापिने कवचाय हुम् । सप्तजिह्वाय नेत्रत्रयाय वौषट् । धनुर्धराय अस्त्राय फट् । समिधमादाय, वैश्वानर जातवेद इहावहलोहिताक्षसर्वकर्माणि साधयसाधयस्वाहा इत्यावाह्य समिधं क्षिप्त्वा । ओं चित्पिङ्गळ हनहन दहदह पचपच सर्वज्ञाज्ञापयस्वाहा इत्यग्निं दीपयेत् ॥श्लो॥ अग्निं प्रज्वलितं वन्दे जातवेदसमूर्जितम् । हिरण्यवर्णममलं समिद्धं सर्वतोमुखम् ॥ इति नमस्कृत्य प्रणवस्य पञ्चदशावृत्त्या सकलजगत्कारणवह्नेर्गर्भाधानादिकाः क्रियास्संपद्यन्ता स्वाहा । इति गर्भाधानादिपञ्चदशसंस्कारान् मनसा भावयेत् ॥ श्लो ॥ मणिबन्धौ समौ कृत्वा तन्मध्येऽङ्गुष्ठकौ क्षिपेत् । मुद्रेयं सप्तजिह्वाख्या दर्शयेज्जातवेदसे ॥ इत्युक्तप्रकारां सप्तजिह्वमुद्रां प्रदर्श्य । ओं जातवेदसे नमः, सप्तजिह्वाय नमः, हव्यवाहनाय नमः, अश्वोदराय नमः, वैश्वानराय नमः, कौमारचेतसे नमः, विश्वमुखाय नमः, देवमुखाय नमः, इत्यष्टसु दिक्ष्वग्निमभ्यर्च्य मध्येग्नि रत्नसिंहासनं विभाव्य तत्र मूलमन्त्रं दशकृत्व उच्चार्य रामगायत्र्या साङ्गं सायुधं सशक्तिं सपरिवारं श्रीरामचन्द्रमावाहयामीत्यावाह्य मन्त्रन्यासं कुर्यात् । ओं रां नमः [शिरसि] ओं रां नमः [भ्रूमध्ये] ओं मां नमः [हृदये] ओं यं नमः [नाभौ] ओं नं नमः [गुह्ये] ओं मं नमः [पादयोः] ओं

रां नमः [शिरसि] ओं रामाय नमः [नाभौ] ओं नमो नमः [पादयोः] एवं न्यासं कृत्वा आवाहनी, स्थापनी, सन्निधिकरणी, सन्निरोधिनी, संमुखीकरणी, सकलीकरणी, महामुद्रा, शङ्ख, चक्र, गदा, पद्म, धेनु, कौस्तुभ, गरुड, श्रीवत्स, वनमाला, योनिमुद्राः सप्तदश प्रदर्श्य अग्नौ स्थिताय श्रीरामाय सायुधाय साङ्गाय सपरिवारायेति आसनादिनीराजनान्तं पूजां कृत्वा, स्रुवेण स्रुच्याज्यमादाय आघारावाघार्य चतुर्गृहीतेनाज्येन अग्नये स्वाहा, सोमायस्वाहेति हुत्वा पुनश्चतुर्गृहीतेन अग्नयेस्वाहेति अग्निमुखाहुतिं जुहुयात् । अथाज्यप्लुतं हविः हुमिति कवचेनावकुण्ठ्य फडित्यस्त्रेण रक्षोभ्यः परिरक्ष्य मूलमन्त्रेण प्रोक्ष्य अभिमन्त्र्य च 'मध्यमानामिकाङ्गुष्टैर्मृगमुद्रा प्रकीर्तिता' इत्युक्तप्रकारमृगमुद्रया आदौ श्रीरामाय सशक्तिकाय स्वाहा इति षोडशान्नाहुतीर्हुत्वा, मूलमन्त्रेण सहस्राहुती राज्येन हुत्वा, रामगायत्र्या च सहस्राज्याहुतीर्हुत्वा, संक्षेपसर्गोक्तश्लोकैश्च हुत्वा, ततः द्वारपीठाङ्गदेवतानामेकैकामाहुतिं जुहुयात् । तत्र गणेशादिद्वारदेवता द्वात्रिंशत् । ओं * गं गणेशायस्वाहा, (यजमानः गणेशायेदं नममेत्यादिं स्वयमेव त्यागं प्रवदेत्) सं सवित्रे स्वाहा, ओं शिवाय स्वाहा, ह्रीं रशक्तये स्वाहा, दीं दीपकळानाथाय स्वाहा, क्षें क्षेत्रपालाय वाहा, (पूर्वद्वारे) द्वारश्रियै स्वाहा, देहळयै स्वाहा, धात्रे वाहा, विधात्रे स्वाहा, गं गङ्गायै स्वाहा, यं यमुनायै स्वाहा,

* एवमेव उत्तरत्रापि प्रत्याहुति प्रणवमादौ वदेत् ॥

(दक्षिणद्वारे) द्वारश्रियै स्वाहा, देहळ्यै स्वाहा, भद्राय स्वाहा, सुभद्राय स्वाहा, गोदावर्यै स्वाहा, कृष्णवेण्यै स्वाहा, (पश्चिमद्वारे) द्वारश्रियै स्वाहा, देहळ्यै स्वाहा, चण्डाय स्वाहा, प्रचण्डाय स्वाहा, रेवायै स्वाहा, तापिन्यै स्वाहा, (उत्तरद्वारे) द्वारश्रियै स्वाहा, देहळ्यै स्वाहा, बलाय स्वाहा, प्रबलाय स्वाहा, वाण्यै स्वाहा, वेण्यै स्वाहा, शङ्खनिधये स्वाहा, पद्मनिधये स्वाहा ॥

॥ अथ मण्डूकादिपीठदेवताः अष्टाचत्वारिंशत् ॥

मण्डूकाय स्वाहा, कालाग्निरुद्राय स्वाहा, कूर्माय स्वाहा, आधारशक्तये स्वाहा, क्षीरसागराय स्वाहा, श्वेतद्वीपाय स्वाहा, रत्नमण्टपाय स्वाहा, कल्पवृक्षाय स्वाहा, रत्नवेदिकायै स्वाहा, रत्नसिंहासनाय स्वाहा, धर्माय स्वाहा, ज्ञानाय स्वाहा, वैराग्याय स्वाहा, ऐश्वर्याय स्वाहा, अधर्माय स्वाहा, अज्ञानाय स्वाहा, अवैराग्याय स्वाहा, अनैश्वर्याय स्वाहा, आनन्दकन्दाय स्वाहा, संविन्नालाय स्वाहा, सर्वतत्त्वसरोरुहाय स्वाहा, प्रकृतिपत्रेभ्यः स्वाहा, विकारकेसरेभ्यः स्वाहा, पञ्चाशद्वर्णात्मककर्णिकायै स्वाहा, अं अर्कमण्डलाय द्वादशकलात्मने स्वाहा, चं सोममण्डलाय षोडशकलात्मने स्वाहा, रं वह्निमण्डलाय दशकलात्मने स्वाहा, सत्त्वाय प्रबोधात्मने स्वाहा, रजसे प्रकृत्यात्मने स्वाहा, तमसे मोहात्मने स्वाहा, आत्मने स्वाहा, अन्तरात्मने स्वाहा, परमात्मने स्वाहा, ज्ञानात्मने स्वाहा, मायातत्त्वाय स्वाहा, कलातत्त्वाय स्वाहा, विद्यातत्त्वाय स्वाहा, परतत्त्वाय

स्वाहा, विमलायै स्वाहा, उत्कर्षिण्यै स्वाहा, ज्ञानायै स्वाहा, क्रियायै स्वाहा, योगायै स्वाहा, प्रह्वयै स्वाहा, सत्यायै स्वाहा, ईशानायै स्वाहा, अनुग्रहायै स्वाहा, ओं नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मयोगपीठात्मने स्वाहा, ॥

॥ अथाङ्गावरणदेवता अष्टादशोत्तरशतम् ॥

रां हृदयाय स्वाहा । रीं शिरसे स्वाहा । रूं शिखायै स्वाहा । रैं कवचाय स्वाहा । रौं नेत्रत्रयाय स्वाहा रः अस्त्राय स्वाहा । आं आत्मने स्वाहा । निं निवृत्त्यै स्वाहा । अं अन्तरात्मने स्वाहा । प्रं प्रतिष्ठायै स्वाहा । पं परमात्मने स्वाहा विं विद्यायै स्वाहा । ज्ञां ज्ञानात्मने स्वाहा । क्षां क्षान्त्यै स्वाहा । वां वासुदेवाय स्वाहा । श्रीं श्रियै स्वाहा । सं सङ्कर्षणाय स्वाहा । शां शान्त्यै स्वाहा । प्रं प्रद्युम्नाय स्वाहा । रं रत्यै स्वाहा । अं अनिरुद्धाय स्वाहा । प्रीं प्रीत्यै स्वाहा । हं हनुमते स्वाहा । सुं सुग्रीवाय स्वाहा । भं भरताय स्वाहा । विं विभीषणाय स्वाहा । लं लक्ष्मणाय स्वाहा । अं अङ्गदाय स्वाहा । शं शत्रुघ्नाय स्वाहा । जां जाम्बवते स्वाहा । धृं धृष्टये स्वाहा । जं जयन्ताय स्वाहा । विं विजयाय स्वाहा । सुं सुराष्ट्राय स्वाहा । रां राष्ट्रवर्द्धनाय स्वाहा । अं अशोकाय स्वाहा । धं धर्मपालाय स्वाहा । सुं सुमन्त्राय स्वाहा । वं वसिष्ठाय स्वाहा । वां वामदेवाय स्वाहा । जां जाबालये स्वाहा । गौं गौतमाय स्वाहा । भं भरद्वाजाय स्वाहा । कौं कौशिकाय स्वाहा । वां वाल्मीकये स्वाहा । नां ना-

रदाय स्वाहा । सं सनकाय स्वाहा । सं सनन्दनाय स्वाहा । सं सनातनाय स्वाहा । सं सनत्कुमाराय स्वाहा । नीं नीलाय स्वाहा । नं नळाय स्वाहा । पं पनसाय स्वाहा । गं गवयाय स्वाहा । गं गवाक्षाय स्वाहा । शं शरभाय स्वाहा । सुं सुषेणाय स्वाहा । मैं मैन्दाय स्वाहा । द्विं द्विविदाय स्वाहा । किं किरीटाय स्वाहा । कुं कुण्डलद्वयाय स्वाहा । श्रीं श्रीवत्साय स्वाहा । कौं कौस्तुभाय स्वाहा । शं शङ्खाय स्वाहा । चं चक्राय स्वाहा । गं गदायै स्वाहा । पं पद्माय स्वाहा । धुं ध्रुवाय स्वाहा । धं धराय स्वाहा । सों सोमाय स्वाहा । अं अर्क्यः स्वाहा । अं अनिलाय स्वाहा । अं अनलाय स्वाहा । प्रं प्रत्यूषाय स्वाहा । प्रं प्रभासाय स्वाहा । वीं वीरभद्राय स्वाहा । शं शम्भवे स्वाहा । गिं गिरीशाय स्वाहा । अं अजैकपदे स्वाहा । अं अहये बुध्नियाय स्वाहा । पिं पिनाकिने स्वाहा । भुं भुवनेशाय स्वाहा । कं कपालिने स्वाहा । दिं दिक्पतये स्वाहा । स्थां स्थाणवे स्वाहा । भं भगाय स्वाहा । अं अरुणाय स्वाहा । सूं सूर्याय स्वाहा । वें वेदाङ्गाय स्वाहा । भां भानवे स्वाहा । रं रवये स्वाहा । गं गभस्तये स्वाहा । यं यमाय स्वाहा । हिं हिरण्यरेतसे स्वाहा । दिं दिवाकराय स्वाहा । मिं मित्राय स्वाहा । विं विष्णवे स्वाहा । धां धात्रे स्वाहा । इं इन्द्राय स्वाहा । रं अग्नये स्वाहा । यं यमाय स्वाहा । क्षं निरृतये स्वाहा । वं वरुणाय स्वाहा । यं वायवे स्वाहा । कुं कुबेराय स्वाहा । ईं ईशानाय स्वाहा । अं ब्रह्मणे स्वाहा ।

हीं विष्णवे स्वाहा । वं वज्राय स्वाहा । शं शक्तये स्वाहा । दं दण्डाय स्वाहा । कुं कुन्ताय स्वाहा । पां पाशाय स्वाहा । ध्वं ध्वजाय स्वाहा । गं गदायै स्वाहा । त्रिं त्रिशूलाय स्वाहा । अं अब्जाय स्वाहा । चं चक्राय स्वाहा ॥

एवं मिळिता द्वारपीठाङ्गावरणदेवता अष्टनवत्यधिकशत सङ्ख्याः ॥

अथ गं गणेशाय स्वाहा । सं सवित्रे स्वाहा । मं महेशाय स्वाहा । हीं हियै स्वाहा । इति चतस्र आहुतीर्हुत्वा स्विष्टकृतं जुहुयात् । अत्र जयाद्विहोमो नास्ति । दर्व्या परिधीननक्तीत्यादि परिधिग्रहरणान्तं कृत्वा जुह्वां स्रुवं निधाय विश्वान् देवान् सुस्रावभागानुद्दिश्य हुत्वा अस्मिन् सीतारामपट्टाभिषेककर्मणि प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्नसुषुप्तिषु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण च यत्कृतं यदध्यातं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु । ओं भूर्भुवस्सुवः स्वाहा । ब्रह्मण इदं नमम । ततः पूर्णाहुतिः । पूर्णफलानि कौशेयवस्त्रावेष्ट्य तत्र पञ्चरत्नसुवर्णसुगन्धिद्रव्याणि निक्षिप्य पूर्णाहुतिर्विर्देवताभ्य इति पूजयित्वा स्रुचि निधायोत्थाय मूलमन्त्रं त्रिकृत्व उच्चार्य साङ्गाय सायुधाय सवाहनाय सपरिवाराय श्रीसीतापतये स्वाहा श्रीरामायेदं नमममेति घुष्यत्सु वाद्येषु पूर्णाहुतिं हुत्वा होमं समाप्य ॥ [श्लो] सर्वदेवस्वरूपाय पराय परमेष्ठिने । श्रीरामसेनायुक्ताय विष्वक्सेनाय ते नमः ॥ श्रीरामपार्षदेभ्यो नमः, भैरवाय नमः, योगिनीभ्यो नमः, बलिं समर्प-

यामीति हुतशेषेण बलिं दद्यात् । अथ पूर्णपात्रोदकमधिकजल-सहितं सप्तवारमूलमन्त्रेणाभिमन्त्र्य दूर्वातुळसीयुक्तेन तेन जले-नात्मानं पत्नीश्च पावमानीभिराभिषिच्य त्र्यायुषमिति भस्मना तिलकं धृत्वा यज्ञेनयज्ञामित्यग्निस्थितं सपरिवारं श्रीसीताराम-चन्द्रं हृदयकमलं प्रवेशयामीति हृदयं प्रवेश्य यज्ञेश्वरं पञ्चोप-चारैरभ्यर्च्य अग्नेनयेति अग्निं प्रदक्षिणीकृत्य नमस्ते गार्हपत्या-येति त्रिर्नमस्कृत्य यस्यस्मृत्याचेति सर्वं श्रीरामायार्पयेत् । ब्रह्मणे पूजां कृत्वा विसृजेत् । अथ होमकर्तृकेभ्यो ब्राह्मणेभ्य-स्सद्य एव दक्षिणाताम्बूलादिकं दत्वा तान् परितोषयेत् ॥

॥ इत्यगस्त्यसंहितायां श्रीरामपट्टाभिषेकविधिः ॥

॥ होमसहितः समाप्तः ॥

॥ श्रीसीतारामौ विजयेते ॥

॥ अथ रामरहस्योक्तम् ॥

॥ श्रीरामाष्टोत्तरशतनामस्तोत्रम् ॥

रामो रावणसंहारकृतमानुषविग्रहः ।
कौसल्यासुकृतव्रातफलं दशरथात्मजः ॥ १ ॥
लक्ष्मणार्चितपादाब्जस्सर्वलोकप्रियङ्करः ।
साकेतवासिनेलाब्जसंश्रीणनदिवाकरः ॥ २ ॥
विश्वामित्रप्रियश्शान्तः ताटकाध्वान्तभास्करः ।

सुग्राहुराक्षसरिपुः कौशिकाध्वरपालकः ॥ ३ ॥
अहल्यापापसंहर्ता जनकेन्द्रप्रियातिथिः ।
पुरारिचापदळनो वीरलक्ष्मीसमाश्रयः ॥ ४ ॥
सीतावरणमाल्याढ्यो जामदग्न्यमदापहः ।
चैदेहीकृतशृङ्गारः पितृप्रीतिविवर्द्धनः ॥ ५ ॥
ताताज्ञोत्सृष्टहस्तस्थराज्यस्सत्यप्रतिश्रवः ।
तमसातीरसंचारी गुहानुग्रहतत्परः ॥ ६ ॥
सुमन्त्रसेवितपदो भरद्वाजप्रियातिथिः ।
चित्रकूटप्रियस्थानः पादुकान्यस्तभूभरः ॥ ७ ॥
अनसूयाङ्गरागाङ्गसीतासाहित्यशोभितः ।
दण्डकारण्यसञ्चारी विराधस्वर्गदायकः ॥ ८ ॥
रक्षःकालान्तकस्सर्वमुनिसङ्घसुदावहः ।
प्रतिज्ञाताशरवधः शरभङ्गगतिप्रदः ॥ ९ ॥
अगस्त्यार्पितबाणासखड्गतूणीरमाण्डितः ।
प्राप्तपञ्चवटीवासो गृध्रराजसहायवान् ॥ १० ॥
कामिशूर्पनखाकर्णनासच्छेदनियामकः ।
खरादिराक्षसव्रातखण्डनाविसज्जनः ॥ ११ ॥
सीतासंश्लिष्टकायाभाजितविद्युताम्बुदः ।
मारीचहन्ता मायाढ्यो जटायुर्मोक्षदायकः ॥ १२ ॥
कबन्धबाहुलवन शबरीप्रार्थितातिथिः ।
हनूमद्वान्दितपद स्सुग्रीवसुहृदव्ययः ॥ १३ ॥

दैत्यकङ्काळविक्षेपी सप्तसालप्रभेदकः ।
एकेषुहतवाली च तारासंस्तुतसद्गुणः ॥ १४ ॥
कपीन्द्रीकृतसुग्रीव स्सर्ववानरपूजितः ।
वायुसूनुसमानीतसीतासन्देशनन्दितः ॥ १५ ॥
जैत्रयात्रोद्यतोऽजिष्णु र्विष्णुरूपो निराकृतिः ।
कंपिताम्भोनिधिस्संपत्प्रदस्सेतुनिबन्धनः ॥ १६ ॥
लङ्काविभेदनपटु र्निशाचरविनाशकः ।
कुम्भकर्णाख्यकुम्भीन्द्रमृगराजपराक्रमः ॥ १७ ॥
मेघनादवधोद्युक्तलक्ष्मणास्त्रबलप्रदः ।
दशग्रीवान्धतामिस्रप्रमापणप्रभाकरः ॥ १८ ॥
इन्द्रादिदेवतास्तुत्य श्चन्द्राभमुखमण्डलः ।
विभीषणार्पितनिशाचरराज्यो वृषप्रियः ॥ १९ ॥
वैश्वानरस्तुतगुणावनिपुत्रीसमागतः ।
पुष्पकस्थानसुभगः पुण्यवत्प्राप्यदर्शनः ॥ २० ॥
राज्याभिषिक्तो राजेन्द्रो राजीवसदृशेक्षणः ।
लोकतापापहर्ता च धर्मसंस्थापनोद्यतः ॥ २१ ॥
शरण्यः कीर्तिमान्नित्यो वदान्यः करुणार्णवः ।
संसारसिन्धुसंमग्नतारकाख्यामहोज्वलः ॥ २२ ॥
मधुरोमधुरोक्तिश्च मधुरानायकाग्रजः ।
शम्बूकदत्तस्वर्लोक श्शम्बरारातिसुन्दरः ॥ २३ ॥
अश्वमेधमहायाजी वाल्मीकिप्रीतिमान् वशी ।

स्वयंरामायणश्रोता पुत्रप्राप्तिप्रमोदितः ॥ २४ ॥
ब्रह्मादिस्तुतमाहात्म्यो ब्रह्मर्षिगणपूजितः ।
वर्णाश्रमरतो वर्णाश्रमधर्मनियामकः ॥ २५ ॥
रक्षापरो राजवंशप्रतिष्ठापनतत्परः ।
गन्धर्वहिंसासंहारी धृतिमान् दीनवत्सलः ॥ २६ ॥
ज्ञानोपदेष्टा वेदान्तवेद्यो भक्तप्रियङ्करः ।
वैकुण्ठवासी पायान्नश्चराचरविमुक्तिदः ॥ २७ ॥

॥ इति श्रीरामाष्टोत्तरशतनामस्तोत्रम् ॥

॥ समाप्तम् ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीरामाष्टोत्तरशतनामावळिः ॥

॥ प्रारभ्यते ॥

ओं श्रीरामाय नमः
रावणसंहारकृतमानुषविग्रहाय नमः
कौसल्यासुकृतव्रातफलाय नमः
दशरथात्मजाय नमः
लक्ष्मणार्चितपादाब्जाय नमः
सर्वलोकप्रियङ्कराय नमः
साकेतवासिनेत्राब्जसंप्रीणन-दिवाकराय नमः
विश्वामित्रप्रियाय नमः
शान्ताय नमः
ताटकाध्वान्तभास्कराय नमः
सुबाहुराक्षसरिपवे नमः
कौशिकाध्वरपालकाय नमः

अहल्यापापसंहर्त्रे नमः
जनकेन्द्रप्रियातिथये नमः
पुरारिचापदळनाय नमः
वीरलक्ष्मीसमाश्रयाय नमः
सीतावरणमाल्याढ्याय नमः
जामदग्न्यमदापहाय नमः
वैदेहीकृतशृङ्गाराय नमः
पितृप्रीतिविवर्द्धनाय नमः
तातज्ञोत्सृष्टहस्तस्थराज्याय
सत्यप्रतिश्रवाय नमः [नमः
तमसातीरसंवासिने नमः
गुहानुग्रहतत्पराय नमः
सुमन्त्रसेवितपदाय नमः
भरद्वाजप्रियातिथये नमः
चित्रकूटप्रियस्थानाय नमः
पादुकान्यस्तभूभराय नमः
अनसूयाङ्गरागाङ्गसीतासाहि-
त्यशोभिताय नमः
दण्डकारण्यसञ्चारिणे नमः
विराधस्वर्गदायकाय नमः
रक्षःकालान्तकाय नमः
सर्वमुनिसङ्घमुदावहाय नमः
प्रतिज्ञाताशरवधाय नमः
शरभङ्गगतिप्रदाय नमः
अगस्त्यार्पितबाणासखड्ग-
तूणीरमण्डिताय नमः
प्राप्तपञ्चवटीवासाय नमः
गृद्धराजसहायवते नमः
कामिशूर्पणखाकर्णनासच्छेद-
नियामकाय नमः
खरादिराक्षसव्रातखण्डनावि-
तसज्ञनाय नमः ॥४०॥
सीतासंश्लिष्टकायाभाजितवि-
द्युद्युताम्बुदाय नमः
मारीचहन्त्रे नमः
मायाढ्याय नमः
जटायुर्मोक्षदायकाय नमः
कबन्धबाहुलवनाय नमः
शबरीप्रार्थितातिथये नमः
हनुमद्वन्दितपदाय नमः
सुग्रीवसुहृदेऽव्ययाय नमः
दैत्यकङ्कालविक्षेपिणे नमः
सप्तसालप्रभेदकाय नमः
एकेषुहतवालिने नमः

तारासंस्तुतसद्गुणाय नमः
कपीन्द्रीकृतसुग्रीवाय नमः
सर्ववानरपूजिताय नमः
वायुसूनुसमानीतसीतासन्देश-
नान्दिताय नमः
जैत्रयात्रोद्यताय नमः
जिष्णवे नमः
विष्णुरूपाय नमः
निराकृतये नमः
कंपिताम्भोनिधये नमः
संपत्प्रदाय नमः
सेतुनिबन्धनाय नमः
लङ्काविभेदनपटवे नमः
निशाचरविनाशकाय नमः
कुम्भकर्णाख्यकुम्भीन्द्रसृगरा-
जपराक्रमाय नमः
मेघनादवधोद्युक्तलक्ष्मणास्त्र-
बलप्रदाय नमः
दशग्रीवान्धतामिस्रप्रमापण-
प्रभाकराय नमः
इन्द्रादिदेवतास्तुत्याय नमः
चन्द्राभमुखमण्डलाय नमः
विभीषणार्पितनिशाचरररा-
ज्याय नमः ॥७०॥
वृषप्रियाय नमः
वैश्वानरस्तुतगुणावनिपुत्री-
समागताय नमः
पुष्पकस्थानसुभगाय नमः
पुण्यवत्प्राप्यदर्शनाय नमः
राज्याभिषिक्ताय नमः
राजेन्द्राय नमः
राजीवसदृशेक्षणाय नमः
लोकतापापहर्त्रे नमः
धर्मसंस्थापनोद्यताय नमः
शरण्याय नमः ॥८०॥
कीर्तिमते नमः
नित्याय वदान्याय नमः
करुणार्णवाय नमः
संसारसिन्धुसंमग्नतारकाख्या-
मनोहराय नमः
मधुराय नमः
मधुरोक्तये नमः
मधुरानायकाग्रजाय नमः
शम्बूकदत्तस्वर्लोकाय नमः

शम्बरारातिसुन्दराय नमः
अश्वमेधमहायाजिने नमः
वाल्मीकिप्रीतिमते नमः
वशिने नमः ॥९२॥
स्वयं रामायणश्रोत्रे नमः
पुत्रप्राप्तिप्रमोदिताय नमः
ब्रह्मादिस्तुतमाहात्म्याय नमः
ब्रह्मर्षिगणपूजिताय नमः
वर्णाश्रमरताय नमः
वर्णाश्रमधर्मनियामकाय नमः
रक्षापराय नमः
राजवंशप्रतिष्ठापनतत्पराय नमः
गन्धर्वहिंसासंहारिणे नमः
धृतिमते नमः ॥१०२॥
दीनवत्सलाय नमः
ज्ञानोपदेष्ट्रे नमः
वेदान्तवेद्याय नमः
भक्तप्रियङ्कराय नमः
वैकुण्ठवासिने नमः
चराचरविमुक्तिदाय नमः

॥ इति श्रीरामाष्टोत्तरशतनामावळिस्संपूर्णा ॥

॥ श्रीरामो जयति ॥

॥ अथ ब्रह्मयामळे रामरहस्यगतम् ॥

॥ श्रीसीताष्टोत्तरशतनामस्तोत्रम् ॥

सीता सीरध्वजसुता सीमातीतगुणोज्वला ।
सौन्दर्यसारसर्वस्वभूता सौभाग्यदायिनी ॥ १ ॥
देवी देवार्चितपदा दिव्या दशरथस्नुषा ।
रामा रामप्रिया रम्या राकेन्दुवदनोज्वला ॥ २ ॥
वीर्यशुल्का वीरपत्नी वियन्मध्या वरप्रदा ।
पतिव्रता पङ्क्तिकण्ठनाशिनी पावनस्मृतिः ॥ ३ ॥

चन्द्रारुवत्सला वीरमाता वृतरघूत्तमा ।
संपत्करी सदातुष्टा साक्षिणी साधुसंमता ॥ ४ ॥
नित्या नियतसंस्थाना नित्यानन्दा नुतिप्रिया ।
पृथ्वी पृथ्वीसुता पुत्रदायिनी प्रकृतिः परा ॥ ५ ॥
हनूमत्स्वामिनी हृद्या हृदयस्था हताशुभा ।
हंसयुक्ता हंसगतिर्हर्षयुक्ता हताशरा ॥ ६ ॥
साररूपा सारवचा स्साध्वी च सरमाप्रिया ।
त्रिलोकवन्द्या त्रिजटासेव्या त्रिपथगार्चिनी ॥ ७ ॥
त्राणप्रदा त्रातकाका तृणीकृतदशानना ।
अनसूयाङ्गरागाङ्काऽनसूया सूरिवन्दिता ॥ ८ ॥
अशोकवनिकास्थानाऽशोका शोकविनाशिनी ।
सूर्यवंशस्तुषा सूर्यमण्डलान्तस्थवल्लभा ॥ ९ ॥
श्रुतमात्राघहरणा श्रुतिसन्निहितेक्षणा ।
पुष्पप्रिया पुष्पकस्था पुण्यलभ्या पुरातना ॥ १० ॥
पुरुषार्थप्रदा पूज्या पूतनामा परन्तपा ।
पद्मप्रिया पद्महस्ता पद्मा पद्ममुखी शुभा ॥ ११ ॥
जनशोकहरा जन्ममृत्युशोकविनाशिनी ।
जगद्रूपा जगद्वन्द्या जयदा जनकात्मजा ॥ १२ ॥
नाथनीयकटाक्षा च नाथा नाथैकतत्परा ।
नक्षत्रनाथवदना नष्टदोषा नयावहा ॥ १३ ॥
वह्निपापहरा वह्निशैत्यकृद्वह्निदायिनी ।

वाल्मीकिगीतविभवा वचोऽतीता वराङ्गना ॥ १४ ॥
भक्तिगम्या भव्यगुणा भात्री भरतवन्दिता ।
सुचर्णाङ्गी सुखकरी सुग्रीवाङ्गदसेविता ॥ १५ ॥
वैदेही विनताघौघनाशिनी विधिवन्दिता ।
लोकमाता लोचनान्तस्थितकारुण्यसागरा ॥ १६ ॥
कृताकृतजगद्धेतुः कृतराज्याभिषेकका ।
इदमष्टोत्तरशतं सीतानाम्नां तु या वधूः ॥ १७ ॥
भक्तियुक्ता पठेत्सा तु पुत्रपौत्रादिनन्दिता ।
धनधान्यसमृद्धा च दीर्घसौभाग्यदर्शिनी ।
पुंसामपि स्तोत्रमिदं पठनात्सर्वसिद्धिदम् ॥ १८ ॥

॥ इति ब्रह्मायामळे रामरहस्यगतम् ॥
॥ सीताष्टोत्तरशतनामस्तोत्रम् समाप्तम् ॥

॥ श्रीसीतारामौ विजयेते ॥
॥ अथ श्रीरामरहस्योक्ता ॥

॥ श्रीसीताष्टोत्तरशतनामावळिः ॥

ओं सीतायै नमः
स्मरध्वजसुतायै नमः
सीमाऽतीतगुणोज्वलायै नमः
सौन्दर्यसारसर्वस्वभूतायै नमः
सौभाग्यदायिन्यै नमः
देव्यै नमः
देवार्चितपदायै नमः
दिव्यायै नमः

दशरथस्नुषायै नमः
रामायै नमः ॥१०॥
रामप्रियायै नमः
रम्यायै नमः
राकेन्दुवदनोज्वलायै नमः
वीर्यशुल्कायै नमः
वीरपत्न्यै नमः
वियन्मध्यायै नमः
वरप्रदायै नमः
पतिव्रतायै नमः
पङ्क्तिकण्ठनाशिन्यै नमः
पावनस्मृतये नमः ॥२०॥
नन्दारुवत्सलायै नमः
वीरमात्रे नमः
धूतरघूत्तमायै नमः
संपत्कर्यै नमः
सदातुष्टायै नमः
साक्षिण्यै नमः
साधुसंमतायै नमः
नित्यायै नमः
नियतसंस्थानायै नमः
नित्यानन्दायै नमः ॥३०॥
स्तुतिप्रियायै नमः
पृथ्व्यै नमः
पृथ्वीसुतायै नमः
पुत्रदायिन्यै नमः
प्रकृत्यैपरायै नमः
हनूमत्स्वामिन्यै नमः
हृद्यायै नमः
हृदयस्थायै नमः
हताशुभायै नमः
हंसयुक्तायै नमः ॥४०॥
हंसगतये नमः
हर्षयुक्तायै नमः
हताशरायै नमः
साररूपायै नमः
सारवचसे नमः
साध्व्यै नमः
सरमाप्रियायै नमः
त्रिलोकवन्द्यायै नमः
त्रिजटासेव्यायै नमः
त्रिपथगार्चिन्यै नमः ॥५०॥
त्राणप्रदायै नमः
त्रातकाकायै नमः

तृणीकृतदशाननायै नमः
अनसूयाङ्गरागाङ्कायै नमः
अनसूयायै नमः
सूरिवान्दितायै नमः
अशोकवनिकास्थानायै नमः
अशोकायै नमः
शोकनाशिन्यै नमः
सूर्यवंशस्तुषायै नमः ॥६०॥
सूर्यमण्डलान्तस्स्थवल्लभायैनमः
श्रुतमात्राघहरणायै नमः
श्रुतिसाम्राहितेक्षणायै नमः
पुष्पाप्रियायै नमः
पुष्पकस्थायै नमः
पुण्यलभ्यायै नमः
पुरातनायै नमः
पुरुषार्थप्रदायै नमः
पूज्यायै नमः
पूतनाघ्ने नमः ॥७०॥
परन्तपायै नमः
पद्मप्रियायै नमः
पद्महस्तायै नमः
पद्मायै नमः

पद्ममुख्यै नमः
शुभायै नमः
जनशोकहरायै नमः
जन्ममृत्युशोकाविनाशिन्यैनमः
जगद्रूपायै नमः
जगद्वन्द्यायै नमः ।।८०॥
जयदायै नमः
जनकात्मजायै नमः
नाथनीयकटाक्षायै नमः
नाथायै नमः
नाथैकतत्परायै नमः
नक्षत्रनाथवदनायै नमः
नष्टदोषायै नमः
नयावहायै नमः
वह्निपापहरायै नमः
वह्निशैत्यकृते नमः ॥९०॥
वृद्धिदायिन्यै नमः
वाल्मीकिगीतविभवायै नमः
वचोऽतीतायै नमः
वराङ्गनायै नमः
भक्तिगम्यायै नमः
भव्यगुणायै नमः

भात्र्यै नमः
भरतवान्दितायै नमः
सुवर्णाङ्ग्यै नमः
सुग्रीवाङ्गदसेवितायै नमः
वैदेह्यै नमः
विनताघौघनाशिन्यै नमः
विधिवन्दितायै नमः
लोकमात्रे नमः
लोचनान्तस्थितकारुण्यसाग-
रायै नमः
कृताकृतजगद्धेतवे नमः
कृतराज्याभिषेककायै नमः

॥ इति श्रीरामरहस्योक्ता श्रीसीताष्टोत्तरशतनामावलिस्संपूर्णा ॥

॥ श्रीसीतारामौ विजयेते ॥

॥ अथ श्रीरामरहस्योक्तम् ॥

॥ श्रीहनुमदष्टोत्तरशतनामस्तोत्रम् ॥

हनुमानञ्जनासूनु र्धीमान् केसरिनन्दनः ।
वातात्मजो वरगुणो वानरेन्द्रो विरोचनः ॥ १ ॥
सुग्रीवसचिवः श्रीमान् सूर्यशिष्यस्सुखप्रदः ।
ब्रह्मदत्तवरो ब्रह्मभूतो ब्रह्मर्षिसंनुतः ॥ २ ॥
जितेन्द्रियो जितारातीं रामदूतो रणोत्कटः ।
सञ्जीविनीसमाहर्ता सर्वसैन्यप्रहर्षकः ॥ ३ ॥
रावणाकंप्यसौमित्रिनयनस्फुटभक्तिमान् ।

अशोकवनिकाच्छेदी सीतावात्सल्यभाजनम् ॥ ४ ॥
विषादभ्रूमितनयार्पितरामाङ्गुलीयकः ।
चूडामणिसमानेता रामदुःखापहारकः ॥ ५ ॥
अक्षहन्ता विक्षतारिस्तृणीकृतदशाननः ।
कुल्याकल्पमहाम्भोधिर्सिंहिकाप्राणनाशनः ॥ ६ ॥
सुरसाविजयोपायवेत्ता सुरनरार्चितः ।
जाम्बवन्नुतमाहात्म्यो जीविताहतलक्ष्मणः ॥ ७ ॥
जम्बुमालिरिपुर्जम्भवैरिसाध्वसनाशनः ।
अस्त्रावध्यो राक्षसारिस्सेनापतिविनाशनः ॥ ८ ॥
लङ्कापुरप्रदग्धा च वालानलसुशीतलः ।
वानरप्राणसन्दाता वालिसूनुप्रियङ्करः ॥ ९ ॥
महारूपधरो मान्यो भीमो भीमपराक्रमः ।
भीमदर्पहरो भक्तवत्सलो भर्त्सिताशरः ॥ १० ॥
रघुवंशप्रियकरो रणधीरोरयाकरः ।
भरतार्पितसन्देशो भगवच्छिलष्टविग्रहः ॥ ११ ॥
अर्जुनध्वजवासी च तर्जिताशरनायकः ।
महान् महामधुरवाङ्महात्मा मातरिश्वजः ॥ १२ ॥
मरुन्नुतो महोदारगुणो मधुवनप्रियः ।
महाधैर्यो महावीर्यो मिहिराधिककान्तिमान् ॥ १३ ॥
अन्नदो वसुदो वाग्मी ज्ञानदो वत्सलो वशी ।

वशीकृताखिलजगद्वरदो वानराकृतिः ॥ १४ ॥
भिक्षुरूपप्रतिच्छन्नोऽभीतिदो भीतिवर्जितः ।
भूमीधरहरोभूतिदायको भूतसन्नुतः ॥ १५ ॥
भुक्तिमुक्तिप्रदो भूमा भुजनिर्जितराक्षसः ।
वाल्मीकिस्तुतमाहात्म्यो विभीषणसुहृद्विभुः ॥ १६ ॥
अनुकंपानिधिः पंपातीरचारी प्रतापवान् ।
ब्रह्मास्त्रहतरामादिजीवनो ब्रह्मवत्सलः ॥ १७ ॥
जयवार्ताहरो जेता जानकीशोकनाशनः ।
जानकीरामसाहित्यकारी जनसुखप्रदः ॥ १८ ॥
बहुयोजनगन्ता च बलवीर्यगुणाधिकः ।
रावणालयमर्दी च रामपादाब्जवाहकः ॥ १९ ॥
रामनामलसद्भक्तो रामायणकथादृतः ।
रामस्वरूपविलसन्मानसो रामवल्लभः ॥ २० ॥
इत्थमष्टोत्तरशतं नाम्नां वातात्मजस्य यः ।
अनुसन्ध्यं पठेत्तस्य मारुतिस्संप्रसीदति ॥ २१ ॥
प्रसन्ने मारुतौ रामो भुक्तिमुक्ती प्रयच्छति ॥ २१½ ॥

॥ इति श्रीरामरहस्योक्तं श्रीहनुमदष्टोत्तरशतनामस्तोत्रम् ॥

॥ समाप्तम् ॥

॥ श्रीरामो जयति ॥

॥ अथ श्रीरामरहस्योक्ता ॥

॥ हनुमदष्टोत्तरशतनामावलिः ॥

ओं हनुमते नमः
अञ्जनासूनवे नमः
धीमते नमः
केसरिनन्दनाय नमः
वातात्मजाय नमः
वरगुणाय नमः
वानरेन्द्राय नमः
विरोचनाय नमः
सुग्रीवसचिवाय नमः
श्रीमते नमः
सूर्यशिष्याय नमः
सुखप्रदाय नमः
ब्रह्मदत्तवराय नमः
ब्रह्मभूताय नमः
ब्रह्मर्षिसन्नुताय नमः
जितेन्द्रियाय नमः
जितारातये नमः
रामदूताय नमः
रणोत्कटाय नमः
सञ्जीवनीसमाहर्त्रे नमः ॥२०॥
सर्वसैन्यप्रहर्षकाय नमः
रावणाकंप्यसौमित्रिनयनस्फु-
टभक्तिमते नमः
अशोकवनिकाच्छेदिने नमः
सीतावात्सल्यभाजनाय नमः
विषीदद्भूमितनयाऽर्पितरामा-
ङ्गुळीयकाय नमः
॥१०॥ चूडामणिसमानेत्रे नमः
रामदुःखापहारकाय नमः
अक्षहन्त्रे नमः
विक्षतारये नमः
तृणीकृतदशाननाय नमः
कुल्याकल्पमहाम्भोधये नमः
सिंहिकाप्राणनाशनाय नमः
सुरसाविजयोपायवेत्त्रे नमः
सुरवरार्चिताय नमः

जाम्बवन्नुतमाहात्म्याय नमः
जीविताहतलक्ष्मणाय नमः
जम्बुमालिरिपवे नमः
जम्भवैरिसाध्वसनाशनायनमः
अस्त्रावध्याय नमः
राक्षसारये नमः ॥४०॥
सेनापतिविनाशनाय नमः
लङ्कापुरप्रदग्धे नमः
वालानलसुशीतलाय नमः
वानरप्राणसन्दात्रे नमः
वालिसूनुप्रियङ्कराय नमः
महारूपधराय नमः
मान्याय नमः
भीमाय नमः
भीमपराक्रमाय नमः
भीमदर्पहराय नमः ॥५०॥
भक्तवत्सलाय नमः
भर्त्सिताशराय नमः
रघुवंशप्रियकराय नमः
रणधीराय नमः
रयाकराय नमः
भरतार्पितसन्देशाय नमः

भगवच्छिलष्टविग्रहाय नमः
अर्जुनध्वजवासिने नमः
तर्जिताशरनायकाय नमः
महते नमः ॥६०॥
महामधुरवाचे नमः
महात्मने नमः
मातरिश्वजाय नमः
मरुन्नुताय नमः
महोदारगुणाय नमः
मधुवनप्रियाय नमः
महाधैर्याय नमः
महावीर्याय नमः
मिहिराधिककान्तिमते नमः
अन्नदाय नमः ॥७०॥
वसुदाय नमः
वाग्मिने नमः
ज्ञानदाय नमः
वत्सलाय नमः
वशिने नमः
वशीकृताखिलजगते नमः
वरदाय नमः
वानराकृतये नमः

भिक्षुरूपप्रतिच्छन्नाय नमः
(अ) भीतिदाय नमः ॥८०॥
भीतिवर्जिताय नमः
भूमीधरहराय नमः
भूतिदायकाय नमः
भूतसन्नुताय नमः
भुक्तिमुक्तिप्रदाय नमः
भूम्ने नमः
भुजनिर्जितराक्षसाय नमः
वाल्मीकिस्तुतमाहात्म्यायनमः
विभीषणसुहृदे नमः
विभवे नमः ॥९०॥
अनुकंपानिधये नमः
पंपातीरचारिणे नमः
प्रतापवते नमः
ब्रह्मास्त्रहतरामादिजीवनायनमः
ब्रह्मवत्सलाय नमः
जयवार्ताहराय नमः
जेत्रे नमः
जानकीशोकनाशनाय नमः
जानकीरामसाहित्यकारिणे नमः
जनसुखप्रदाय नमः ॥१००॥
बहुयोजनगन्त्रे नमः
बलवीर्यगुणाधिकाय नमः
रावणालयमर्दिने नमः
रामपादाब्जवाहकाय नमः
रामनामलसद्वक्त्राय नमः
रामायणकथाऽऽदृताय नमः
रामस्वरूपविलसन्मानसायनमः
रामवल्लभाय नमः ॥१०८॥

॥ इति श्रीरामरहस्योक्ता श्रीहनुमदष्टोत्तरशतनामावळिः ॥

॥ समाप्ता ॥

॥ श्रीरामभक्तिकल्पलता समाप्ता ॥

असुकरलाभैर्ग्रन्थैरमुद्रितै रद्ययावदतिरस्यैः ।
महिततनुर्वहतु मुदं मनसि सतां रामभक्तिकल्पलता ॥

॥ श्रीरामो जयति ॥

॥ अथैतद्ग्रन्थस्थविषयविवरणम् ॥

(१) **रामपूजाकल्पः**— अस्यां पूजायां लब्धराममन्त्रस्यैवाधिकारः । इयं च पूजा नवावरणयन्त्रे सपरिवारश्रीरामप्रतिमायां वा कर्तव्या । रामायणपुस्तके च सीताकल्याणपट्टाभिषेकषड्ढादिपारायणकाले कर्तव्येति सतां संप्रदायः । यन्त्रपूजायां श्रीरामायणपुस्तकपूजायां च सर्वाङ्गविशिष्टां सायुधां साभरणां च भगवतो मूर्तिं मनसा ध्यात्वा तत्तदङ्गपूजा कर्तव्या । एतत्कल्पोक्तपूजाया अभावेऽपि प्रतिदिनपूजावसाने छत्राद्युपचारश्लोकाः "त्वमक्षरोसी" त्यादिप्रार्थनाश्लोकाश्च भक्तैः पठितव्या इति विशेषः श्रीरामचरणभक्तानामभिमतः ॥

(२) **सुन्दरकाण्डसप्तसर्गीपारायणविधिः**—अत्र श्रीमत्सुन्दरकाण्डस्थानां बहूनां षड्ढानां विशिष्य फलसङ्कीर्तनव्याजात् तत्तदिष्टप्राप्त्यनिष्टनिरसनेच्छुभिः तत्तत्प्रघट्टश्रवणपठनादिकं कर्तव्यमिति प्रतिपाद्यते । तत्र विशेषावधानं कर्तव्यं भक्तैः । अत्र श्रीरामप्रतिमादानं विहितमास्ति । तन्मन्त्रस्तु रामलक्ष्मणप्रतिमादानविधौ (२३ पृष्ठ) उक्तः, सोऽत्राप्यनुसन्धेयः ॥

(३) **श्रीरामपट्टाभिषेकप्रयोगः**—तत्र नित्यपाठ, काम्यपाठान्तर्गतपुनर्वसुपारायणप्रयुक्त, पट्टाभिषेकोत्सवयोः केवलं सङ्कल्पकाले भेदः प्रदर्श्यते । अन्येषामनेकेषां पारायणानां कर्तृ-

भिः तत्तदुचितपदविन्यासेन ऊहः कर्तव्यः । लोके तावत् सुन्दरकाण्डमेकमेव पृथक्पारायणायोपयुज्यते । अत्र तु सप्तानामपि काण्डानां पृथक्पृथक्पारायणे पृथक्पृथक्फलमुपादिश्यते । तत्र च चक्षुर्धीयतां । अत्र षट्स्वपि काण्डेषु त्रिंशिष्य त्रिंशत्सङ्ख्याकानां षट्कानां पारायणश्रवणानुसन्धानादिषु कारणतया कामनाविशेषाः प्रदर्श्यन्ते । ते च मनसि सन्निधातव्याः ॥

(४) **रामलक्ष्मणप्रतिमादानविधिः**— अयं च विधिः पुत्रेप्सुभिरेव प्रायशः अनुष्ठीयते । कृते त्वेतत्सङ्कल्पपदपदार्थपरिचिन्तने कुधूमत्रिजटानिषादहनुमदाद्यनुग्रहकीर्तनतः चतुर्विधपुरुषार्थानामपि दाताऽयं विषय इति प्रतिभाति । यथा वा मन्यन्ते सुधियः । अन्ते फलश्रुतिरप्यवधेया ॥

(५) **श्रीमद्रामायणपारायणकालेषु निवेदनक्रमः**— विशेषविशिष्टषट्केषु यथालब्धं उत्तमद्रव्याणि भगवते निवेदयामः । यद्यपि तस्य फलमस्त्येव । तथापि शास्त्रोक्तरीत्या तत्तद्धट्केषु तत्तन्निवेदने कृते महत्तरफलास्तित्वात् भगवान् क्षिप्रमेव प्रसीदतीत्येतत् प्रकरणेऽस्मिन् निरूपितं । अशक्त्या कारणान्तरेण वा उक्तद्रव्याणामलाभे फलार्पणमात्रेण तृप्तो भवति रघूणां प्रभुरिति च अत्रैवान्ते समीरितम् ॥

(६) **कामनाविशेषलाभार्थकपारायणम्** — यद्यपि श्रीमद्रामायणस्थस्य यस्य कस्यचित् सर्गस्यापि पठनात् सर्वार्थसिद्धिः स्यादिति बहुत्र निरूपितं । तथापि द्रुततरमेव स्वा-

भीष्टसिद्धिमभिलषद्भिः पठनीयाः श्रीरामायणषट्का अत्र निरूप्यन्ते। अत्र च रावणप्रथमयुद्धसर्गः (युद्धकाण्डीयः ५९ सर्गः) भार्गवविजयसर्गौ (बालकाण्डे ७५, ७६ सर्गौ) विशेषतः अवधातव्यौ बहुतरानिष्टनिवृत्तिकामैः । अत्रापि निर्दिष्टनैवेद्याल।भे कदलीफलपञ्चकं सुलभमेव विहितम् ॥

(७) नवग्रहदशाभुक्तिदोषपरिहारः— बहुतरशरीरश्रमेण धनव्ययेन च नवग्रहदोषशान्तिं करणीयामुपेक्ष्य परमसुलभयत्किञ्चिद्रामायणसर्गपारायणेन महत्तरानिष्टनिवृत्तिं प्रदर्श्यते । अत्र च दशानाथकार्यप्रयुक्तबाधायाः भुक्तिनाथकार्यप्रयुक्तबाधायाश्च परिहारः कथ्यते । यस्य दशानाथ केवलमनिष्टकर इति जन्मपत्रिकारीत्याऽवगम्यते स तावत् दशादोषनिवर्तकषट्कपारायणमेव आदशासमाप्ति कुर्यात् । यस्य भुक्तिनाथ एव अनिष्टकरः, स तु दशादोषनिवर्तकं भुक्तिदोषनिवर्तकं च षट्कद्वयं पठेत् । यस्य च उभावप्यनिष्टकरौ तस्याप्येवमेव । इतीदं ज्योतिश्शास्त्राभिप्राय इति तच्छास्त्रविदो मन्यन्ते ।

(८) श्रीराममूर्तिप्रतिष्ठाविधिः— भगवदाराधनाय उपयुज्यमाना मूर्तयस्तावत् बहुविधाः। सुवर्णरजताताम्रादिनिर्मिता आपादमस्तकं सर्वैरप्यङ्गैरुपेताः काश्चित् । नवावरणयन्त्ररूपा अन्याः । दशावरणयन्त्ररूपा अपराः । रागादिभिः फलकादिषु कल्पिताश्चित्ररूपा इतराः । सर्वासामप्येतासां भगवत्सा-

न्निध्यकरप्रतिष्ठाविधिरत्रोच्यते । अत्र यन्त्रप्रतिष्ठायां सङ्कल्प-विषये आधिक्यं दर्शितमस्ति । तत्र देयमवधानं । होमश्च प्रतिष्ठाङ्गत्वेन विहितः । स चैवं । स्वगृह्योक्तविधिना अग्निमुखं कृत्वा, अथादौ दधि, मधु, आज्यमिति त्रीणि द्रव्याण्येकीकृत्य, तैस्संपृक्तेन अन्नेन एकः, आज्येन च एकः, इति द्वौ ऋत्विजौ रामगायत्रीमुच्चरन्तौ अष्टोत्तरशताहुत्ति जुहुयातां । रामगायत्रीचेयं । "दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात्" इति रामतापिन्युक्ता । ततश्च दध्ना, आज्येन, मधुना च पृथक्पृथक्संपृक्तैस्त्रिभिरन्नैः पृथगाज्येन च चत्वारः ऋत्विजः अष्टोत्तरशताहुतीः कुर्युः । तथाचान्नोक्तं—"जपान्ते मूलमन्त्रेण दधिमध्याज्यसंयुतैः । अन्नैः पृथक्पृथग्विप्रा अष्टोत्तरशताहुतीः । घृतेन च पृथक्कुर्युरग्नौ चत्वार ऋत्विजः । मिळितेन च तैः कृत्वैवान्नेन द्वौ च ऋत्विजौ । अष्टोत्तरशतं होमं रामगायत्रियाऽऽदितः ।" इति । अत्र चकारेण आज्यस्य संग्रहः । अन्यथा द्वयोर्ऋत्विजोर्विधानं बाधितं स्यात् । अत्र च विधिश्लोकेषु पूर्वं वक्तव्यं पश्चादुक्तं, पश्चाद्वक्तव्यं च पूर्वमुक्तं । अत्र ग्रन्थे अस्मिन्स्थले "कृत्वैवान्नेन" इति स्थाने "कुर्यादन्नेन" इत्यबद्धं मुद्रितं तच्च परामर्शनीयं । अन्यदसंदिग्धम् ।

(९) रामायणमाहात्म्यम् – ब्रह्मनारदसंवादात्मके स्कन्दोपपुराणान्तर्गते अस्मिन् प्रकरणे त्रयः सन्त्यध्यायाः । तत्र

प्रथमे तावत् नित्यपारायण, काम्यपारायण, मुमुक्षुपारायणाख्यभेदेन श्रीमद्रामायणपठनं त्रेधा विभज्य तत्तदनुष्ठानप्रकाराः प्रदर्शिताः। द्वितीयेऽध्याये, भगवता श्रीरामेण भुक्तिमुक्तिसाधनस्य स्वचरितस्य प्रायेण करुणरसभूयिष्ठस्य प्रणयनेन पण्डितपामरसाधारण्येन सर्वान् लोकानुद्दिधीर्षुणा ब्रह्माणमाहूय वाल्मीकिं प्रति सरस्वतीप्रेषणादेशः, श्रीरामेण व्याधरूपेण क्रौञ्चरूपशङ्कुकर्णवधः, वाल्मीकिना तस्मै शापदानं, ब्रह्मणा वाल्मीकिराश्रमं प्राप्य तस्मै वरप्रदानं, सावित्रीसरस्वतीभ्यां च वाल्मीकये वरप्रदानं, वाल्मीकिपूर्वजन्मवृत्तान्तः, श्रीरामायणप्रणयनं, चेतीयन्तो विषयाः निरूपिताः। तृतीये च, प्रथमाध्यायोक्तकाम्यपाठस्य प्रपञ्चनम्। तत्र सुन्दरकाण्डसमसर्गीपारायणं, पुनर्वसुद्वयसाध्यपारायणं, नवरात्रपारायणं, ऐच्छिकपारायणं, पुनर्वसुत्रयसाध्यपारायणं च विधिविस्तरानुष्ठानप्रकारेण सह सम्यङ्निरूपितानि। अथ नारदेन गङ्गाद्वारे भगवन्तं वाल्मीकिं वक्तारं परिकल्प्य यथोक्तविधिना पुनर्वसुद्वयसाध्यरामायणपारायणानुष्ठानं, समाप्तौ प्रत्यक्षेणाविर्भूतस्य श्रीरामस्य नारदवाल्मीकिभ्यां वरप्रदानं, एतत्सर्वं श्रुतवत्ता युधिष्ठिरेण दाल्भ्यं वक्तारं परिकल्प्य श्रीकृष्णसन्निधौ नारदानुष्ठितरामायणपारायणानुष्ठानं, अन्ते श्रीकृष्णेन श्रीरामीभूय युधिष्ठिराय वरप्रदानमित्येते लोमहर्षणकराः विषयाः प्रतिपादिताः ॥

(१०) नवाह्नपारायणविधिः— चैत्राश्वयुजान्यतरमासे (अयं मुख्यः कल्पः, अन्येऽपि मासा अनुकल्पतया विहिताः) प्रथमादिनवम्यन्तेषु नवसु दिवसेषु षट्काण्डपरिमितरामायणं पठनश्रवणाभ्यां यथासमाप्येत तथाऽत्र विधयो दर्शिताः । प्रतिदिनं पारायणसमापनावधिः, प्रतिदिनं भोजनीयब्राह्मणसङ्ख्या च विशेषतोऽवधानदानमत्रार्हतः । आदावस्य सङ्कल्पप्रकारः परमाद्भुतः । इदं च व्रतं क्षत्रियभ्रूणहननदोषस्य, श्रीरामातिक्रमदोषस्य च शान्तये जामदग्न्येनानुष्ठितमिति निगमनं च कृतम् ॥

(११) दशावरणपूजा— अस्यां पूजायां लब्धमूलमन्त्रमालामन्त्रोपदेशस्यैवाधिकारः । आचार्यः ऋत्विजश्च तथाभूता एव वरणीयाः । कनकरजताताम्रान्यतमपट्टे यन्त्रं दशावरणं निर्माय तन्मध्ये श्रीरामविग्रहं विन्यस्य पूज्यते चेत् मुख्योऽयं कल्पः, यन्त्रमध्ये सालग्रामं वा विन्यस्य पूजयेत् । अयमनुकल्प , केवलयन्त्रमध्यपूजा ततोऽप्यवरा । अत्र च लक्ष्मणमन्त्रेण लक्ष्मणं पूजयेदित्युच्यते । लक्ष्मणमन्त्रस्त्वत्थं । "द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणम् । धनुर्बाणधरं देवं रामाराधनतत्परम् ।" इति । अत्र आवाहन्यादयस्सप्तदश मुद्राः वाङ्मुद्रा च पूजाङ्गत्वेन प्रदर्श्यन्ते । तासां स्वरूपाणि ग्रन्थान्तरेभ्यः अधिगन्तव्यानि । ग्रन्थविस्तरभिया नेह प्रदर्शितानि ॥

(१२) रामतापिन्युक्तरामस्तोत्रम् — इदं च स्तोत्रं
ित्युक्तत्वात् क्षिप्रतरश्रीरामदर्शनकारित्वाच्च स्तूयतामनेन
गवानिति संगृहीतमत्र ॥

(१३) हनुमत्कृतरामस्तोत्रम् — आर्षत्वात् अत्यन्तस-
ाहितश्रीरामभक्तश्रीहनुमत्कृतत्वाच्च भगवत्प्रसादं क्षिप्रत-
मावर्जयेदिति स्तोत्रस्यास्यात्र घटकत्वमिति विवेचनीयम् ॥

(१४) भुजङ्गस्तोत्रम् — श्रीरामविषयकभुजङ्गस्तोत्रस्य
त्राप्यनुपलम्भादिदमप्यत्र सन्निवेशितम् ॥

(१५) अगस्त्यसंहितोक्तः श्रीरामपट्टाभिषेकविधिः-
र्वोक्तरामरहस्यान्तर्गतपट्टाभिषेकविधेरस्य महान् भेदो दृश्य-
ा । अयं विस्तृततरः । श्रद्धावद्भिराढ्यैरेवानुष्ठातुं शक्यः ।
तदनुष्ठानाशक्तस्य तु स मुख्यः कल्पः ॥

(१६, १७, १८) रामसीताहनुमदष्टोत्तरशतनाम-
तोत्राणि — अत्र श्रीरामाष्टोत्तरशतनामस्तोत्रं आदित आ-
भ्य श्रीरामायणकथामनुसृत्य प्रणीतमस्ति । सीताष्टोत्तरशत-
ामस्तोत्रमनेकतत्त्वार्थविशेषविशिष्टं दृश्यते । हनुमदष्टोत्तरश-
ानामस्तोत्रे च हनुमत्कृतानि प्रशस्यतराणि प्रायेण सर्वाण्यपि
कर्माणि स्फुरन्ति । पूर्वप्रकटिते पुस्तके एतेषां नामावळ्यो न
प्रकटिता । अस्मिंस्तु मुद्रणे साऽपि न्यूनता निरस्तेति विदां—
कुर्वन्तु विद्वांसो विशेषेण श्रीरघुनाथचरणनळिनभक्ता इति
विज्ञाप्यते ॥ ओं शुभमस्तु ॥ *

करीन्द्रकरबाहवे करधृताशुगासेषवे
प्रशस्तगुणसिन्धवे प्रणतिकर्मिणां बन्धवे ।
कलीरिततमोमुषे कलितपुण्यहृज्जग्मुषे
नमोऽस्तु रघुसूनवे नतमनस्तमोभानवे ॥

श्री
घो
श्री
मुत्त

शत्त
त्रि

भि
था
स्व
रेख
पात्र
दर्भै
दांश
त्यां
स्सु
भि
द्धा
ध्या